Vol. I. Foll. 342. I. *Brahmakhaṇḍa,* Foll. 1–68. Incipit: गणेशब्रह्मेशसुरेशशेषाः सुराश्च सर्वे मनवो मुनीन्द्राः। सरस्वतीश्रीगिरिजादिकाश्च नमंत्ति देवं प्रणमामि तं विभुं ॥१॥ etc. भारते नैमिषारण्ये ऋषयः शौनकादयः। नित्यां निमित्तिकीं (nai°) कृत्वा क्रियामूषुः कुशासने ॥७॥ एतस्मि[न्न]न्तरे सौतिमागच्छंतं यदृच्छया। प्रणतं सुविनीतं तं विलोक्य ददुरासनं ॥८॥ तं संपूज्यातिथिं भक्त्या शौनको मुनिपुंगवः। संपृछत्कुशलं शान्तं शांतः पौराणिकं मुदा ॥९॥ वर्त्मायासविनिर्मुक्तं वसन्तं सुस्थिरासने। समंतं सर्वतत्वज्ञं पुराणांनां पुराणवित् ॥१०॥ परं कृष्णकथोपेतं पुराणं श्रुतिसंमतं। मंगलं मंगलार्हं च मंगल्यं मंगलालयं ॥११॥ सर्वमंगलवीजं च सर्वदा मंगलप्रदं। सर्वामंगलनिघ्नं[2] च सर्वसंपत्करं परं ॥१२॥ हरिभक्तिप्रदं शश्वत् सुखदं मोक्षदं भवे। तत्वज्ञानप्रदं दारपुत्रपौत्रविवर्द्धनं ॥१३॥ पप्रछ सुविनीतं च सुनीतो मुनिसंसदि। यथाकाशे तारकानां (°ṇám) द्विजराजो विराजते ॥१४॥ शौनक उवाच॥ प्रस्थानं भवतः कुत्र कुत आयासि ते शिवं। किमस्माकं पुण्यदिनमद्य त्वद्दर्शनेन च ॥१५॥ वयमेव कलौ भीता विशिष्टज्ञानवर्जिताः। मुमुक्षवो मवे (bhave) मग्नास्तद्धेतुस्त्वमिहागतः ॥१६॥ भवान्साधुर्माहाभागः पुराणेषु पुराणवित्। सर्वेषु च पुराणेषु निष्णातो (पि)तिकृपानिधिः ॥१७॥ श्रीकृष्णे निश्चला भक्तिर्यतो भवति शाश्वती। तत्कथ्यतां महाभाग पुराणं ज्ञानवर्द्धनं ॥१८॥ गरीयसी या मोक्षाच्च कर्ममूलनिकृंत्तनी। संसारे संनिवद्धानां निगडछेदकर्त्तरी ॥१९॥ भवदावाग्निदग्धानां पीयूषवृष्टिवर्षणी। सुखदानंददा सौते शश्वच्चेतसि जिविनां (l. jívinám) ॥२०॥ यत्रादौ सर्ववीजं च परब्रह्मनिरूपणं। तस्य सृष्टन्मुखस्यापि (sṛishṭyu°) सृष्टेरुत्कीर्त्तनं परं ॥२१॥ सारात्सारं निराकारं परमात्मस्वरूपकं। किमाकारं च तद्ब्रह्म तद्ध्यानं किं च भावनं ॥२२॥ ध्यायंते वैष्णवाः किं वा शांत्ताश्च योगिनः परं। मतं प्राधानं केषां वा गूढं वेदे निरूपितं ॥२३॥ प्रकृतेश्च निराकारं[3] यत्र वासो निरूपितः। गुणानां लक्षणं यत्र महदादीनां च निश्चयः ॥२४॥ गोलोकवर्णनं यत्र यत्र वैकुंठवर्णनं। वर्णनं शिवलोकस्य यत्रान्यत्स्वर्गवर्णनं ॥२५॥ अंशानां च कलानां च यत्र सौते निरूपणं। के प्राकृता[:] का प्राकृतिः क आत्मा प्रकृतेः परः ॥२६॥ निगूढं जन्म येषां वा देवानां देवयोषितां। समुत्पत्तिः समुद्राणां शैलानां सरितामपि ॥२७॥ का (l. के) वांशाः प्रकृतेश्चापि कलाः का वा कला(:)कलाः। तासां च चरितं ध्यानं पूजास्तोत्रादिकं शुभं ॥२८॥ दुर्गासरस्वतीलक्ष्मीसावित्रीणां च वर्णनं। यत्रैव राधिकाख्यानं अत्यपूर्वं सुधोपमं ॥२९॥ जीवकर्मविपाकश्च नरकाणां च वर्णनं। कर्मणां खंडनं यत्र यत्र तेभ्यो विमोक्षणं ॥३०॥ येषां च जीविनां यद्वत् स्थानं यत्र शुभाशुभं। जीविनां कर्मणो यस्माद्यासु यासु च योनिषु ॥३१॥ जीविनां कर्मणो यस्माद्यो यो रोगो भवेदिह। मोक्षणं कर्मणो यस्मात्तेषां च तन्निरूपय ॥३२॥ शालग्रामशिलसी[4] काली गंगा पृथ्वी स्वधा तथा। आसां यत्र शुभाख्यानमन्यासामपी (°pi) यत्र वै ॥३३॥ शालग्रामशिलानां च दानानां तन्निरूपणं। अपूर्वं यत्र वा सौते धर्माधर्मनिरूपणं ॥३४॥ गणेश्वरस्य चरितं यत्र तज्जन्मकर्म च। कवचस्तोत्रमंत्राणां गूढां (l. गूढानां) यत्र वर्णनं ॥३५॥ यदपूर्वमुपाख्यानमश्रुतं परमाद्भुतं। कृत्वा मनसि तत्सर्वं सांप्रतं वक्तुमर्हसि ॥३६॥ यत्र जन्मभ्रमो विश्वे पुण्यक्षेत्रे च भारते। परिपूर्णतमस्यापि कृष्णस्य परमात्मनः ॥३७॥ जन्म कस्य गृहे लब्धं पुण्ये पुण्यवतो मुने। सुतं प्रसूता का धन्या मान्या पुण्यवती सती ॥३८॥ आविर्भूव च तदेहाक्व (l. ávirbhúya cha tadgehát kva) गतः केन हेतुना। गत्वां कि (l. गत्वा किं) कृतवांस्तत्र कथं वा पुनरागतः ॥३९॥ भारावतारणं केन प्रार्थितो गोश्चकार सः। विधाय किं वा सेतुं च गोलोकं गतवान्पुनः ॥४०॥ इतीदमन्यदाख्यानं पुराणं श्रुतिदुर्लभं। दुर्विज्ञेयं मुनीनां च मनोनिर्मलकारणं ॥४१॥ अज्ञानाद्यन्मया पृष्टमपृष्टं वा शुभाशुभं। सद्यो वैराग्यजननं तन्मे व्याख्यातुमर्हसि ॥४२॥ शिष्यपृष्टमपृष्टं वा व्याख्यानं कुरुते च यः। स सद्गुरुः सतां श्रेष्ठो योग्यायोग्ये च यः समः ॥४३॥ सौतिरुवाच॥ सर्वं कुशलमस्माकं त्वत्पादपद्मदर्शनात्। सिद्धक्षेत्रादागतो हं यामि नारायणाश्रमं ॥४४॥ दृष्ट्वा विप्रसमूहं च

[1] In fine capitis secundi in cod. B: इति ब्रह्मांडपुराणे द्वितीयखंडोपपथ etc. scriptum est.

[2] L. °विघ्नं.

[3] L. किमाकारो.

[4] L. मनसा तुलसी.

नमस्कर्त्तुमिहागतः । द्रष्टुं च नैमिषारण्यं पुण्यदं चापि भारते ॥४५॥ देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु संभ्रमात् । स कालसूत्रं व्रजति यावच्चंद्रदिवाकरौ ॥४६॥ हरिःर्ब्राह्मणरूपेण शश्वत् भ्रमति भूतले । सुकृती प्रणमेत्पुण्याद्ब्राह्मणं हरिरूपिणं ॥४७॥ भगवन् यत्वया पृष्टं ज्ञातं सर्वमभीशितं (°psitam) । सारभूतं पुराणेषु ब्रह्मवैवर्त्तमुत्तमं ॥४८॥ पुराणोपपुराणानां वेदानां भ्रमभंजनं । हरिभक्तिप्रदं सर्वतत्वज्ञानप्रवर्द्धनं ॥४९॥ कामिनां कामदं चंदं मुमुक्षुणां (chedam °kshúṇám) च मोक्षदं । भक्तिप्रदं वैष्णवानां कल्पवृक्षस्वरूपकं ॥५०॥ ब्रह्मखंडे सर्ववीजं परंब्रह्मनिरूपणं । ध्यायंते योगिनः सर्वे वैष्णवा यत्परात्परं ॥५१॥ वैष्णवा योगिनः संत्तो न च भिन्नाच शौनक । स्वज्ञानपरिपक्केन भवंती (°ti) ज्ञीविनः क्रमात् ॥५२॥ संत्तो भवति (l. bhavanti) तत्संगाद्योगिसंगेन योगिनः । वैष्णवा भक्तसंगेन क्रमात्संयोगिनः परान् ॥५३॥ यदुद्भवाश्च देवानां देवीनां सर्वजीविनां । ततः प्रकृतिखंडे च देवीनां चरितं शुभं ॥५४॥ जीविकर्मविपाकश्च शालग्रामनिरूपणं । तासां च कवचस्तोत्रमंत्रपूजानिरूपणं ॥५५॥ प्रकृतेर्लक्षणं तत्र कलांशानां निरूपणं । कीर्त्तेनत्कीर्त्तनं (l. कीर्त्तेरुत्कीर्तनं) तासां प्रभावश्च निरूपितः ॥५६॥ सुकृतीनां दुष्कृतीनां यत्स्थानं स्यात् शुभाशुभं । वर्णनं नरकाणां च रोगानां मोक्षणां (l. रोगाणां मोक्षणं) ततः ॥५७॥ ततो गणेशखंडे च तज्जन्मपरिकीर्त्तनं । अतीवापूर्वचरितं श्रुतिवेदसुदुर्लभं ॥५८॥ गणेशभृगुसंवादसर्वतत्वनिरूपणं । निगूढकवचस्तोत्रमंत्रतंत्रनिरूपणं ॥५९॥ श्रीकृष्णजन्मखंडं च कीर्त्तितं च ततः परं । भारते पुण्यक्षेत्रे च श्रीकृष्णजन्मकर्म च ॥६०॥ भुवो भारावतरणं क्रीडाकौतुकमण्डल (l. °mangalam) । सतां सेतुविधानं च जन्मखंडे निरूपितं ॥६१॥ इदं ते कथितं विप्र पुराण प्रवरं परं । चतुःखंडपरिमितं सर्वधर्मनिरूपितं ॥६२॥ सर्वेषामीशि(psi)ततमं सर्वाशापूर्णकारणं । ब्रह्मवैवर्त्तकं नाम सर्वाभीष्टफलप्रदं ॥६३॥ सारभूतं पुराणेषु केवलं वेदसंमतं । वीवृतं ब्रह्मकार्यं च कृष्णेन यत्र शौनक ॥६४॥ ब्रह्मवैवर्त्तकं तेन प्रवदंति पुराविदुः (°vidaḥ) । इदं पुराणसूत्रं च पुरा दत्तं च ब्रह्मणे ॥६५॥ निरामये च गोलोके कृष्णेन परमात्मना । महातीर्थे पुष्करे च दत्तं धर्माय ब्रह्मणां (l. ब्रह्मणा) ॥६६॥ धर्मेण दत्तं पुत्राय प्रीत्या नारायणाय च । नारायणर्षिर्भगवान्नारदाय ददौ तदा ॥६७॥ नारदो व्यासदेवाय प्रददौ जाह्नवीतटे । व्यासः पुराणसूत्रं तु संव्यस्य विपुलं महत् ॥६८॥ मह्यं ददौ सिद्धक्षेत्रे पुण्यदे सुमनोहरे । मयेदं कथितं ब्रह्मन्स्त्वं समग्रं निशामय ॥६९॥ अष्टादश(सह)सहस्रं (°sáhasram) तु व्यासेनेदं पुराणंकं । पुराणंकात्स्न्यंश्रवणे यत्फलं लभते नरः ॥७०॥ [त]त्फलं नूनमध्यायश्रवणेन च ॥७१॥१॥

Capita sunt triginta. 1. Prooemium. 2. Ante creationem Goloka coelum unum exstitit, super Vishnuis et Ṣivae mundo tunc temporis vacuo eminens. In medio Goloka summum numen (रासमंडलमध्यस्थं शांतं रासेश्वरं वरं), luce involutum, immotum quievit. 3. Deus creandi cupidus e corpore suo omnes deos procedere jubet[1], hoc quidem ordine: Náráyaṇa, Ṣiva, Brahman, Dharma, Sarasvatí, Lakshmí, Prakṛiti (= Durgá). 4. Sávitrí, Káma, Rati, Varuṇa, Váyu, Vishṇu. A quibus alii etiam dei et deae creantur. 5. Temporum divinorum computatio[2]. Rádhae in Rásamaṇḍala creatio. Pastores, pecora, ferae, currus, minorum gentium dei oriuntur. 6. Dei quum deas in matrimonium ducerent, Ṣiva Prakṛitim, ne devotionis obstaculum esset timens, recusavit. Ṣiva ascetarum princeps constituitur. Brahmanem quum novae creationis dominum fecisset, Kṛishṇa cum pastoribus in Vṛindávanam proficiscitur. 7. Mundi creatio. 8. Sávitrís et Brahmanis progenies. Nárada, quum Brahmanis mandato, ut ipse cum fratribus creandi munus susciperet, restitisset, ea poena afficitur, ut per innumera secula Gandharva (Upabarhaṇa nomine), deinde servae filius (dásíputra) esset. 9, 10. Reliquorum deorum origo. Ghṛitáchís et Viṣvakarmanis filii octo ordinum inferiorum majores[3]. Ordinum mixtorum origo. Sunt ii: (fol. 24^{b}). कुलटायां च शूद्रायां चीत्रकारस्य (chi°) वीर्यतः । वभूवादालिकाकारः (aṭṭáliká°) पतितो जारदोषतः ॥९६॥ आदालिकाकारवीर्यात्कुंभकारस्य योषिति । वभूव कोटकः सद्यः पतितो गृहकारकः ॥९७॥ कुंभकारस्य वीर्येण सद्यः कोटकयोषिति । वभूव तैलकारश्च कुटिलः पतितो भुवि ॥९८॥ सद्यः क्षत्रियवीर्येण राजपुत्रस्य योषिति । वभूव तीवरश्चैव पतितो जारदोषतः ॥९९॥ तीवरस्य तु वीर्येण तैलकारस्य योषिति । वभूव पतितो दस्य (? dasyur) नटश्च परिकीर्त्तितः ॥१००॥ नटस्तीवरकन्यायां जनयामास षस्मरान् (? shaṇ naván) । माल्लं मल्लं मातरं च भंडं कोलं कलंदरं ॥१॥ ब्राह्मण्यां शूद्रवीर्येण पतितो जारदोषतः । सद्यो वभूव चांडालः सर्वस्मादधमो[ऽ]शुचिः ॥२॥ तीवरेण च चांडाल्यां चर्मकरो (? karmakáro) वभूव ह । कर्मकाराच्च चांडाल्यां मांसच्छेदी वभूव ह ॥३॥ मांसछेद्यां तीवरेण कोचश्च परि-

---

[1] आलोच्य मनसा सर्वमेकमेव सहायवान् (eka evásaháyaván ?) । स्वेछया स्रष्टुमारेभे सृष्टिस्वेछामयः प्रभुः ॥३॥ आविर्वभूवुः सर्वादौ पुंसो दक्षिणपार्श्वतः । भवकारणरूपाश्च मूर्त्तिमंतस्त्रयो गुणाः (i. e. sattva, tamas, rajas) ॥४॥ ततो महानहंकारः पंचतनमात्र (? panchatva°) एव च । रूपरसगंधस्पर्शशब्दाश्चैवेतिसंज्ञकाः ॥५॥ आविर्वभूवु (l. आविर्वभूव) तत्पश्चात्स्वयं नारायणः प्रभुः । etc.

[2] ब्राह्मवाराहपाद्माश्च कल्पाश्च त्रिविधा मुने । यथा युगानि चत्वारि क्रमेण कथितानी च ॥५॥ सत्यं त्रेता द्वापरं च कलिश्चेति चतुर्युगं । त्रिशतैः षष्ट्याधिकैश्च युगैर्दिव्ययुगं स्मृतं ॥६॥ मन्वंतरं तु दिव्यानां युगानामेकसप्ततिः । अष्टाविंशत्सु मनुषु गतेषु ब्रह्मणो दिनं ॥७॥ त्रिशतैःस्व(ṣ cha)षष्ट्याधिकैर्दिनैर्वर्षं च ब्रह्मणः । अष्टोत्तरं वर्षशतं विधेरायुर्निरूपितं ॥८॥ एतन्निमेषकालं (l. °las) तु कृष्णस्य परमात्मनः । ब्रह्मणश्चायुषा कल्पः कालविद्भिर्निरूपितः ॥९॥ क्षुद्रकल्पा वहुतरास्ते संवर्त्तादय स्मृताः । सप्तकाल्पांतजीवी च मार्कंडेयश्चतन्मतः ॥१०॥ ब्रह्मणश्च दिनेनैव स कल्पः परिकीर्त्तितः । विधेश्च सप्तदिवसैर्मुनेरायुर्निरूपितं ॥११॥

[3] मालाकारकर्मकारशंखकारकुविंदकान् । कुंभकारसूत्रधारस्वर्णचित्रकरांस्तथा ॥ Paulo ante novem fuisse dicuntur, ibi enim कंसकार additus est.

कीर्त्तितः । कोंचस्त्रियां तु कैवर्त्तात्कांडारः परिकीर्त्तितः ॥४॥ सद्यःश्चांडालकन्यायां नटवीर्येण शौनक । वभूवतुस्तौ द्वौ पुत्रौ दुष्टो हडिडिमौ (? dushṭau haḍḍiḍimau) तथा ॥५॥ क्रमेणाऽहरिकन्यायां (haḍḍi°) सद्यश्चांडालवीर्यतः । वभूवुः पंच पुत्राश्च दुष्टा वनचराश्च ते ॥६॥ नटात्तीवरकन्यायां गंगातीरे च शौनक । वभूव सद्यो यां वालो गंगापुत्रः प्रकीर्त्तितः ॥७॥ गंगापुत्रस्य कन्यायां वीर्येण वेषधारिणः । वभूव वेषधारि च पुत्रो योगी प्रकीर्त्तितः ॥८॥ वैश्यात्तीवरकन्यायां सद्यः शुंडी वभूव ह । शूंडियोषीति (l. ṣuṇḍiyoshiti) वैश्यात्तु पौड्रकश्च (pauṇḍrakaṣ cha) वभूव ह ॥९॥ क्षत्रात्करणककन्यायां (l. karaṇa°) राजपुत्रो वभूव ह । राजपुत्र्यां तु करणादागरीति प्रकीर्त्तितः ॥१०॥ क्षत्रवीर्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः । कलौ तीवरसंसर्गाद्धीवरः पतितो भुवि ॥११॥ तीवर्यां धीवरात्पुत्रो वभूव रजकः स्मृतः । रजक्यां तीवराच्चैव कापालीति वभूव ह ॥१२॥ नापितात् गोपकन्यायां सर्वस्त्रितस्य योषिति । क्षत्राद्बभूव व्याधश्च वलवान्मृगहिंसकः ॥१३॥ तीवरात् शुंडिकन्यायां वभूवुः सप्त पुत्रकाः । ते कलौ हदिसंसर्गाद्बभूवुर्दस्यवः सदा ॥१४॥ व्राह्मण्यामृषिवीर्येण ऋतोः प्रथमवासरे । कुत्सितश्चोदरे जातः कूदरस्तेन कीर्त्तितः ॥१५॥ तदशौचं विप्रतुल्यं पतितो ऋतुदोषतः । सद्यः कोटकसंसर्गादधमो जगतीतले ॥१६॥ क्षत्रवीर्येण वैश्यायामृतोः प्रथमवासरे । जातः पुत्रो महान् दस्युर्वलवांश्च धनुर्द्धरः ॥१७॥ चकार वागतीतं व (cha) क्षत्रियो चारितस्त्वया (? váritas tayá) । तेन जातः स पुत्रश्च वागतीतः प्रकीर्त्तितः ॥१८॥ क्षत्रवीर्येण शूद्रायामृतुदोषेण पापतः । वलवंत्यो दुरंताश्च वभूवुर्म्लेच्छजातयः ॥१९॥ अविद्धकर्णा क्रूराश्च निर्भया रणदुर्जयाः । शौचाचारविहीनाश्च दुर्द्धर्षा धर्मवर्जिताः ॥२०॥ म्लेच्छात्कुविंदकन्यायां जोलाजातिर्वभूव ह । जोलात्कुविंदकन्यायां शराकः परिकीर्त्तितः ॥२१॥ वर्णशंकरदोषेण वह्व्यश्च षटजातयः (shaṇḍa°) । तासां नामानि संख्याश्च को वा वक्तुं क्षमो द्विज ॥२२॥ वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति । वैद्यवीर्येण शूद्रायां वभू[वु]र्वहवो जनाः ॥२३॥ ते च ग्राम्यगुणज्ञाश्च यंत्रौषधपरायणाः (mantrau°) । तेभ्यश्च जाताः शूद्रायां ये व्यालग्राहिणो भुवि ॥२४॥ De cognationis et affinitatis gradibus. 11 (fol. 27^a). Bráhmaṇarum (vipra) praeconium, a Sole factum. 12. Nárada (Upabarhaṇa) Gandharvorum regis filius nascitur. 13. Upabarhaṇa mortuo Málávatis uxoris planctus. Ejus minis territi, dei omnes in terram (kauṣikítíre) descendunt. 14. Málávatis cum Bráhmaṇa (i. e. Kṛishṇa) coram deis colloquium. Kṛishṇae cultus omnium praestantissimus. 15. Málávatis cum Yama mortisque dea (mṛityukanyá) colloquium. 16. De morborum causis, generibus, remediis. Creator, quum quatuor Vedas revelasset, quintum, medicinae codicem (áyurveda) addidit, eumque Bháskarae tradidit, isque artem medicam cum discipulis communicavit: तेषां नामानि विदुषां तत्राणि (tan°) तत्कृतानि च ॥१०॥ व्याधिप्राणांशवीजानि साध्वि (l. vyádhipraṇáṣavíjáni sádhvi) मत्तो निशामय । धान्वंतरिर्दिवोदासः (l. Dhanv°) काशीराजो [ऽ]श्विनीसुतौ ॥११॥ नकुलः सहदेवो[ऽ]र्कश्च्यवनो जनको वुधाः । जावालो जाजलिः पैलः करथो [ऽ]गस्त्य एव च ॥१२॥ एते वेदांगविज्ञाश्च षोडश व्याधिनाशनाः । चिकित्साचतत्वज्ञानं नाम तंत्रं मनोरमं ॥१३॥ धन्वंतरिश्च भगवान्श्चकार प्रथमे सति । चिकित्सादर्पणं नाम दिवोदासश्चकार सः ॥१४॥ चिकित्साकौमुदी (°dím) दिव्यां काशीराजश्चकार सः । चिकित्सापरतंत्रं च भ्रमघ्नं चाश्विनीसुतौ ॥१५॥ तंत्रै (l. tantram) वैद्यकसर्वस्वं नकुलश्च चकार सः । चकार सहदेवश्च व्याधिसंघविमर्द्दनं ॥१६॥ ज्ञानार्णवं महातंत्रं यमराजश्चकार सः । च्यवनो जीवदानं च चकार भगवान् सुधीः ॥१७॥ चकार जनको यागी (l. yogí) वैद्यसंदेहभंजनं । सर्वसारतमं होता जावालस्तंत्रराजकं ॥१८॥ खेदांगसारं तंत्रं च चकार जाजलिर्मुनिः । पैलो निदानं करथस्तंत्रं सर्वधरं वरं ॥१९॥ द्वैधं निर्माय तंत्रं च चकार कुंभसंभवः । चिकित्साशास्त्रवीजानि तंत्राण्येतानि षोड[श] ॥२०॥ 17. Bráhmaṇae (Kṛishṇae) cum deis de Kṛishṇa colloquium. 18. Upabarhaṇae vitae elementa a ceteris deis restituuntur, animus vero Kṛishṇae demum jussu revertitur. 19. Preces mysticae Mahápurushapávana kavacha, Ṣankarakavacha, Stavarája appellatae. 20. Upabarhaṇa mortuus metempsychosi Kalávatís, quae Drumilae pastoris uxor fuit, filius, Nárada appellatus, Málávatí vero Ṣṛinjayae regis filia nascitur. 21 (fol. 51^a). Náradas a puero Kṛishṇam colit, a deoque pristinam conditionem recuperat. 22. Brahmaṇis filiorum enumeratio. 23. De mulierum vitiis. 24. De uxoris fidae virtutibus. 25. Náradas a Ṣiva preces ad Vishṇum colendum idoneas obtinet. 26. Diurna Bráhmaṇae officia (áhnika). Inter alia, quae majorem partem cum legum codicibus antiquioribus congruunt, Ṣálagrámae (ammonitae) cultus commendatur. सर्वेषु शमा (? ṣastá) पूजा च शालग्रामे च नारद । सुराणामेव सर्वेषां यत्राधिष्टानमेव च ॥७२॥ स स्नातः सर्वतीर्थेषु सर्वसज्ञेषु (°yajneshu) दीक्षितः ॥ शालग्रामोदकेनैव योऽभिषेकं समाचरेत् ॥८०॥ शालग्रामजलं भक्त्या नित्यमश्नाति यो नरः । जीवन्मुक्तः स च भवेद्यात्यंते विष्णुमंदिरं ॥८१॥ शालग्रामशिलाचक्रं यत्र तिष्टति नारद । स चक्रो भगवांस्तत्र सर्वतीर्थानि निश्चितं ॥८२॥ Kṛishṇae cultus. 27. De cibo diebus quibusdam vitando. 28. De summo numine (brahman) et natura (prakṛiti). De Kṛishṇa in Goloka sedente. 29. Nárada in eremum Náráyaṇae proficiscitur. 30. Kṛishṇae laudes.

II. *Prakṛitikhaṇḍa*. Foll. 69–245. Incipit: नारद उवाच ॥ गणेशजननी दुर्गा राधा लक्ष्मी सरस्वती । सावित्री च सृष्टिविधौ प्रकृतिः पंचधा स्मृता ॥१॥ आविर्वभूव सा केन सा वा का ज्ञानिनां वर । कि (kim) वा तल्लक्षणं सा कं (l. cha) वभूव पंचधा कथं ॥२॥ सर्वसा (sarvásám cod. Mill.) चरितं पूजा विधानं गुणमीशितं (°psitam) । अवतारं कुत्र कस्यास्तन्मां व्याख्यातुमर्हसि ॥३॥ नारायण उवाच ॥ प्रकृतेर्लक्षणं वत्स को वा वक्तुं क्षमो भवेत् । किंचित्तथापि वक्ष्यामि यत् श्रुतं धर्मवक्रतः (°vaktratas) ॥४॥ प्रकृष्टवाचकः पश्च कृतिश्च सृष्टिवाचकः । सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता ॥५॥ गुणे प्रकृष्टे सत्वे च प्रशब्दो वर्त्तते श्रुतौ । मध्यमे रजसि कृश्च

तिशब्दस्तमसि स्मृतः ॥६॥ त्रिगुणात्मास्वरूपा (trigunátmasvarúpá) या सर्वशक्तिसमन्विता । प्रधान (pradháná) सृष्टिकरणे प्रकृतिस्तेन कथ्यते ॥७॥ प्रथमे वर्त्तते प्रश्च कृत्तिश्च (kritiṣ cha) सृष्टिवाचकः। सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता ॥८॥ योगेनात्मा सृष्टिविधौ द्विधारूपो वभूव सः । पुमांश्च दक्षिणार्द्धंगो वामार्द्धा प्रकृतिः स्मृताः (पुमांश्च दक्षिणार्द्धांगात् वामार्द्धात् प्रकृतिः स्मृता cod. Mill.) ॥९॥ सा च ब्रह्मस्वरूपा च माया नित्या सनातनी । यथात्मा च तथा शक्तिर्यथाग्नौ (°gnau) दाहिका स्थिता ॥१०॥ अत एव हि योगींद्रः स्त्रीपुभेदं (strípumbhedam. cod. Mill.) न मन्यते । सर्वं ब्रह्ममयं ब्रह्मन् शश्वत्पश्यति नारद ॥११॥ स्वेच्छामयस्येच्छया च श्रीकृष्णस्य सिसृक्षया । साविर्वभूव सहसा मूलप्रकृतिरीश्वरी ॥१२॥ तदाज्ञाया (tadájnayá) पंचविधा सृष्टिकर्मविभेदतः । अथ भक्तानुरोधाद्वा भक्तानुग्रहा (bhaktánugrahavigrahá cod. Mill.) ॥१३॥ गणेशमाता दुर्गा या शिवरूपा शिवप्रिया। नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ॥१४॥ ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तुता । सर्वाधिष्टातृदेवी सा सर्वरूपा सनातनी ॥१५॥ धर्मसत्यपुण्यकीर्त्तियशोमंगलदायिनी। सुखमोक्षस्वर्गदात्री शोकार्त्तिदुर्गनाशिनी ॥१६॥ शरणागतदीनार्त्तपरित्राणपरायणी (°ṇá) । तेज[:]स्वरूपी (°rúpá) परमा तदधिष्टातृदेवता ॥१७॥ सर्वशक्तिस्वरूपा च शक्तिरीशस्य संततं । सिद्धेश्वरी सिद्धिरूपा सिद्धिदासिद्धिदेश्वरी ॥१८॥ वुद्धिनिद्रा (l. buddhir nidrá) क्षुत् पिपासा छाया तंद्रा दया स्मृतिः । जातिः क्षातिश्च (kshántiṣ cha ?) शांतिश्च कांतिर्भ्रांतिश्च चेतना ॥१९॥ तुष्टिः पुष्टिस्तथा लक्ष्मीर्वृतिर्माता (dhritir mátá ?) तथैव च । सर्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनुः (°naḥ) ॥२०॥ etc. Haec pars a Náráyaṇa cum Nárada communicatur. Capita sunt sexaginta quatuor. 1. Prakṛitis descriptio. Ejus quinque manifestationes (Durgá, Lakshmí, Sarasvatí, Sávitrí, Rádhá[1]). E prakṛitis partibus (ansa), particulis (kalá), particularum particulis (kalánṣánṣa) aliae deae, virtutes et vitia, sanctorum et heroum uxores, feminae nascuntur. Atque primum e majoribus ejus partibus (pradhánánṣa) prodeunt: Gangá, Tulasí, Manasá (Kaṣyapátmajá, Nágeṣvarasyánantasya bhaginí, Jaratkárumuneḥ patní, Ástíkasya muner mátá), Shashṭhí[2], Mangalachaṇḍí (sive Mangalachaṇḍiká)[3], Kálí (durgálaláṭasambhútá raṇe Ṣumbhaniṣumbhayoḥ), Vasundhará. Deinde e Prakṛitis particulis (kalá) oriuntur: Sváhá (Vahnipatní), Dakshiṇá, Svadhá, Svastideví (Váyupatní), Pushṭi (Gaṇapatipatní), Tushṭi (Anantapatní), Sampatti (Íṣánapatní), Dhṛiti (Kapilapatní), Kshamá (Yamapatní), Mukti (Satyapatní) etc. Denique e particularum particulis (kalánṣánṣasambhútás) mulieres fiunt. 2. Dei a Kṛishṇa creantur. Lakshmis, Rádhae, Rádhae sociarum, Durgae, Mahádevae ortus. 3. Viráj, Rádhae filius, Kṛishṇae pars sedecima. Ejus progenies. 4. Sarasvatí dea quibus ritibus (माघस्य शुक्लपंचम्यां विद्यारंभे दिनेऽपि च), et precibus colenda est[4]. Ejus laudes a Yájnavalkya factae[5]. 5. Sarasvatí Gangae imprecatione in flumen mutatur. Gangá etiam in terram descendere, et Lakshmí Tulasis plantae formam sumere cogitur. 6. Quae quum imprecatione solutae in coelum revertentur, aetas ferrea terram invadet. Eo tempore Kalki nascetur et barbaros terram occupantes occidet[6]: विप्रस्य विष्णुयशसः पुत्र[:] कल्किर्भविष्यति । नारायणकालांशश्च भगवान्वलिनां वरः ॥५७॥ दीर्घेण करवालेन दीर्घो घोटकवाहनः । म्लेछशून्यां च पृथिवीं त्रिरात्रेण करिष्यति ॥५८॥ Quo facto aetas aurea revertetur. 7. Terra ex illuvie, quae in corpore Virájis in aqua stántis adhaerebat, orta est[7]. Ea Vishnuis apri formam gerentis uxor est (váráhí). Preces, quibus colenda est. Agrorum largitio commendatur; eorum, qui alienos fundos, agros, possessiones occupant, poenae describuntur. Praeterea alia facinora quaedam cum terra conjuncta memorantur[8]. Terrae nomina. 8. De Ganga narratio. Saga-

---

1 अवतारे च वाराहे वृषभाणुसुता (वृकभान° cod. Mill. Occurrit alibi gen. Vṛishabhánasya) च या ॥

2 प्रधानांशस्वरूपा या देवसेना च नारद ॥८०॥ मातृकासु पूज्यतमा सा च षष्टी प्रकीर्त्तिता ॥८१॥ शिशूनां प्रति विश्वेषु प्रतिपालनकारिणी। तपस्विनी विष्णु भक्ता कार्त्तिकेयस्य कामिनी ॥८२॥ षष्टांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता। पुत्रपौत्रप्रदात्री च धात्री त्रिजगतां सती ॥८३॥ सुंदरी युवती रम्या संततं भर्त्तुरंतिके। स्थने (sthánе) शिशूना परमा वृद्धरूपा च योगिनी ॥८४॥ पूजा द्वादशमासेषु यस्या विश्वेषु संततं । पूजा च सूतिकागारे पुरा (pará cod. Mill.) षष्टदिने शिशोः ॥८५॥ एकविंशतिमे चैव पूजा कल्याणहेतुकी । मनन्वन्नियमिता (ṣaṣvan niyamitá cod. Mill.) चैषा नित्या काम्याप्यतः परा ॥८६॥ मातृरूपा दयारूपा शश्वद्रक्षणकारिणी । जले स्थले चांतरिक्षे शिशूनां स्वप्नगोचरे ॥८७॥ Cf. caput XL.

3 प्रधानांशस्वरूपा च देवी मंगलचंडिका। प्रकृतेर्मुखसंभूता सर्वमंगलदा सदा ॥८८॥ सृष्टौ मंगलरूपा च संहारे कोपरूपिणी। तेन मंगलचंडी सा पंडितैः परिकीर्त्तिता ॥८९॥ प्रति मंगलवारेषु प्रति विश्वेषु वंदिता। पंचोपचारैर्भक्ता च योषिद्भिः परिपूजिता ॥९०॥ पुत्रपौत्रधनैश्वर्ययशोमंगलदायिनी। शोकसंतापपापार्त्तीदुःखदारिद्रनाशिनी ॥९१॥ परितुष्टा सर्ववांछाप्रदात्री सर्वयोषितां। रुष्टा क्षणेन संहर्त्तुं शंक्ता (ṣaktá) विश्वं महेश्वरी ॥९२॥ Cf. caput XLI.

4 Praeter alios multos Ṣákáṭáyana, Páṇini, Kátyáyana eo hymno ante Náradae tempora usi esse dicuntur.

5 सनत्कुमारो ब्रह्माणं ज्ञानं पप्रछ यत्र वै । वभूव जडवत्सोऽपि सिद्धांतं कर्तुमक्षमः ॥११३॥ स च तुष्टाव त्वां ब्रह्मा चाज्ञया परमात्मनः। चकार त्वत्प्रसादेन तदा सिद्धांतमुत्तमं ॥११५॥

6 Cf. Wilson, Vishnupurána p. 484.

7 Improbantur enim, qui e Madhuis et Kaiṭabhae gigantum medulla ortam esse putant.

8 अंवुवाच्यां भूखननं यः करोति च मानवः । स याति कृमिनां घोरां (kṛimidanṣam cha. cod. Mill.) स्थितिस्तत्र चतुर्युगं ॥७७॥

ridarum fata. Fructus e lavatione in Ganga facta percipiendus. Meditatio (Kauthumoktam dhyánam) et hymnus, quibus Gangá colenda est. Mystica Gangae origo. 9. Rádhá quum amoris invidia Gangae undarum ebibendarum consilium cepisset, dea a Kṛishṇa protegitur. Vishṇupadí nominis origo. 10. Gangae cum Kṛishṇa connubium. 11 (fol. 107^{b}) Tulasis fata. Vṛishadhvaja rex, omnium deorum praeter Ṣivam contemtor, Solis imprecatione regno privatur. 12. Kuṣadhvajae, Vṛishadhvajae nepoti, a Málávatí uxore filia, Vedavatí appellata, paritur. Ea Kṛishṇa piis operibus conciliato in vita postera Sítá, Rámae uxor, postea Draupadí renascitur, denique Lakshmís forma cum Kṛishṇa conjungitur. Rerum a Ráma gestarum adumbratio. 13. Dharmadhvajae, Kuṣadhvajae fratri, Tulasí filia nascitur. Quae austera devotione, ut in vita postera Kṛishṇae uxor fieret, obtinuit. 14. Ejus cum Ṣankhachúḍa[1] Gandharva connubium. 15. Dei, Ṣankhachúdae potestate territi, a Kṛishṇa impetrant, ut a Ṣiva interficeretur. 16. Ṣankhachúḍa Ṣivam convenit, sed regno se abdicare recusat[2]. 17. Pugnae descriptio. 18. Ṣankhachúḍa a Ṣiva Kṛishṇae pilo[3] occiditur. 19. Tulasís plantae, e Tulasís deae capillis ortae, sanctitas. Ṣálagráma lapides, in Gaṇḍakí fluminis ripa reperti, Kṛishṇae natura imbuti ideoque sacri sunt. In iis lapidibus varii circuli (chakra) mystici reperiuntur[4]. 20. Tulasís laudes. Nomina ejus octo: Vṛindá, Vṛindávaní, Viṣvapújitá, Viṣvapávaní, Pushpasárá, Nandiní, Tulasí, Kṛishṇajívaní. 21 (fol. 134^{a}). Narratio de Sávitrí. Sávitris cultus a Paráṣara Aṣvapati, Madrorum regi, progeniem desideranti, traditus. 22–31. Yamae cum Sávitrí colloquium. Narratio de Sávitrí, Satyavatis uxore, eam tantum ob causam ab auctore relata, ut, qui bonorum, quive malorum operum fructus essent, demonstraret. 22–25. Operum piorum, maxime vero largitionum, praemia. 26. Yamae laudes (yamáshṭakam). Tartari ejusque abyssorum (kuṇḍa) descriptio. 27. Quibus facinoribus in quas abyssos homines incidant, refertur. Peccata, quae Bráhmaṇae vel bovis caedi paria sunt. 28. De formis, quas scelesti in vita postera sumere coguntur, de Tartari locisque, in quos praecipitantur. 29. Kṛishṇae cultum unam salutis viam esse. 30. Iterata abyssorum (kuṇḍa) descriptio. 31 (fol. 162^{a}). Kṛishṇae virtutum laudatio. 32–36. Narratio de Lakshmí. 32. Lakshmis origo. 33. Durvásasis imprecatione Indra regno privatur. Durvásas de devotione (bhakti), rerum mundanarum renunciatione (sannyása), vitae humanae cursu disserit. 34. Indra a Vṛihaspati auxilium petit. Largitionum praemia. 35. Kṛishṇa deos, quos fortuna (Lakshmí) deserat, et quibuscum maneat, docet. Lakshmí e mari mulgendo prolata, Indrae regnum restituitur. 36. Meditatio et preces, quibus Lakshmí colenda est. (Mahálakshmístotram.) 37. Narratio de Sváhá (प्रकृतेः कलया चैव शर्वशक्तिस्वरूपिणी (sarva° cod. Mill.) । बभूव दाहिका शक्तिरग्रे (l. agneḥ) स्वाहा स्वकामिनी ॥ १६ ॥). Váráha aevo Sváhá Kṛishṇae uxor fuit, Nágnajití appellata. Sváhae preces. 38. Narratio de Svadhá, manium uxore. Ejus cultus (शरत्कृष्णत्रयोदश्यां मघायां श्राद्धवासरे). 39. De Dakshiṇá, sacrificii uxore. 40. Narratio de Shashṭhí. Dea Priyavratae regis filium, quem Máliní mater mortuum ediderat, in vitam revocat. Ejus cultus. 41 (fol. 188^{b}). De Mangalachaṇḍí dea. दक्षायां वर्त्तते चंडी कल्याणेषु च मंगलं । मंगलेषु च या दक्षा सा च मंगलचंडिका ॥ ३ ॥ पूज्यायां वर्त्तते चंडी मंगलो पि महीसुतः । मंगलाभीष्टदेवी या सा वा मंगलचंडिका ॥ ४ ॥ मंगलो मनुवंशश्च सप्तद्वीपधरापतिः । तस्य पूज्याभीष्टदेवी तेन मंगलचंडिका ॥ ५ ॥ मूर्त्तिभेदेन सा दुर्गा मूलप्रकृतिरीश्वरी च । कृपारूपातिप्रत्यक्षा योषितामिष्टदेवता ॥ ६ ॥ Quo tempore Ṣiva cum Tripura pugnavit, Durgá novam hanc vigoris bellici (yuddhaṣakti) formam induit. 42. Narratio de Manasá. कन्या सा च भगवती कश्यपस्य (Kaṣyapasya) च मानसी । तेनेयं मनसा देवी मनसा या च दीव्यति ॥ २ ॥ मनसा ध्यायते या वा परमात्मानमीश्वरं । तेन सा मनसा देवी योगेन तेन दीव्यति ॥ ३ ॥ Ejus nomina duodecim haec: Jaratkáru, Jagadgaurí, Manasá, Siddhayoginí, Vaishṇaví, Nágabhaginí, Ṣaiví, Nágeṣvarí, Jaratkárupriyá, Ástíkamátṛi, Vishaharí, Mahájnánayutá. 43. Manasae cum Jaratkáru connubium. Ástíka, eorum filius, in sacrificio, a Janmejaya ad necandas serpentes instituto, Takshakam et Indram ab interitu servat. Manasae colendae ritus. 44. Surabhís, vaccae divinae, origo. 45–53. De Rádhá narratio. 45. Ṣiva Durgae Rádhae ortum narrat: पुरा वृंदावने रम्ये गोलोके रासमंडले । शतशृंगैकदेशे च मल्लिकामालतीवने ॥ २५ ॥ रत्नसिंहासने रम्ये तस्थौ तत्र जगत्पतिः । स्वेच्छामयश्च भगवान् बभूव रमणोत्सुकः ॥ २६ ॥ रमणं कर्तुमिच्छंश्च तद्बभूव सुरेश्वरी । इच्छया च भवेत्सर्वं तस्य स्वेच्छामयस्य

[1] सुदामा नाम गोपश्च श्रीकृष्णांगसमुद्भवः। तदंशश्चातितेजस्वी ललाभ जन्म भारते ॥ सांप्रतं राधिकाशापात् दनुवंशसमुद्भवः । शंखचूड इति ख्यातस्त्रैलोक्ये न च तत्समः ॥ Cap. XIII, 30. 31.

[2] In hoc capite *bháṇḍára*, recentis originis vocabulum, e bháṇḍágára factum, bis occurrit: भांडाराणां सहस्रं च 7. भांडारवाहनादिकं 9. Pugna prope Pushpabhadrám flumen fuit (पश्चिमोदधिपूर्वे च मलयस्य च पश्चिमे ॥ १७ ॥ श्रीशैलोत्तरभागे च गंधमादनदक्षिणे । – – – शरावतीमिश्रिता च निर्गता सा हिमालयात् ॥ २० ॥ गोमंतं वामतः कृत्वा प्रविष्टा पश्चिमोदधौ ।). Capitis quinti decimi distichis 2. et 27. collatis, Pushpabhadrám Chandrabhágae synonymon esse conjicias, sed in lib. III, 28, 26. ab ea discernitur.

[3] Inde Ṣiva Ṣúlapáṇi appellatur.

[4] Hi circuli a vermibus quibusdam, Vajrakíṭa et Vajradanshṭra appellatis, fieri dicuntur.

च ॥२७॥ एतस्मिन्नंतरे दुर्गे द्विधारूपो बभूव सः। दक्षिणांगश्च श्रीकृष्णो वामाङ्गांगा च राधिका ॥२८॥ Reliqui dei a Krishṇa et Rádhá descendunt. 46. Narratio dc Virajá nympha, quae Rádhae iram timens in flumen mutatur. Sudáman, Krishṇae comes, Rádhae imprecatione Ṣankhachúḍae Asurae, Tulasís conjugis, formam induit. Rádhá ipsa Vrishabhánae vaiṣyae, Kalávatí matre, filiae nascitur. Ea Ráyánae pastori despondetur, sed in nuptiis in Umbram evanescit, et postea Krishṇae nubit: अतीते द्वादशाब्दे तु दृष्ट्वा तां नवयौवनां। सार्द्धं रायानवैश्येन तत्संबंधं चकार सः ॥३९॥ छायां सम्प्राप्य (sansthápya cod. Mill.) तद्गेहे सांतर्द्धानं चकार ह। बभूव तस्य वैश्यस्य विवाहस्छायया (viváhaṣ chháyayá) सह ॥४०॥ गते चतुर्दशाब्दे तु कंसभीतस्थलेन च। जगाम गोकुलं कृष्णः शिशुरूपि (°rúpí) जगत्पतिः ॥४१॥ कृष्णमाता यशोदा या रायानस्तत्सहोदरः। गोलोकगोपं कृष्णांशं संबंधात् कृष्णमातुलः ॥४२॥ कृष्णेन सार्द्धं राधायाः पुण्ये वृंदावने वने। विवाहं कारयामास विधिना जगतां विधिः ॥४३॥ स्वप्ने राधापदांभोजं न हि पश्यंति वल्लवाः। स्वयं राधा हरेः क्रोडे छाया रायनमंदिरे ॥४४॥[1] Krishṇae juvenilis facinora. 47. Utkala, Dhruvae filius, propter pietatem Suyajna appellatus, quum Sutapasem Bráhmaṇam hospitem parum honorifice excepisset, regnum amittit. 48. Viri sancti regem poenas eorum edocent, qui mulierem, vaccam sive Bráhmaṇam occidunt (strìghna, goghna, brahmaghna) aut bona opera sceleribus obliterant (kritaghna)[2]. 49. De incestus poenis. 50, 51. Sutapasis de Krishṇae majestate, temporum computatione, quatuordecim Manu, aliis rebus cum Suyajna colloquium. Suyajna, devotione a peccato solutus, a Rádhá in Golokam vehitur. 52 (fol. 214[b]). Preces, quibus Rádhá (kárttikípúrṇimáyám) colenda est. 53. Rádhákavacham. 54–64. Narratio de Durgá. 54. Sedecim deae nomina, a Kauthuma tradita: Durgá, Náráyaṇí, Íṣáná, Vishṇumáyá, Ṣivá, Satí, Nityá, Satyá, Bhagavatí, Sarváṇí[3], Sarvamangalá, Ambiká, Vaishṇaví, Gaurí, Párvatí, Sanátaní. Harum appellationum origo. 55. Chandrae et Tárae amores. 56. Vrihaspatis erepta uxore luctus. 57. Vrihaspatis primum ab Indra, deinde a Ṣiva auxilium petit. 58. Brahman Ṣukrae, ad quem Chandra confugerat, persuadet, ut et hunc et Tárám sibi tradcret. Budha, Chandrae et Tárae filius, Chaitram, Chaitra Adhiratham, Adhiratha Suratham gignit. 59. Suratha a Nandi regno privatus silvam adit, ibique cum Drumila (Samádhi) Vaiṣya amicitiam contrahit. A Medhasa anachoreta Durgae cultum edocentur[4]. 60 (fol. 237[a]). De Krishṇae veneratione. 61, 62. De Durgae cultu[5]. 63. Durgástotram. 64. Durgákavacham.

III. *Gaṇeṣakhaṇḍa.* Foll. 246–342. Incipit: श्रीनारद उवाच ॥ श्रुतं प्रकृतिखंडं तदमृतार्णवमुत्तमं। सर्वोत्कृष्टमीशितं (ípsitam) च मूढानां ज्ञानवर्द्धनं ॥१॥ अधुना श्रोतुमिच्छामि गणेशखंडमीश्वर। तज्जन्मचरितं नृणां सर्वमंगलमंगलं ॥२॥ कथं जज्ञे सुरश्रेष्टः पार्वत्या उदरे शुभे। देवी केन प्रकारेण ललाभ तादृशं सुतं ॥३॥ स चांशः कस्य देवस्य कथं जन्म ललाभ सः। अयोनिसंभवः किं वा किं वासौ [यो]निसंभवः ॥४॥ किं वा तद्ब्रह्म तेजो वा कियानेव पराक्रमः। का तपस्या च किं ज्ञानं किं वा तन्निर्मलं यशः ॥५॥ कथं तस्य पुरः पूजा विश्वेषु निखिलेषु च। स्थिते नारायणे शंभौ जगदीशे च ब्रह्मणि ॥६॥ पुराणेषु निगूढं च तज्जन्मपरिकीर्त्तनं। कथं वा गजवक्त्रो [ऽ]यमेकदंतो महोदरः ॥७॥ एतत्सर्वं समाचक्ष्व श्रोतुं कौतूहलं मम। सुविस्तीर्णं महाभाग तदतीव मनोहरं ॥८॥ etc.

Capita sunt 46. 1. Párvatis cum Ṣiva connubium. Skandae origo. 2. Párvatí filium desiderat. 3. Puṇyakavratae, ad filios obtinendos efficacissimi, praeconium a Ṣiva factum. 4. Ea ccrimonia decimo tertio Mághae mensis clarilunii die incipienda est. Dona, quae Krishṇae offerenda sunt. 5. Hoc ritu peracto, Ṣatarúpá, Manuis uxor, Priyavratam et Uttánapádam filios nacta est. 6. Párvatis ad ritum peragendum apparatus. 7. Párvatí, quamvis invita, Ṣivam ipsum Sanatkumárae sacrifici donat (dakshiṇá). Eadem Krishṇam celebrat. 8. Qui desiderium ejus explet. Gaṇeṣae ortus. 9. Ṣivae et Párvatis filium nactorum exsultatio. 10. Dei variam felicitatem puero precantur (mangaládhyáya). 11 (fol. 269[a]). Etiam Ṣanaiṣchara gratulabundus Párvatim visit,

---

[1] Cf. cap. XLV, 51. स्वयं देवी हरेः क्रोडे छाया रायानकामिनी। स च द्वादशगोपानां रायानः प्रवरः प्रिये॥ Inmaculatam deo nupsisse hoc innuere videtur.

[2] कृतघ्नाः षोडशविधाः सामवेदे निरूपिताः। सर्वं (sarvaḥ cod. Mill.) प्रत्येकदोषेण प्रत्येकं फलमश्नुते ॥३५॥ कृते सत्ये च पुण्ये च स्वधर्मे तपसे (tapasi) व्रते। प्रतिज्ञायां च दाने च स्वगोष्ठीपरिपालने ॥३६॥ गुरुकृत्ये कामकृत्ये देवकृत्ये द्विजार्चने। नित्यकृत्ये च विश्वासे परधर्मप्रधानयोः ॥३७॥ एतान्याहंति पापिष्टः स कृतघ्न इति स्मृतः।

[3] Hoc nomen a *sarva* (cunctus) derivatur.

[4] Márkaṇḍeyapuráṇae haec esse imitatione expressa, vix est cur moneam.

[5] Multa ad doctrinam mysticam (Tántrika) pertinent. Cf. (cap. LXI). ततो [ऽ]ष्ट नायिकां (náyiká) देव्या यत्नतः परिपूजयेत्। उग्रचंडां प्रचंडां च चंडोग्रां चंडनायिकां ॥७९॥ अतिचंडां च चामुंडां (chámuṇḍám) चंडां च चंडवती (°tím) तथा। पद्मे चाष्टदले चैताः प्रागादिक्रमतस्तथा ॥८०॥ पंचोपचरैः (°cháraiḥ) संपूज्य भैरवान्मध्यदेशतः। आदौ महाभैरवं च संहारभैरवं तथा ॥८१॥ असितांगभैरवं च रुरुभैरवमेव च। तत[:] कालभैरवं च क्रोधभैरवमेव च ॥८२॥ ताम्रचूडं चंद्रचूडमंते च भैरवद्वयं। एतान्संपूज्य मध्ये च नव शक्तीश्च पूजयेत् ॥८३॥ तत्र पद्मे चाष्टदले मध्ये च भक्तिपूर्वकं। वैष्णवीं चैव ब्राह्माणीं रौद्रीं माहेश्वरी (°rím) तथा ॥८४॥ नारसिंहीं च वाराहीमिंद्राणीं कार्त्तिकीं तथा। सर्वशक्तिस्वरूपां च प्रधानां सर्वमंगलां ॥८५॥

sed puerum adspicere recusat. 12. Quod quum urgente Durgá fecisset, pueri caput a trunco separatum in Golokam evolat. Vishṇus elephanti caput Gaṇeṣae corpori affigit. Durgae imprecatione Ṣanaischara claudicat. 13. Dona et laudes a deis Gaṇeṣae oblatae. 14. Gaṇeṣakavacham. 15. Narratio de Kárttikeyae ortu. 16. Nandíṣvara ad Kárttikam a Kṛittikis, ejus nutricibus, arcessendum proficiscitur. 17. Kárttika parentes adit. 18. Kárttikae initiatio (abhisheka) deorumque dona. Devasenám Kárttikeya, Pushṭim Gaṇeṣa uxores ducunt. 19. Ṣivae, quum Solem, qui Málinem et Sumálinem laeserat, necavisset, Kaṣyapa, ut ipsius filius caput amitteret, imprecatur. Sol in vitam revocatur. 20. Súryakavacham. 21 (fol. 285[a]). Indra quum Párijátakae ramum, a Durvásase e Goloka allatum, in elephanti capite posuisset, deorum regno privatur. Ejus elephanti caput a Kṛishṇa abscisum in Gaṇeṣae trunco impositum est[1]. 22. Kṛishṇa conciliato Indra imperium recuperat. 23[a]. Lakshmíkavacham. 23[b]. Fortuna quorum domos vitet, refertur. 24, 25. Kártavíryárjunae regis de Kapilá, divinae copiae vacca (kámadhenu), cum Jamadagni certamen[2]. 26. Rex ab anachoreta bis vincitur. 27. Redintegrata pugna, Jamadagni a rege occiditur. Reṇukae uxoris lamenta et Rámae filii adventus. 28. De viduis concremandis et de sepeliendi ritibus obiter disseritur. Parṣuráma, delendorum Kshatriyarum consilio capto, primum Brahmanem, deinde 29. Ṣivam adit. Ṣivae coeli descriptio. 30. Ṣiva eum et precibus magicis et armis instruit. 31 (fol. 304[a]). Trailokyavijayam kavacham. 32. Preces, hymnus, ritus, quibus Kṛishṇa colendus est. 33. Ráma et auspiciis et somnio felicissimum eventum portendentibus ad expeditionem se accingit. 34. Kártavírya Manoramae uxori somnium infaustum refert, 35. eaque moerore moritur. Rex pessimis ominibus cum sociis ad pugnam proficiscitur, in qua Matsya rája primus occiditur. Cui preces ad conciliandum Ṣivam efficacissimae (Ṣivakavacham) eripiuntur. 36. Pugna continuatur. Ráma Bhadrakálím deam invocat. Suchandra rex, cui cantio mystica fraudulenter eripitur, a Ráma occiditur. 37. Bhadrakálíkavacham. 38, 39. Eodem modo Pushkaráksha, Suchandrae filius, et Padmáksha, ejusdem nepos, postquam Mahálakshmíkavacham et Durgákavacham amiserunt, denique 40. Kártavírya ipse, amisso Kṛishṇakavacha, occiditur. 41 (fol. 329[a]). Ráma in Kailáṣam ad Ṣivam colendum proficiscitur. 42, 43. Gaṇeṣae, quum Rámae aditum ad Ṣivam dormientem praeclusisset, pugna exorta dens eliditur. Unde Ekadantae nomen accepit. 44. Párvatí quum Rámam exsecratura esset, Kṛishṇa interveniente conciliatur. Gaṇeṣae nominum octo explicatio. 45. Durgae praeconium. 46. Tulasís flos in Gaṇeṣae cultu non adhibetur, propterea quod Tulasí olim levitate deum a meditatione averterat.

Vol. II. Foll. 399. IV. *Kṛishṇakhaṇḍa.* Incipit: नारद उवाच ॥ श्रुतं प्रथमतो ब्रह्मन् ब्रह्मखंडं मनोहरं। ब्रह्मणो वदनांभोजात्परमाद्भुतमेव च ॥१॥ ततस्तद्वचनं तूर्णं समागत्य तवांतिकं। श्रुतं प्रकृतिखंडं च सुधाखंडात्परं परं ॥२॥ ततो गणपतेः खंडमखंडं भवखंडनं। न मे तृप्तं मनो लोलं विशिष्टं श्रोतुमिच्छति ॥३॥ श्रीकृष्णजन्मखंडं च जन्मादिखंडनं नृणां। प्रदीपं सर्वतत्वानां कर्मघ्नं हरिभक्तिदं ॥४॥ सद्यो वैराग्यजननं भवराच(°roga)निकृंतनं। कारणं मुक्तिवीजानां भवाब्धितारणं परं ॥५॥ कर्मोपभोगरोगाणां खंडनं च रसायणं। श्रीकृष्णचरणांभोजप्राप्तिसोपानकारणं ॥६॥ जीवनं वैष्णवानां च जगतां कारणं परं। वद विस्तार्य मां भक्तं शिढपं (l. ṣishyam) च शरणागतं ॥७॥ केन वा प्रार्थितः कृष्ण आजगाम महीतले। सर्वांशैरेकत्रवेशः स परिपूर्णतमः स्वयं ॥८॥ युगे कुत्र कुतो हेतोः कुत्र चाविर्बभूव ह। वसुदेवोऽस्य जनकः को वा का वा च देवकी ॥९॥ वद कस्य कुले जन्म मायया सुविडंवनं। किं चकार समागत्य केन रूपेण वा हरिः ॥१०॥ जगाम गोकुलं कंसभयेन सूतिकागृहात्। कथं कंसात्कीटतुल्यात् भयेशस्य भयं मुने ॥११॥ हरिर्वा गोपवेठोण (°veshena) गोकुले किं चकार ह। कुत्र गोपांगनासार्द्धं विजहार जगत्पतिः ॥१२॥ का वा गोपांगणा (°ganáḥ) के वा गोपाला वालरूपिणः। का वा यशोदा को नंदः किं वा पुण्यं चकार ह ॥१३॥ कथं राधा पुण्यवती देवी गोलोकवासिनी। व्रजे वा व्रजकन्या सा वभूव प्रेयसी हरेः ॥१४॥ कथं गोप्यो दुराराध्यं संप्रापुरीश्वरं परं। कथं ताश्च परित्यज्य [ज]गाम मथुरां पुनः ॥१५॥ भारावतरणं कृत्वा [किं] विधाय जगाम सः। कथ[य]स्व महाभाग पुण्यश्रवणकीर्तनं ॥१६॥ etc. Capita sunt 132, quibus tituli hi subscripti sunt: 1. Vishṇuvaishṇavayor guṇapraṣansáprastávas. 2. Virajánandaprastávas. 3. Saptasamudrajanmarádháṣrídámodbhavas. 4. Golokavarṇanam. 5. Golokavarṇane Ṣríkṛishṇastotrapaṭhanam. 6, 7. s. t. 8. Janmáshṭamívratopavásanirúpaṇaprastávas. 9. Nandaputrotsavas. 10. Pútanámokshaṇaprastávas. 11 (fol. 44[a]). Tṛiṇávartavadhas. 12. Ṣakaṭabhangakavachanyása. 13. Ṣríkṛishṇánnapráṣanam. 14. Vṛikshárjunabhanjanam. 15. Rádhákṛishṇaviváhe navasangamaprastávas. 16. Vakakeṣipralambavadhavṛindávanagamanaprastávas. 17. s. t. 18. Vṛindávananagaravarṇanacharitaprastávas. 19. Viprapatnínám mokshaṇaprastávas. 20. Kálíyadamanadávágnimokshaṇaprastávas. 21 (fol. 92[b]). Govatsaválakaharaṇaprastávas. 22. Indrayágabhanjane Nandastotraprastávas. 23. Dhenukavadhas. 24. Tilottamávaliputrayor Brahmaṣápaprastávas. 25. Tálabhakshaṇaprasange Valiputramokshaṇaprastávas. 26. Munimokshaṇaprastávas. 27. Ekádaṣívratanirúpaṇaprastávas. 28. Gopívastraharaṇaprastávas. 29. Rásakríḍáprastávas. 30. Munimokshaprastávas. 31 (fol. 140[b]). Rádhápraṣnas. 32. Rádhápraṣne Mohinístotraprasangas. 33. R.

[1] Jam supra haec narrata sunt. Lib. II, 33. III, 12.

[2] Auctor notissimum Rámáyaṇae episodium imitatus est.

Brahmamohinísamváde Ṣríkṛishṇastotraprasangas. 34. Mohiníṣápabrahmadarpabhangaprastávas. 35. Jáhnavíjanmaprastávas. 36. Rádhákṛishṇasamváde Brahmaṇaḥ prasangas. 37. Ṣankaraprasangas. 38. Haranirmályaṣápaprasangas. 39–42. s. t. 43 (fol. 179^{a}). Satídehatyágas. 44. Ṣankaravirahaṣokápanodanam. 45. Párvatísampradánam. 46. Párvatíparameṣvarayor viváhas. 47. Sarvamangalavarṇanam. 48. s. t. 49. Vahnidarpabhangas. 50. Durvásodarpabhangas. 52 (fol. 202^{a})[1]. Dhanvantaridarpabhanga-Manasávijaya. 53. Rádhámádhavayo rásavarṇanam. 54. Rásakríḍávarṇanam. 55, 56. Ṣríkṛishṇaprabhávakathanam. 57. Bhagavadguṇavarṇane Lakshmístotraprakathanam. 57^{b}. Lakshmívairágyamochanam. 58. s. t. 59. Mahendradarpabhangaprakathanam. Ṣachíṣokápanodanam. Ṣachíkṛitagurustavakathanam. 60. Mahendradarpabhangaprakaraṇe Ṣakramokshakathanam. 61 (fol. 222^{b}). s. t. 62. Ṣrírámacharitam. 63. Kansaduḥsvapnakathanam. 64. Kansayajnaprakathanam. 65. Akrúraharshotkathanam. 66. Rádháṣokápanodanam. 67. Ádhyátmikayogaprakathanam. 68. Rádháṣokavimochanam. 69. Ṣríkṛishṇágamanam. 70. Gopívishayas. 71 (fol. 243^{a}). Yátrámangalam. 72. Kansahananavasudevadevakímokshaṇam. 73. Nandádiṣokapramochanam. 74–79. Bhagavannandasamvádas. 80. Bh. Táráharaṇam. 81 (fol. 266^{a}). Bh. Tárápaharaṇam. 82–90. Bh. 91 (fol. 300^{b}). s. t. 92. Rádhástotram. 93–95. Rádhoddhavasamvádas. 96. R. kálanirúpaṇam. 97, 98. s. t. 99. Bhagavadupanayane Gaṇeṣábhishekas. 100, 101. Bhagavadupanayanam. 101^{b} (fol. 325^{a}). Munipatnístotram. 102. Dvárakárambhe nirmáṇe. 103. Dvárakápraveṣas. 104–106. Rukmiṇyudváhas. 107. Rukmiṇísvayamvaras. 108. Rukmiṇyudváhas. 109, 110. Rádháyaṣodásamvádas. 111 (fol. 346^{b}). Munikṛishṇasamvádas. 112. Gaṇeṣapújá. 113. Váṇayuddhe Ushániruddhasangamas. 114. V. Váṇániruddhasamvádas. 115. Skandániruddhayuddham. 116. V. Ṣivalambodarasamvádas. 117. V. Haragaurísamvádas. 118. V. Valikṛitam Kṛishṇastotram. 119. V. 120. Ṣṛigálavásudevamokshaṇam. 121 (fol. 370^{a}). Maṇiharaṇam. 132. Rádhákṛishṇalambodarapújanam. 123. Siddháṣrame tírthayátráprasange Gaṇeṣapújanam. Brahmaṣeshádikṛitam Rádhikástotram. 124. SiddháṣramatírthayátráprasangeVasudevajnánálambhanam. 125. Ṣrírádhákṛishṇasamvádas. 126. Vṛindávanamahotsave Yaṣodánandajananam. 127. Ṣrírádhágolokagamanam. 128. Golokárohaṇam. 129. Náradaprakaraṇam. 130 (fol. 392^{b}). Vahnisuvarṇotpattis. 131. Index. 132. Puráṇarum enumeratio. Brahmavaivartapuráṇae praeconium.

[1] Numerus 51. scribae incuria praetermissus est.

De codicibus Parisiensibus cf. Hamilton Catal. p. 36 sqq., de Berolinensibus Weber Catal. p. 132.

Hi codices hujus seculi initio exarati sunt. (Wilson 98, 99.)

67, 68.

Unum opus in voluminibus duobus compactum. Lit. Devan. Charta Ind. Long. 11. Lat. 5. Linn. 10.

Insunt in his codicibus *Brahmavaivartapuráṇae* libri tres primi.

Vol. I. Foll. 211. Foll. 1–79. Capita 30. *Brahmakhaṇḍa*. Foll. 80–211. *Prakṛitikhaṇḍae* capita 34.

Vol. II. Foll. 206. Foll. 1–87. *Prakṛitikhaṇḍae* capita 35–63. Foll. 88–206. Gaṇeṣakhaṇḍa. Capita 46.

Hi codices intra annos 1770–1780 negligenter exarati sunt. (Walker 163, 164.)

69.

Lit. Bengal. Charta Ind. Foll. 169. Long. 15. Lat. 4. Linn. plerumque 10.

Brahmavaivartapuránae pars altera, *Prakṛitikhaṇḍa*. Cap. 11. incipit in fol. 39^{a}, cap. 21. fol. 64^{b}, cap. 31. fol. 90^{b}, cap. 41. fol. 116^{a}, cap. 51. fol. 142^{a}, cap. 61. fol. 163^{a}. Codex superiore seculo satis accurate exaratus est. Textus recensio a cod. Wils. non differt. Sexaginta tria tantum capita numerantur. Capita enim 63. et 64. codicis Wils. in unum comprehensa sunt. (Mill 18.)

70.

Hujus voluminis folia 148–259. *Káṣímáhátmyam* (Káṣis urbis majestas) continent, qui liber ad tertiam Brahmavaivartapuraṇae partem pertinere dicitur. Incipit: भवानीतनयाद्याद्यतनयानंददायक काशिवासिजनाद्यौघहारिन् ढुंढे नमोस्तु ते ॥१॥ जयति जयति काशी काशितज्ञानराशी: (°ráṣiḥ) शिवहरिहरधातृश्रीगणेशांबिकानां । निवसतिरियमाद्या तां भजध्वं भजध्वं स्मरत नमत शुद्धां शुद्धये कीर्त्तयध्वं ॥ ऋषय ऊचुः ॥ युगानि युगमानं च (युगमानं च) युगधर्माः सनातनैः युगेषु लोकचरितं श्रुतमस्माभिरादितः ॥३॥ पुनः कलियुगस्यास्य स्वरूपं वर्णयादितः कलिना धर्म[ा]मित्रेण वंचिता अवि (l. api) सज्जनाः ॥४॥ etc.

Capita sunt 26, quibus Káṣis urbis ejusque sacellorum sanctitas celebratur. Insertae sunt narratiunculae quaedam, quibus miracula in ea urbe facta illustrantur. Capp. 1–5. Gurubhakti. Dípaka, quum Vedadharmae, Pailae filio, magistro praecipuam et obedientiam et venerationem praestitisset, sanctitatem summam obtinet. Cap. 6. Mokshopáyás. Cap. 7. Miraculum quoddam

refertur, quod Dharmapathae mercatori evenit, quum in usum publicum lacum Váráṇasiae fodisset. Capp. 8–11. vide infra. Cap. 12. Principes nisi largitionibus peccata luere non posse, Mahátejasis kshatriyae exemplo probatur. Cap. 13. De urbis lingis. Civitas novem locos salis fecundos, novem silvas, novem montes habere, et vicis septem constare traditur. 14. Urbis laudes. 15. Dvijajetri bráhmaṇa, qui in Rákshasam mutatus erat, urbis sanctitate divinam formam nanciscitur. 16. Yátrávidhánam. 17. De Káṣis nomine. Káṣí deae forma coram Ṣiva de hominum vitiis conqueritur etc. etc.

In fine libri haec subscripta sunt: इति श्रीब्रह्मवैवर्त्ते तृतीयविभागे रहस्ये काशीमाहात्म्ये षट्विंशो ध्यायः ॥

Codex post annum 1820 exaratus est. (Wilson 245[c].)

71.

In hoc volumine quatuor opuscula insunt. Lit. Devan. Charta Ind. Foll. 110. Long. foll. 1–45. 12, reliquorum 12½. Lat. foll. 1–22. 4½. reliquorum 5.

Foll. 1–22. Linn. 7. 8. *Panchakroṣamáhátmya*, quatuor capitibus constans, e Káṣíkhaṇḍa desumtum (capp. 8–11). Incipit: श्रीदेव्युवाच ॥ देवदेव महादेव भक्तानामभयप्रद । काशीवासः सुगहनः पापिनां धनलो(भ)भिनाम् ॥१॥ विषयाश(sa)क्तमनसां न सुखाय कदाचन । सुखाय सर्वलोकानां प्रवृत्तिः प्रथिता कलौ ॥२॥ विषयैः परिपुष्टानां जीवनं नान्यथा भवेत् । प्रायश्चित्तान्तरं देव वदस्व यदि मन्यसे ॥३॥ प्रायश्चित्तविहीनस्य यातना जायते ध्रुवम् । बिभेमि दीनान् मनुजान् दृष्ट्वा शास्त्रपराङ्मुखान् ॥४॥ तानप्युद्धर देवेश शठान्स्वेछापरिग्रहान् ॥ श्रीमहादेव उवाच ॥ साधु पृष्टं त्वया देवि क्षेत्रपापकृतां नृणां । निस्तार स्याद्यथा मंक्षु प्राय[श्चि]त्तेन येन हि ॥५॥ प्रायश्चित्तविहीनानां यात्त (l. yátaná) वहुदुःखदा । तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत् ॥६॥ जैगीषव्यो मुनिश्रेष्टस्तपस्वी मत्परायणः । तेन पृष्टो ह्यमागत्य शिष्यार्थं तद्दयालुना ॥७॥ etc. Ṣiva, a Jaigíshavya interrogatus, scelerum in Káṣi ipsa commissorum hoc unum esse piaculum ait, ut sacella circum urbem sita circumirentur[1], ibique dei (maxime vero lingae variae formae) colerentur. Qui cultus quam efficax sit, Maṇḍapae, Kushmáṇḍae bráhmaṇae filii, obiterque Viṣálákshís, Ṣáṇḍilyae filiae, exemplo probatur. In capite tertio dei colendi enumerantur, in quarto ritus observandi describuntur.

Haec voluminis pars anno 1813 exarata est. (Mill 42[a].)

[1] Cap. I. ज्ञानस्वरूपा काशीयं पंचक्रोशपरमिता (l. parimitá) ॥६५॥ तस्याः प्रदक्षिणां कृत्वा दशजन्मकृरादधात् (kṛitád aghát) । मुक्तो भवति पापात्मा etc.

72.

Lit. Devan. Charta Ind. Foll. 148. Long. 12. Lat. 6. Linn. 11.

Adhyátmarámáyaṇa (Rámáyaṇam spirituale) *Brahmáṇḍapuráṇae* (uttarakhaṇḍa) pars, a Brahmane cum Nárada ita communicata, ut olim a Ṣivae Párvati deae tradita erat. Libro Rámae res gestae narrantur, ita tamen ut non homini, sed numini summo, sive potius Vishnui (Ráma enim ipsissimus a numine summo differre negatur) tribuantur, qui ea forma indutus in terram descendisse fertur, ut Rávaṇam gigantem, deos terrentem, occideret. Sítá vero naturae prototypon sive Lakshmí dea esse dicitur. Praecedit prooemii loco caput unum, quod in hoc codice (A.), et in B. alterius Puráṇae partis sexagesimum primum esse dicitur[2]. Incipit: सूत उवाच ॥ कदाचिन्नारदो योगी परानुग्रहवांछया । पर्यटन्सकलांल्लोकान् सत्यलोकमुपागतः ॥२॥ तत्र दृष्ट्वा मूर्तिमद्भिश्छंदोभिः परिवेष्टितम् । वालार्कप्रभया सम्यग्भासयंतं सभागृहम् ॥३॥ मार्कंडेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः । सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितं ॥४॥ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदम् । प्रणम्य दंडवद्भक्त्या तुष्टाव मुनिपुंगवः ॥५॥ प्रसन्नस्तु मुनिं प्राह स्वयंभूर्वैष्णवोत्तमम् । किं प्रष्टुकामस्त्वमसि तद्वदिष्यामि ते मुने ॥६॥ etc. Liber ipse ab his versibus incipit, e quibus et argumentum et auctoris propositum facile cognosces: यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः । निःशंकं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां निधाय जगतां तं जानकीशं भजे ॥१॥ विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिम् । आनंदसान्द्रममलं निजवोधरूपं सीतापतिं विदिततत्वमहं नमामि ॥२॥ पठंति ये नित्यमनन्यचेतसा शृण्वंति चाध्यात्मिकसंज्ञितं शुचिं (शुभं B.) । रामायणं सर्वपुराणसंमितं निर्धूतपापा हरिमेव यांति ते ॥३॥ अध्यात्मरामायणमेव नित्यं पठेद्यदिच्छेद्भववंधमुक्तिम् । गवां सहस्रायुतकोटिदानफलं लभेद्यः शृणुयात्स नित्यम् ॥४॥ पुरारिगिरिसंभूता श्रीरामार्णवसंस्थिता । आध्यात्मरामगंगेयं (adhy°) पुनाति भुवनत्रयं ॥५॥ कैलासाग्रे कदाचिद्रविशतविमले सुंदरे रत्नपीठे संविष्टं ध्याननिष्टं त्रिनयनमभयं सेवितं सिद्धसंघैः । देवी वामांकसंस्था गिरिवरतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलमलहरं वाक्यमानंदकंदं ॥६॥ पार्वत्युवाच ॥ नमो स्तु ते देव जगन्निवास सर्वात्मदृक् त्वं परमेश्वरो सि । पृछामि तत्वं पुरुषोत्तमस्य सनातनं त्वं च सनातनो सि ॥७॥ गोप्यं यदत्यंतमनन्यवाच्यं वदंति भक्तेषु महानुभावाः । तदप्यहो हं तव देव भक्ता प्रियो सि मे त्वं वद यत्तु पृष्टं ॥८॥ ज्ञानं सविज्ञानमथानुभूतिवैराग्ययुक्तं[3] च मितं विभास्वत् । जानाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि तरंति येन ॥९॥ पृछामि चान्यच्चपरं[4] रहस्यं तदेव

[2] इति श्रीब्रह्मांडपुराणे उत्तरखंडे द्विशतोत्तरसाहस्र्यां संहितायां भविष्यत्कफलनिर्णयो ध्यात्मरामायणे फलस्तुतिर्नामैकषष्ठितमो ध्यायः ।

[3] °नुभक्ति B. °नुभक्तिं C. [4] चान्यच्च परं B. वान्यच्च परं C.

चाग्रे वद वारिजाक्ष । श्रीरामचंद्रे [ऽ]खिलतत्वसारे भक्तिर्दृढा नौर्भवति प्रसिद्धा ॥१०॥ भक्ति (bhaktiḥ B.) प्रसिद्धा भवमोक्षणाय नान्यततः (°t tataḥ) साधनमस्ति किंचित् । तथापि हृत्संशयवंधनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वं ॥११॥ वदंति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहं । भजंति चाहर्निशमप्रमत्ताः परं पदं यांति तथैव सिद्धाः ॥१२॥ वदंति केचित्परमो पि रामः स्वाविद्यया संवृतमानसस्वं । जानाति नात्मानमतः परेण संवोधितो वेदपरात्मतत्त्वं ॥१३॥ यदि स्म जानाति कुतो विलाप[:] सीताकृते तेन कृतः परेण । जानाति नैवं यदि केन सेव्यो रामो पि सर्वैरिह जीवजातैः ॥१४॥ अत्रोत्तरं किं विदितं भवद्भिस्त्वं ब्रूहि मे संशयभेदवाक्यं[1] । श्रीमहादेव उवाच ॥ धन्यासि भक्तासि परात्मनस्त्वं यत् ज्ञातुमिछा तव रामतत्वं ॥१५॥ पुरा न केनाप्यभिचोदितो हं वक्तुं रहस्यं परमं निगूढं । त्वयाद्य भक्त्या परिचोदितो हं वक्ष्ये नमस्कृत्य रघूत्तमं ते ॥१६॥ रामः परात्मा प्रकृतेरनादिरानंद एकः पुरुषोत्तमो हि । स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदंतर्वहिरास्थितो यः ॥१७॥ सर्वांतरस्थो पि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे । जगंति नित्यं परितो भ्रमंति यत्सन्निधौ चुंवकलोहवद्धि ॥१८॥ एतं न जानंति विमूढचित्ताः स्वाविद्यया संवृतमानसास्ते । स्वाज्ञानमप्यात्मनि शुद्धवुद्धावारोपयंतीह[2] निरस्तमाये ॥१९॥ संसारमेवानुसरंति ते वै पुत्रादिसक्ताः पुरुकर्मयुक्ताः । जानंति नैवं हृदये स्थितं ते चामीकरं कंठगतं यथाज्ञाः ॥२०॥ यथाप्रकाशो न तु विद्यते रवौ ज्योतिःस्वभावे परमेश्वरे तथा । विशुद्धविज्ञानघने रघूत्तमे [ऽ]विद्या कथं स्यात्परतः परात्मनि ॥२१॥ यथा हि चक्ष्णोभ्रमतोर्गृहादिकं (chákshṇor) विनष्टदृष्टेर्भ्रमतीव दृश्यते । तथैव देहेंद्रियकर्तुरात्मनः कृतं परे [ऽ]ध्यस्य जनो विमुह्यति ॥२२॥ नाहो न रात्रिः सवितुर्यथा भवेत्प्रकासरूपाऽव्यभिचारतः[3] क्वचित् । ज्ञानं तथाज्ञानमिदं द्वयं हरौ रामे कथं स्यास्यति शुद्धविग्रहे ॥२३॥ तस्मात्परानंदमये रघूत्तमे विज्ञानरूपे न हि विद्यते तमः । अज्ञानसाक्षिण्यरविन्दलोचने मायाश्रयत्वान्न हि मोहकारणं ॥२४॥ अत्र ते कथयिष्यामि रहस्यमतिदुर्लभं । सीतारामसरुत्सूनुसंवादं मोक्षसाधनं ॥२५॥ पुरा रामायणे रामो रावणं देवकंटकं । हत्वा रणे रणश्लाघ्यं सपुत्रवलवांधवं ॥२६॥ सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः । अयोध्यामगमद्रामो हनूमत्प्रमुखैर्वृतः ॥२७॥ अभिषिक्तः परिवृतो वसिष्ठाद्यैर्महात्मभिः । सिंहासने समासीनः कोटिसूर्य्यसमप्रभः ॥२८॥ दृष्ट्वा तदा हनूमंतं प्रांजलिं पुरतः स्थितम् । कृतकार्यं निराकांक्षं ज्ञानापेक्षं महामतिं ॥२९॥ रामः सीतामुवाचेदं ब्रूहि तत्वं हनूमते । निष्कल्मषो[ऽ]यं ज्ञानस्य पात्रं नौ नित्यभक्तिमान् ॥३०॥ तथेति जानकी प्राह तत्वं रामस्य निश्चितं । हनुमंते (hanumate) प्रपन्नाय सीता लोकविमोहिनी ॥३१॥ सीतोवाच ॥ रामं विद्धि परं ब्रह्म सच्चिदानंदमव्ययम् । सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरं ॥३२॥ आनंदं निर्मलं शांतं निर्विकारं निरंजनम् । सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषं ॥३३॥ मां विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीं । तस्य सन्निधिमात्रेण सृजाम्यतमतंद्रिता (सृजामीदमतंद्रिता B. C.) ॥३४॥ तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यतेऽवुधैः । अयोध्यानगरे जन्म रघुवंशेतिनिर्मले ॥३५॥ विश्वामित्रसहायत्वं मखसंरक्षणं तथा । अहल्याशापशमनं चापभंगो महेशितुः ॥३६॥ मत्पाणिग्रहणं पश्चाद्भार्गवस्य मदक्षयः । अयोध्यानगरे वासो मया द्वादशवार्षिकः ॥३७॥ दंडकारण्यगमनं विराधवध एव च । मायामारीचमरणं मायासीताहृतिस्तथा ॥३८॥ जटायुषो मोक्षलाभः कवंधस्य तथैव च । शवरीपूजनं पश्चात्सुग्रीवेण समागमः ॥३९॥ वालिनश्च वधः पश्चात्सीतान्वेषणमेव च । सेतुवंधश्च जलधौ लंकायाश्चाभिरोधनम् ॥४०॥ रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः । विभीषणे राज्यदानं पुष्पकेन मया सह ॥४१॥ अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनम् । एवमादीनि कर्माणि मयैवाचारितान्यपि ॥४२॥ आरोपयंति रामे स्मिन्निर्विकारे [ऽ]खिलात्मनि ॥४२॥ रामो न गच्छति न तिष्ठति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित् । आनंदमूर्तिरचलः परिनामहीनो मायागुणाननुगतो हि तथा विभाति ॥४३॥ etc. Totum opus in libros septem dividitur, qui Rámáyaṇae librorum titulos gerunt. I. Bálakáṇḍa, capp. 7 (fin. in fol. 17^{a}). II. Ayodhyákáṇḍa, capp. 9 (fol. 41^{b}). III. Áraṇyakáṇḍa, capp. 10 (fol. 59^{b}). IV. Kishkindhákáṇḍa, capp. 9 (fol. 76^{b}). V. Sundarakáṇḍa, capp. 5 (fol. 87^{b}). VI. Yuddhakáṇḍa sive Lankákáṇḍa, capp. 16 (fol. 125^{b}). VII. Uttarakáṇḍa, capp. 9 (foll. 148^{a}).

Duo operis capita sacerrima habentur: primum, cujus partem supra exscripsimus, *Rámahṛidaya* appellatum, quo intima Rámae natura revelatur, et libri septimi caput quintum, *Rámagítá*, quo auctor, philosophiae Vedánticae sectator, summi numinis cognitionem, operibus piis praestantiorem, adumbrat.

जन्मनः । कल्पानां वत्सरं चैव जगतः स्थापनं तथा ॥ शयनं च हरेरत्र पृथिव्युद्धरणं तथा । संनिवेशः पुरादीनां वर्णाश्रमविभागशः ॥ वृक्षाणां गृहसंस्थानां सिद्धीनां च विनाशनं । योजनानां पथं चैव संचरं बहुविस्तरं ॥ स्वर्गे स्थानविभागं च मर्त्यानां शुभचारिणां । वृक्षाणामौषधीनां च वीरुधां च प्रकीर्त्तनं ॥ वृक्षनारकिकीटत्वं मर्त्यानां परिकीर्त्तनं । देवतानामृषीणां च द्वेसृतीपरिकीर्त्तनं ॥ अंत्यादीनां तनूनां च सृजनं त्यजनं तथा । प्रथमं सर्वशास्त्राणां पुराणं ब्रह्मणा स्मृतं ॥ अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः (sritáḥ) । अंगानि धर्मशास्त्रं च व्रतानि नियमास्तथा ॥ पशूनां पुरुषाणां च संभवः परिकीर्त्तितः । तथा निर्वचनं प्रोक्तं कल्पस्य च परिग्रहः ॥ नव सर्गाः पुनः प्रोक्ता ब्रह्मणो बुद्धिपूर्वकाः । त्रयो न्ये [ऽ]बुद्धिपूर्वास्तु ततो लोकानकल्पयत् ॥ ब्रह्मणो वयवेभ्यश्च धर्मादीनां समुद्भवः । ये द्वादश प्रसूयंते प्रजाकल्पे पुनः पुनः ॥ कल्पयोरंतरं (antaram) प्रोक्तं प्रतिसंधिश्च यस्तयोः । तमोमात्रामृतत्वाच्च (तमोमात्रावृतत्वाच्च B.) ब्रह्मणो धर्म्मसंभवः ॥ तथैव शतरूपायास्तयोः पुत्रास्त्वतः परं । प्रियव्रतोत्तानपादौ प्रसूत्याकूतयश्च ताः ॥ कीर्त्यंते धुतपाप्मानो येषु लोकाः प्रतिष्ठिताः । रुचेः प्रजापतेश्चोर्द्ध्वमाकूत्यां मिथुनोद्भवः ॥ प्रसूत्यामपि दक्षस्य कन्यानां प्रभवस्ततः । दीक्षायणीषु (dá°) चाप्यूर्द्ध्वं श्रद्धाद्यासु महात्मनां ॥ धर्म्मस्य कीर्त्यते स्वर्गः सात्विकस्तु सुखोदयः । तथा धर्मस्य हिंसायां तामसो [ऽ]शुभलक्षणः ॥ महेश्वरस्य सत्यां च प्रजासर्गः प्रकीर्त्तितः । निरामयं च ब्रह्माणं तादृशं कीर्त्तनं पुनः ॥ योगं योगनिधिं प्राह द्विजानां मुक्तिकांक्षिणां । अवतारश्च रुद्रस्य महाभाग्यं तथैव च ॥ त्रैवेदिकी कथा चापि संवादः परमो महान् । ब्रह्मनारायणाभ्यां च यत्र स्तोत्रं प्रकीर्त्तितं ॥ स्तुतस्ताभ्यां स देवेशस्तुतोष भगवान् शिवः । प्रादुर्भावो थ रुद्रस्य ब्रह्मणों गे महात्मनः ॥ कीर्त्यंते भाम (कीर्त्यते नाम B.) हेतुश्च यथारोदीन्महामनाः । रुद्रादीनि यथा ह्यष्टौ नामान्याप्नो (l. ápnot) स्वयंभुवः ॥ यथा च तैर्व्याप्तमिदं त्रैलोक्यं सचराचरं । भृग्वादीनामृषीणां च प्रजासर्गोपवर्णनं ॥ वसिष्ठस्य च ब्रह्मर्षेर्यत्र गोत्रानुकीर्त्तनं । अग्नेः प्रजायाः संभूतिः स्वाहाया यत्र कीर्त्तिता ॥ पितृणां द्विःप्रकाराणां स्वधायास्तदनंतरं । पितृवंशप्रसंगे च (prasangena B.) कीर्त्यते च महेश्वरात् ॥ दक्षस्य शापः सत्यर्थे भृग्वादीनां च धीमतां । प्रतिशापश्च रुद्रस्य दक्षादद्भुतकर्म्मणः ॥ प्रतिषे[ध]श्च वैरस्य कीर्त्यते दोषदर्शनात् । मन्वंतरप्रसंगेन कालज्ञानं च कीर्त्यते ॥ प्रजापतेः कर्द्दमस्य कन्या या शुभलक्षणा । प्रियव्रतस्य पुत्राणां कीर्त्यते यत्र विस्तरः ॥ तेषां नियोगो द्वीपेषु देशेषु च पृथक्पृथक् । स्वायंभुवस्य सर्गस्य ततश्चाप्यनुकीर्त्तनं ॥ उक्तो नाभेर्निसर्गश्च (nábher) रजसश्च महात्मनः । द्वीपाना ससमुद्राणां पर्वतानां च कीर्त्तनं ॥ वर्षाणां च नदीनां च तद्भेदानां च सर्वशः । द्वीपभेदसहस्राणामंतभेदश्च (antar°) सप्तसु ॥ विस्तरान्मंडलाच्चैव जंबूद्वीपसमुद्रयोः । प्रमाणं योजनायेण (°greṇa) कीर्त्यते पर्वतैः सह ॥ हिमवान्हेमकूटस्तु निषधो मेरुपर्वतः । नीलः श्वेतश्च शृंगी (ṣringí) च कीर्त्यंते वर्षपर्वताः ॥ तेषामंतरविष्कंभा उच्छ्रायायामविस्तराः । कीर्त्यंते योजनाग्रेण ये च तत्र निवासिनः ॥ भारतादीनि वर्षाणि नदीभिः पर्वतैस्तथा । भूतैश्चोपनिविष्टानि गतिमद्भिर्ध्रुवैस्तथा ॥ जंबूद्वीपादयो द्वीपाः समुद्रैः सप्तभिर्वृताः । ततश्चाप्यमया भूमिर्लोकालोकश्च कीर्त्यते ॥ अंडस्यांतस्त्विमे लोकाः सप्तद्वीपा च मेदिनी । भूरादयश्च कीर्त्यंते चरणैः प्राकृतैः सह ॥ सर्वं च तत्प्रधानस्य परिमाणैकदेशिकं । संव्यासपरिमाण्यच्च (सव्यांसपरिमाण्यं च B.) संक्षेपेणैव कीर्त्यते ॥ सूर्याचंद्रमसोश्चैव पृथिव्याश्चाप्यशेषतः । प्रमाणं योजनाग्रेण सांप्रतैरभिमानिभिः ॥ महेंद्राद्याः सभाः पुण्या मानसोत्तरमूर्द्धनि । अत ऊर्ध्वं गतिश्चोक्ता स्वर्गस्यालातचक्रवत् ॥ नागवीथ(thy)जवीथ्योश्च लक्षणं परिकीर्त्यते । काष्ठयोर्लेखयोश्चैव मंडलानां च योजनैः ॥ लोकालोकस्य संध्याया अह्नो विषुवतस्तथा । लोकपालाः स्थितास्योर्द्ध्वं (स्थिताश्चोर्ध्वं B.) कीर्त्यंते ये चतुर्द्दिशं ॥ पितृणा देवतानां च पंथावौ (panthánau) दक्षिणोत्तरौ । गृहिणां न्यासिनां चोक्तौ रजःसत्वसमाश्रयात् ॥ कीर्त्यते च पदं विष्णोःधर्म्माद्या यत्र धिष्ठिताः । सूर्याचंद्रमसोचारो ग्रहानां ज्योतिषां तथा ॥ कीर्त्यते ध्रुवसामर्थ्यात्प्र(घा)जानां च शुभाशुभं । ब्रह्मणा निर्मितः सौरः स्यंदनो र्थवशात्स्वय ॥ कीर्त्यते भगवान्येन प्रसर्प्पति दिविक्षयः । स रथो धिष्ठितो देवैरादित्यैरृषिभिस्तथा ॥ गंध[र्वै]रप्सरोभिश्च ग्रामणीसर्पराक्षसैः । अपांसारमयस्येंदोः कीर्त्यते च रथस्तथा ॥ वृद्धिक्षयौ च सोमस्य कीर्त्यंते सूर्यकारितौ । सूर्यादीनां स्यंदनानां ध्रुवादेव प्रकीर्त्तनं ॥ कीर्त्यते शिशुमारश्च यस्य पुछे ध्रुवः स्थितः । तारारूपाणि सर्वाणि नक्षत्राणि ग्रहैस्सह ॥ निवासा यत्र कीर्त्यंते देवानां पुण्यकारिणां । सूर्यरश्मिसहस्रे च वर्षशीतोष्णनिश्रवः ॥ प्रविभागश्च रश्मीनां नामतः कर्मतो र्थतः । परिमाणगती चोक्ते ग्रहाणां सूर्यसंश्रयात् ॥ यथा चाशु विषात्प्राप्ता शंभोः कंठस्य नीलता । ब्रह्मप्रसादितस्याशु विषादः शूलपाणिना (विषादं शूलपाणिनः B.) ॥ स्तूयमानः सुरैर्विष्णु स्तौति देवं महेश्वरं । लिंगोद्भवकथां पुण्यां सर्वपापप्रणाशिनीं ॥ विश्वरूपात्प्रधानस्य परिणामो यमद्भुतः । पुरूवरस्य (purúravasa) एलस्य (माहलस्य) माहात्म्यानुप्रकीर्त्तनं ॥ पितृणां द्विप्रकाराणां तर्पणं चामृतस्य वै । ततः पर्वाणि कीर्त्यते पर्वणां चैव संधयः ॥ स्वर्गलोकगतानां च प्राप्तानां चाप्यध्वोगतिं (°dhogatim) । पितृणां द्विप्रकाराणां श्राद्धेनानुग्रहो महान् ॥ युगसंख्या प्रमाणं च कीर्त्यते च कृतं युगं । त्रेतायुगे चापकर्षाद्वार्त्तायासं प्रवर्त्तनं ॥ वर्णानामाश्रमाणां च संख्यानां च प्रवर्त्तनं । वर्णानामाश्रमाणां च संस्थितं धर्मतस्तथा ॥ यज्ञप्रवर्त्तनं चैव संवादो यत्र कीर्त्यते । ऋषीणां वसुना सार्द्धं वसोश्चाधः पुनर्गतिः ॥ प्रश्नानां (praṣnánám) दुर्वचस्त्वं च स्वायंभुवमृते मनुं । प्रशंसा तपसश्चोक्ता युगावस्थाश्च कृत्स्नशः ॥ द्वापरस्य कलेश्चात्र संक्षेपेन प्रार्त्तनं (संक्षेपेण प्रकीर्तनं B.) । देवतिर्यङ्मनुष्याणां पुराणानि युगे युगे ॥ कीर्त्यंते युगसामर्थ्यात्परिणाहोछ्र्यायुषाः । शिष्टादीना च निर्द्देशः प्रादुर्भावश्च कीर्त्यते ॥ मंत्राणां ब्राह्मणानां च लक्षणं परिकीर्त्तितं । ईश्वराणामृषीणां च मनोः पितृगणस्य च ॥ गोत्राणा लक्षणाभां (°nám) च वर्षाणानां (varṇánám) च प्रकीर्त्तनं । शाखानां (ṣákhánám) परिमाणं च वेदव्यासादिशब्दनं ॥ मन्वंतराणां संहारं संहारांते च संभवः । देवतानामृषीणां च मनोः पितृगणस्य च ॥ न शक्यं विस्तराद्वक्तुमित्युक्तं च समासतः । मन्वंतरस्य संख्या च मानुषेण प्रकीर्त्तिता ॥ मन्वंतराणां सर्वेषामेतदेव च लक्षणं । अतीतानागतानां च वर्त्यमानेन (varta°) कीर्त्यते ॥ तथा मन्वंतराणां च प्रतिसंधानलक्षणं । अतीतानागतानां च प्रोक्तं स्वायंभुवें तरे ॥ मन्वंतरं त्रयं चैव कालज्ञानं च कीर्त्यते । मन्वं-

तरेषु देवानां प्रजेशानां च कीर्त्तनं ॥ दक्षस्य चापि दौहित्राः प्रियायाः दुहितुः सुताः । ब्रह्मादिभिस्ते जनिता दक्षेणैव च धीमता ॥ सावर्ण्याद्याश्च कीर्त्त्यंते मनवो मेरुमाश्रिताः । ध्रुवस्योत्तानपादस्य प्रजासर्गोपवर्णनं ॥ पृथुना चापि वैन्येन भूमेर्दोहप्रवर्त्तनं । पात्राणां पयसां चैव वंशानां च विशेषणं ॥ ब्रह्मादिभिः पूर्वमेव दुग्धा चेयं वसुंधरा । दशभ्यस्तु प्रचेतोभ्यो मार्षायां च (मारिषायां B.) प्रजापतेः ॥ दक्षस्य कीर्त्त्यते जन्म सोमस्यांशेन धीमतः । भूतभव्यंभवेसत्वं (भूतं भव्यं भविष्यं च B., sed rectius भूतभव्यभवेशत्वं legitur) महेंद्राणां च कीर्त्त्यते ॥ मन्वादिका भविष्यंति आख्यानैर्बहुभिर्वृताः । वैवस्वंतस्य च मनोः कीर्त्त्यते सर्गविस्तरः ॥ देवस्य महतो यज्ञे वारुणीं विभ्रतस्तनुं । ब्रह्मशुक्रात्समुत्पत्तिर्भृग्वादीनां च कीर्त्त्यते ॥ विनिर्वृत्ते प्रजासर्गे चाक्षुषस्य मनोः शुभे । दक्षस्य कीर्त्त्यते सर्गो ध्यानाद्वैवस्वतं तरे ॥ नारदः प्रियसंवादो दक्षपुत्रान्महावलात् । नाशयामास शापाय आत्मनो ब्रह्मणः सुतः ॥ ततो दक्षो सृजत्कन्या वीरिण्यामेव विश्रुता । कीर्त्त्यते धर्मसर्गश्च कश्यपश्य च धीमतः ॥ अत ऊर्द्ध्वं ब्रह्मणश्च विष्णोश्चैव भवस्य च । एकत्वं च पृथक्तं (prithaktvam) च विशेषत्वं च कीर्त्त्यते ॥ इशित्वाच्च तथा सप्ताजया देवः (ईशित्वाद्यद्यथाशक्राजयादेवाः B.) स्वयंभुवा । मरुत्प्रसादो मरुतां दित्या देवाश्च संभवाः ॥ कीर्त्त्यंते मरुतां चाथ गणास्ते सप्तस[प्त]काः । देवत्वं पितृवाक्येन वायुस्कंधेन चाश्रयः ॥ दैत्यानां दानवानां च गंधर्वोरगराक्षसां । सर्वभूतपिशाचानां पशूनां पक्षिवीरुधां ॥ उत्पत्तयश्चाप्सरसां कीर्त्त्यंते वहुविस्तराः । समुद्रसंयोगकृतं जन्मैरावतहस्तिनः ॥ वैनतेय(:)समुत्पत्तिस्तथा चास्याभिषेचनं । भृगूणां विस्तरश्चोक्तस्तथा चांगिरसामपि ॥ कश्यपस्य पुलस्त्यस्य तथैवात्रेर्म्महात्मनः । पराशरस्य च मुनेः प्रजानां यत्र विस्तरः ॥ देवतानामृषीणां च प्रजोत्पत्ति(:)स्ततः परं । तिस्रः कन्याः प्रकीर्त्त्यंते यासु लोकाः प्रतिष्ठिताः ॥ पितृदौहित्रनिर्द्देशो देवानां जन्म चोच्यते । विस्तरं ते भगवतः पंचानां सुमहात्मनां ॥ इलाया विस्तरस्योक्त (°रश्चोक्त) आदित्यस्य ततः परं । विकुक्षिचरितं चोक्तं धुंधोश्चैव निवर्हणं ॥ वृहद्वलांतसंक्षेपादिक्ष्वाक्वाद्याः प्रकीर्त्तिताः । निम्यादीनां क्षितीशानां यावज्जह्नुगणादिति ॥ कीर्त्त्यते विस्तरो यश्च ययातेरपि भूपतेः । यदुवंशसमुद्देशो हैहयस्य च विस्तरः ॥ क्रोष्टोरनंतरं चोक्तस्तथा वंशस्य विस्तरः । जामदग्न्यस्य च माहात्म्यं प्रजासर्गश्च कीर्त्त्यते ॥ देवावृधस्य त्वर्कस्य वृष्णेश्चैव महात्मनः । अत्रिमित्रान्वयश्चैव विष्णोर्द्दिव्याभिशंसनं ॥ विवस्वतो य संप्राप्तिमणिरत्नस्य धीमतः । युधाजितः प्रजासर्गः कीर्त्त्यते च महात्मनः ॥ कंसस्य चापि दौरात्म्य(m)एकांते स्यात्समुद्भवः । वासुदेवस्य देवक्यां विष्णोर्जन्म प्रजापतेः ॥ विष्णोरनंतरं चापि प्राजासर्गोपवर्णनं । देवासुरे समुत्पन्ने विष्णुना स्त्रीवधे कृते ॥ संरक्षता शक्रवध्वं शापः प्राप्तः पुरो भृगोः । भृगुश्चोत्थापयामास दिव्यां शुक्रस्य मातरं ॥ देवानामसुराणां च संग्रामा द्वादशाद्भुताः । नारसिंहप्रभृतयः कीर्त्त्यंते प्राणनाशनाः ॥ शुक्रेणाराधनं स्थाणोर्घोरेण तपसा कृतं । वरदानप्रलुब्धेन यत्र शार्वस्तवः कृतः ॥ अनंतरं विनिर्द्दिष्टं देवासुरविचेष्टितं । जयंत्या सह सक्ते तु यत्र शुक्रे महात्मनि ॥ असुरान्मोहयामास शुक्ररूपेण वुद्धिमान् । वृहस्पतिसुतान् शुक्रः शशाप सुमहाद्युतिः ॥ उक्तं च विष्णुमाहात्म्यं विष्णोर्जन्मादिशब्दनं । तुर्वसुः शुक्रदौहित्रो देवयान्या यदोरभूत् ॥ अनुर्द्रुह्युस्तथा (druhyus tathá) पूरुर्ययातितनया नृपाः । अत्र वंश्या महात्मानः तेषां पार्थिवसत्तमाः ॥ कीर्त्त्यंते यत्र कार्त्स्न्येन भूरिद्रविणतेजसः । कुशिजस्य च विप्रर्षेः सम्यग्वो (samyag yo) धर्म्मसंश्रयाः ॥ वार्हस्पत्यं तु सुरभियत्र शापमिहानुदत् । कीर्त्तनं जह्नुवंशस्य शंतनोवीर्यशब्दनं ॥ भविष्यतां तथा राज्ञामुपसंहारशब्दनं । अनागतानां सप्तानां मुनीनां चोपवर्णनं ॥ भौमस्यांते कुलियुगे (kali°) क्षीणे संहारवर्णनं । परार्द्धपरयोश्चैव लक्षणं परिकीर्त्त्यते ॥ ब्रह्मणो योजनाग्रेण परिमाणविनिर्णयः । नैमित्तिक प्राकृतिकस्तथैवात्यंतिकः स्मृतः ॥ त्रिविधः सर्वभूतानां कीर्त्त्यते परिसंचरः । अनावृष्टिर्भास्कराच्च घोरः संवर्त्तको नलः ॥ मोघो ह्येकार्ण[वो] वायुस्तथा रात्रिर्महात्मनः । संख्यालक्षणमुद्दिष्टं ततो ब्राह्म्यं विशेषतः ॥ भूरादीनां च लोकानां सप्तानामुपवर्णनं । कीर्त्त्यंते चात्र निरयाः पापानां (pápinám B.) रौरवादयः ॥ ब्रह्मलोकपरिष्टात्तु (ब्रह्मलोकोपरिष्टात्तु) शिवस्य स्थानमुत्तमं । यत्र संहारमायांति सर्वभूतानि संक्षये ॥ सर्वेषां चैव सत्वानां परिणामविनिर्णयः । ब्रह्मणः प्रतिसंसर्गे सर्वसंहारवर्णनं ॥ अष्टरूप्यमतः प्रोक्तं प्राणस्याष्टकमेव च । गतिश्चोर्द्ध्वमधश्चोक्ता धर्माधर्मसमाश्रयात् ॥ कल्पे कल्पे च भूतानां महतामपि संक्षयः । प्रसंख्याय च दुःखानि ब्रह्मणश्चाप्यनित्यता ॥ दौरात्म्यं चैव भोगानां परिणामविनिर्णयः । दुर्लभत्वं च मोक्षस्य वैराग्याद्दोषदर्शनं ॥ व्यक्ताव्यक्तं परित्यज्य सार्वं ब्रह्मणि संस्थितं । नानात्वदर्शनाच्छुद्धं ततस्तदतिवर्त्तते ॥ ततस्तापत्रयातीतो निरूपाख्यो निरंजनः । आनंदो ब्रह्मणः प्रोक्तो न विभेति कुतश्चन ॥ कीर्त्त्यते च पुनः सर्गो ब्रह्मणोन्यस्य पूर्ववत् । कीर्त्त्यते ऋषितंशश्च (°vansaṣ cha) सर्वपापप्रणाशनः ॥ इति कृत्यसमुद्देशः पुराणस्योपवर्णितः । कीर्त्त्यंते जगतो ह्यत्र सर्वप्रलयविक्रियाः ॥ प्रवृत्तयश्च भूतानां निवृत्तीनां प्रलानि (phaláni) च । प्रादुर्भावो वसिष्टस्य शक्तेर्जन्म तथैव च ॥ सौदासान्निग्रहस्तस्य विश्वामित्रकृतेन च । पराशरस्य चोत्पत्तिरदृश्यत्या यथा विभोः ॥ यज्ञे (जज्ञे) पितॄणां कन्यायां व्यासश्चापि यथा मुनिः । शुक्रस्य च जथा (यथा B.) जन्म सहपुत्रस्य धीमतः ॥ पराशरस्य प्रद्वेषो विश्वामित्रकृतो यथा । वसिष्ठसंभृतश्चाग्निर्विश्वामित्रजिघांसया ॥ संतानहेतोर्विभुना चीर्णः स्कंधेन धीमता । दैवेन विधिना विप्रा विश्वामित्रहितैषिणा ॥ एकं वेदं चतुष्पादं चतुर्द्धा पुनरीश्वरः । यथा विभेद भगवान् व्यासः शार्वादनुग्रहात् ॥ तस्य शिष्यप्रशिष्यैश्च शाखाभेदाः पुनः कृताः । प्रयोगैः षट्कुलीयैश्च यथा पृष्टः स्वयंभुवा ॥ पृष्टेन चानुशास्तास्ते मुनयो धर्मकांक्षिणः । देशं पुण्यमभीप्संतो विभुना तद्धितैषिणा ॥ सुनाभ्यं दिव्यरूपाख्यं सत्यांगं शुभविक्रमं । अनौपम्यमिदं चक्रं वर्त्तमानमतंद्रिताः ॥ पृष्टतो (prishṭhato) यात नियतास्ततः प्राप्स्यथ यद्धितं । गछतो धर्मचक्रस्य यत्र नेमिर्विशीर्यते ॥ पुण्यः स देशो मंतव्य इत्युवाच तदा प्रभुः । उक्ता (uktvá) चैवमृषीन्ब्रह्मा ह्यदृश्यत्वमगात्पुनः ॥ गंगागर्भसमाहारं नैमिषेयत्वमेव च । ईजिरे चैव सत्रेण मुनये (munayo) नैमिषे तदा ॥ मृते शरद्वति तथा तस्य चोत्थापनं कृतं । ऋषयो नैमिषेयास्तु श्रद्धया परया पुनः ॥ निःसोमांगामिमां (निःसी° B.) कृत्वा कृत्स्नराजनमाहरत् । यथाविधि यथाशास्त्रं तमातिथ्यैरपूजयत् ॥ प्रीतं चैव कृतातिथ्यं राजानं विधिवत्तदा । अंतर्द्धानगतः क्रूरः स्वर्भानुरसुरो हरत् ॥ अनुशस्तुर्हितं (अनुसस्तुर्हतं B.) चापि नृपमैडं यथा पुरा । गंधर्वा (गंधर्व्या)

सहितं दृष्ट्वा कलापग्रामवासिनं ॥ संनिपातः पुनस्तस्य यथा यज्ञे (जज्ञे) महर्षिभिः । दृष्ट्वा हिरण्मयं सर्व्वं एडः संस्थापितस्तु तैः (दृष्ट्वा हिरण्मयं सर्वं यज्ञे वस्तु महात्मनां । तदा वै नैमिषेयाणां सत्र द्वादशवार्षिके । यथा विवादमानस्तु ऐडः संस्थापितस्तु तैः B.) ॥ जनयित्वा त्वरण्यांते ऐडपुत्रं यथायुषं । समापयित्वा तत्सत्रमायुषं पर्युपासते ॥ एतत्सर्वं यथावृत्तं व्याख्यातं द्विजसत्तमाः । ऋषीणां परमं चात्र लोकतत्वमनुत्तमं ॥ ब्रह्मणा यत्पुरा प्रोक्तं पुराणं ज्ञानमुत्तमं । अवतारश्च रुद्रस्य द्विजानुसंग्रहकारणात् ॥ तथा पाशपता(:) योगा[:] स्थानानां चैव कीर्त्तनं । लिंगोद्भवस्य देवस्य नीलकंठत्वमेव च ॥ कथ्यते यत्र विप्राणां वायुना ब्रह्मवादिना । धन्यं यशस्यमायुष्यं सर्वपापप्रणाशनं ॥ कीर्त्तनं श्रवणं चास्य धारणं च विशेषतः । अनेन हि क्रमेणेदं पुराणं संप्रचक्षते ॥ सुखमर्थः समासेन महानप्युपलभ्यते । तस्मात्संक्षेपमुद्दिश्य पश्चाद्वक्ष्यामि विस्तरं ॥ पादमात्रमिदं सम्यक् येनाधीतं जितेंद्रियाः । तेनाधीतं पुराणं तत्सर्वं नास्त्यत्र संशयः ॥ यो विद्याच्चतुरो वेदान्सांगोपनिषदो द्विजः । न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥ इतिहासपुराणाभ्यां वेदं समुपवृंहयेत् । विभेत्यल्पश्रुताद्वेदो मामयं प्रह(त)रिष्यति ॥ अभ्यसन्निममध्यायं साक्षात्प्रोक्तं स्वयंभुवा । आपदं प्राप्य मुच्येत ययेष्टां प्राप्नुयाद्गतिं ॥ यस्मात्पुरा ह्यनंतीदं पुराणं तेन तात्स्मृतं । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ नारायणः सर्वमिदं विश्वं वाप्य (vyápya) प्रवर्त्तते । तस्यापि जगतः स्रष्टुः स्रष्टा देवो महेश्वरः ॥ अत(:)श्च संक्षेपमिमं शृणुध्वं महेश्वर(ा): सर्वमिदं पुराणं । स सर्गकाले त्विसर्गत्संहारकाले (स सर्गकाले च करोति सर्गान् B.) संहारकाले पुनराददीता ॥ १ ॥

De hujus puráṇae argumento cf. Wilson in J. A. S. B. I, p. 535 sqq. et in Vishnupurána, p. xxii. Capitum argumenta haec.

I. *Prakriyápáda*[1]. 1. Prooemium et summarium. 2. Hoc puráṇam olim a Váyu cum vatibus sanctis in sacrificio continuo, regnante Purúravase et Áyu, communicatum est. 3. Súta creationis historiam se enarraturum esse declarat. 4–6. De mundi creatione.

II. *Upodghátapáda.* 7. De kalparum computatione, et de intercalatione inter Pádmakalpam et Várahakalpam facienda. 8. De creatione a Brahmaṇe facta. De aevo aureo et argenteo. Ordinum quatuor origo, eorumque officia. 9. Deorum, gigantum, mundi creatio. Brahmanis ira Rudra (ardhanárínaravapus) creatur, hujus ex ore Uma procedit. Cujus synonyma enumerantur. 10. Brahman, quum corpus in duas partes divisisset, altera Purusha, altera Ṣatarúpá facta est. De horum, Brahmaṇis filiorum, Ṣivae et Satis prole. Ṣivae cultus quinque rebus innititur: spiritus coercitione (eaque triplex: *manda, madhyama, uttama*)[2], meditatione, sensuum a rebus externis revocatione, animi intentione, recordatione[3]. 11 (fol. 34^b = B. 32^a). De spiritus coercitione. Qua quadruplex fructus obtineri dicitur 1. *ṣánti*, quies, flagitiorum, sive propriorum sive a majoribus transmissorum, sedatione effecta, 2. *praṣánti*, tranquillitas, quae libidinibus refrenandis cernitur, 3. *dípti*, splendor, quo gradu ad sapientiam et potestatem prope divinam pervenitur, 4. *prasáda*, serenitas, quae ex absoluta rerum externarum omnium oblivione procedit. Spiritus coercendi ratio adumbratur. 12. Ad perfectionem (siddhi) obtinendam impedimenta (upasarga) quaedam removenda sunt, quae numinis contemplationi interveniunt. Primum enim mystae ad metam properanti imagines mirae, velut dei, obversantur. Deinde a terra, intellectu, aqua, igne, vento, aëre, mente, quae septem subtilissimae substantiae sunt, pericula ei afferuntur. Quas dum animo contemplatur, earum potestatem obtinet. Quarum rerum si voluptate implicetur (sajjate), omnem studii fructum amittit. शृणोति शब्दान् श्रोतव्यान्योजनानां शतादपि । सर्वज्ञश्च विधिज्ञश्च योगी चोन्मत्तवद्भवेत् ॥ यक्षराक्षसगंधर्वान्वीक्षते दिव्यमानुषान् । वेत्ति तांश्च महायोगी उपसर्गस्य लक्षणं ॥ देवदानवगंधर्वानृषींश्चापि तथा पितॄन् । प्रेक्षते सर्वतश्चैव उन्मत्तं तं विनिर्दिशेत् ॥ भ्रमेण भ्राम्यते योगी चोद्यमानोऽंतरात्मना । भ्रमेण भ्रांतबुद्धेस्तु ज्ञानं सर्वं प्रणश्यति ॥ वार्ता नाशयते चित्तं चोद्यमानें तरात्मना ।[4] वर्त्तेनाक्रांतबुद्धेस्तु सर्वं ज्ञानं प्रणश्यति ॥ प्रावृत्य मनसा शुक्लं पटं वा कंबलं तथा । ततस्तु परमं ब्रह्म क्षिप्रमेवानुचिंतयेत् ॥ तस्माच्चैवात्मनो दोषांस्तूपसर्गानुपस्थितान् । परित्यजेत मेधावी यदीच्छेत्सिद्धिमात्मनः ॥ ऋषयो देवगंधर्वा यक्षोरगमहासुराः । उपसर्गेषु संयुक्ता आवर्तंते पुनः पुनः ॥ तस्माद्युक्तः सदा योगी लघ्वाहारो जितेंद्रियः । तथासुप्तः सुसूक्ष्मेषु धारणां मूर्ध्नि धारयेत् ॥ ततस्तु योगयुक्तस्य जितनिद्रस्य योगिनः । उपसर्गाः पुनश्चान्ये जायंते प्राणसंज्ञकाः ॥ पृथिवीं धारयेत्सर्वां ततश्चापो ह्यनंतरं । ततोऽग्निं चैव सर्वेषामाकाशं मन एव च ॥ ततः परां पुनर्बुद्धिं धारयेत प्रयत्नतः । सिद्धीनां चैव लिंगानि दृष्ट्वा दृष्ट्वा परित्यजेत् ॥ पृथ्वीं धारयमाणस्य मही सूक्ष्मा प्रवर्तते । आत्मानं मन्यते नित्यं पृथ्वीं गंधश्च जायते ॥ अपो धारयमाणस्यापः सूक्ष्मा भवंति हि । शीता रसाः प्रवर्तंते सूक्ष्मा ह्यमृतसन्निभाः ॥ तेजो धारयमाणस्य तेजः सूक्ष्मं प्रवर्तते । आत्मानं मन्यते तेजस्तद्भावमनुपश्यति ॥ वायुं धारयमाणस्य वायुः सूक्ष्मः प्रवर्तते ।

[1] प्रक्रिया प्रथमः पादः कथावस्तुपरिग्रहः । उपोद्घातोऽनुषंगश्च उपसंहार एव च ॥ एवं हि पादश्चत्वारः समासात्कीर्तिता मया । Cap. IV.

[2] मंदो द्वादशमात्रस्तु उद्घाता द्वादश स्मृताः । मध्यमश्च द्विरुद्घातश्चतुर्विंशतिमात्रिकाः ॥ उत्तमस्तु त्रिरुद्घातो मात्रा षट्त्रिंशदुच्यते । स्वेदकंपविषादानां जननो ह्युत्तमः स्मृतः ॥

[3] प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा । स्मरणं चैव योगेऽस्मिन्पंच धर्माः प्रकीर्तिताः ॥

[4] Fortasse वातो नाशयते चित्तं चोद्यमानोऽंतरात्मना । वातेना° legendum est.

आत्मानं मन्यते वायुं वायुरुन्मंडलं भ्रमेत् ॥ आकाशं धारयमाणस्य व्योम सूक्ष्मं प्रवर्तते । पश्यते मंडलं सूक्ष्मं घोषश्चास्य प्रवर्तते ॥ तथा मनो धारयतो मनः सूक्ष्मं प्रवर्तते । मनसा सर्वभूतानां मनस्तु विशते हि सः । बुद्ध्या बुद्धिं यथा युंजेस्तदा विज्ञाय बुध्यते ॥ एतानि सप्त सूक्ष्माणि विदित्वा यस्तु योगवित् । परित्यजति मेधावी स बुद्ध्या परमं व्रजेत् ॥ यस्मिन्यस्मिंश्च संयुक्तो भूत ऐश्वर्यलक्षणे । तत्रैव संगं भजते तेनैव प्रविनश्यति ॥ तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परस्परं । परित्यजति यो बुद्ध्या स परं प्राप्नुयाद्द्विजः ॥ दृश्यंते हि महात्मान ऋषयो दिव्यचक्षुषः । संसक्ताः सूक्ष्मभावेषु ते दोषास्तेषु संज्ञिताः ॥ तस्मान्न निश्चयः कार्यः सूक्ष्मेष्विह कदाचन । ऐश्वर्याज्जायते रागो विरागं ब्रह्म चोच्यते ॥ 13. Dominium (aiṣvarya)[1] nactus asceticus octo facultatibus divinis praeditus est: 1. *aṇiman*, subtilitas, qua potestate nemini cernendus omnia intrare potest[2]; 2. *laghiman*, levitas, qua maxima celeritate ubicunque pervenit; 3. *mahiman*, magnitudo; 4. *prápti*, omnia obtinendi facultas; 5. *prákámya*, voluntas libera, qua rebus omnibus frui potest, neque tamen iis detinetur; 6. *íṣitva*, imperium; 7. *vaṣitva*, omnia ipsius voluntati subjiciendi facultas; 8. *yatrakámávasáyitá*, omnia decernendi facultas. 14. Quo animae metempsychosis vitaeque humanae miseriae et vicissitudines[3] evitentur, summo numini cognoscendo opera navanda est. 15. Numen summum in corde commorans octo libamentis colendum est. 16, 17. De Ṣivae cultorum officiis. 18. De erroribus expiandis (práyaṣchitta). 19. De ominibus diris: अत ऊर्ध्वं प्रवक्ष्यामि अरिष्टानि निबोधत । येन ज्ञानविशेषेण मृत्युं पश्यति चात्मनः ॥१॥ अरुंधतीं ध्रुवं चैव सोमच्छायां महापथं । यो न पश्येत्स नो जीवेन्नरः संवत्सरात्परं ॥२॥ अरश्मिवंतमादित्यं रश्मिवंतं च पावकं । यः पश्येन्न वै जीवेत मासादेकादशात्परं ॥३॥ वमेन्मूत्रं पुरीषं वा सुवर्णं रजतं तथा । प्रत्यक्षमथवा स्वप्ने दश मासान्न जीवति ॥४॥ अग्रतः पृष्ठतो वापि खंडं यस्य पदं भवेत् । पांशुले कर्दमे वापि सप्त मासान्स जीवति ॥५॥ काकः कपोतो गृध्रो वा निलीयेद्यस्य मूर्धनि । क्रव्यादो वा खगः कश्चित्षण्मासान्नातिवर्तते ॥६॥ वध्येद्वायसपंक्तीभिः पांसुवर्षेण वा पुनः । छायां वा विकृतां पश्येच्चतुःपंच स जीवति ॥७॥ अनभ्रे विद्युतं पश्येद्दक्षिणां दिशमाश्रितां । उदकेंद्रधनुर्वापि त्रयो द्वौ वा स जीवति ॥८॥ अप्सु वा यदिवादर्शे आत्मानं यो न पश्यति । अशिरस्कं तथात्मानं मासादूर्ध्वं न जीवति ॥९॥ शवगंधि भवेद्गात्रं वसागंधि ह्यथापि वा । मृत्युर्ह्युपस्थितस्तस्य अर्धमासं स जीवति ॥१०॥ यस्य वै स्नातमात्रस्य हृदयं चावशुष्यति । धूमो वा मस्तकान्पश्येद्दशाहं न स जीवति ॥११॥ संभिन्नो मारुतो यस्य मर्मस्थानानि कृंतति । अद्भिः स्पृष्टो न हृष्येच्च तस्य मृत्युरुपस्थितः ॥१२॥ ऋक्षवानरयुक्तेन रथेनाशां तु दक्षिणां । गायन्नथ (गायन्नप्य A. गायन्नस्य B.) व्रजेत्स्वप्ने विद्यान्मृत्युरुपस्थितः ॥१३॥ कृष्णांबरधरा श्यामा गायंती वाथवांगना । यन्नयेद्दक्षिणामाशां स्वप्ने सोऽपि न जीवति ॥१४॥ छिद्रं वासश्च कृष्णं च स्वप्ने यो बिभृयान्नरः । नग्नं वा श्रवणं[4] दृष्ट्वा विद्यान्मृत्युरुपस्थितः ॥१५॥ आ मस्तकतलाद्यस्तु निमज्जेत्पंकसागरे । दृष्ट्वा तु तादृशं स्वप्नं सद्य एव न जीवति ॥१६॥ भस्मांगारांश्च केशांश्च नदीं शुष्कां भुजंगमान् । पश्येद्यो दशरात्रं तु न स जीवेत तादृशः ॥१७॥ कृष्णैश्च विकटैश्चैव पुरुषैरुद्यतायुधैः । पाषाणैस्ताड्यते स्वप्ने यः सद्यो न स जीवति ॥१८॥ सूर्योदये प्रत्युषसि प्रत्यक्षं यस्य वै शिवा । क्रोशंती संमुखाभ्येति स गतायुर्भवेन्नरः ॥१९॥ यस्य वै स्नातमात्रस्य हृदयं पीड्यते भृशं । जायते दंतहर्षश्च तं गतायुममादिशेत् ॥२०॥ भूयो भूयस्त्रसेद्यस्तु रात्रौ वा यदिवा दिवा । दीपगंधं च नो वेत्ति विद्यान्मृत्युमुपस्थितं ॥२१॥ रात्रौ चेंद्रायुधं पश्येद्दिवा नक्षत्रमंडलं । परनेत्रेषु चात्मानं न पश्येन्न स जीवति ॥२२॥ नेत्रमेकं स्रवेद्यस्य कर्णौ स्थानाच्च भ्रश्यतः । नासा च वक्रा भवति स ज्ञेयो गतजीवितः ॥२३॥ यस्य कृष्णा खरा जिह्वा पद्माभासं च वै मुखं । गंडे चिपिटके (च पिटके B.) रक्ते तस्य मृत्युरुपस्थितः ॥२४॥ मुक्तकेशो हसंश्चैव गायन्नृत्यंश्च यो नरः । याम्याशाभिमुखो गच्छेत्तदंतं तस्य जीवितं ॥२५॥ यस्य स्वेदसमुद्भूताः श्वेतसर्षपसन्निभाः । स्वेदा भवंति ह्यसकृत्तस्य मृत्युरुपस्थितः ॥२६॥ उष्ट्रा वा रासभा वापि युक्ताः स्वप्ने रथे शुभाः । यस्य सोऽपि न जीवेत दक्षिणाभिमुखो गतः ॥२७॥ द्वे चात्र परमेरिष्टे एतद्भूतं (etad rúpam B.) परं भवेत् । घोषं न शृणुयात्कर्णे ज्योतिर्नेत्रेण (l. नेत्रे न) पश्यति ॥२८॥ श्वभ्रे यो निपतेत्स्वप्ने द्वारं चास्य पिधीयते । न चोत्तिष्ठति यः श्वभ्रात्तदंतं तस्य जीवितं ॥२९॥ ऊर्ध्वा च दृष्टिर्न च सप्रतिष्ठा (संप्रतिष्ठा codd.) रक्ता पुनः संपरिवर्तमाना । मुखस्य चोष्मा शुषिरा च नाभिरत्युष्णमूत्रो विषमस्य एव ॥३०॥ दिवा वा यदिवा रात्रौ प्रत्यक्षं योऽभिहन्यते । तं पश्येदथ हंतारं स हतस्तु न जीवति ॥३१॥ अग्निप्रवेशं कुरुते स्वप्नांते यस्तु मानवः । स्मृतिं नोपलभेच्चापि तदंतं तस्य जीवितं ॥३२॥ यस्तु प्रावरणं शुक्लं स्वकं पश्यति मानवः । रक्तं कृष्णमपि स्वप्ने तस्य मृत्युरुपस्थितः ॥३३॥ अरिष्टसूचिते देहे तस्मिन्काल उपागते । त्यक्त्वा भयं विषादं च उद्यच्छेद्बुद्धिमान्नरः ॥३४॥ etc. 20. De Om syllabae significatione et sanctitate. 21 (fol. 45^b = B. 42^a). Kalparum mensura breviter definitur, deinde viginti octo kalpae enumerantur: Bhava, Bhuvas, Tapas, Bhava, Rambha, Ṛitu, Kratu, Vahni, Havyaváhana, Sávitra,

[1] Idque triplex esse dicitur: sávadya, niravadya, súkshma. तच्चापि त्रिविधं ज्ञेयमैश्वर्यं सार्वकामिकं । सावद्यं निरवद्यं च सूक्ष्मं चैव प्रवर्तते ॥ सावद्यं नाम यत्तत्त्वं पंचभूतात्मकं स्मृतं । निरवद्यं तथा नाम पंचभूतात्मकं स्मृतं ॥ इंद्रियाणि मनश्चैव अहंकारश्च वै स्मृतं । तत्र सूक्ष्मं प्रवृत्तं तु (सूक्ष्मप्रवृत्तंस्तु MS.) पंचभूतात्मकं पुनः ॥

[2] त्रैलोक्ये सर्वभूतेषु जीवो स्यानियतः (sic B. जीवाश्चानियतः A.) स्मृतः । अणिमा च यथाव्यक्तं सर्वं तत्र प्रतिष्ठितं ॥

[3] Quae in hoc capite de hominum origine et vita dicuntur, similiter in Márkaṇḍeyapuráṇa c. 11, Garuḍapuráṇa, Pretakalpa c. 22, et in Vṛihannáradíya c. 30. traduntur.

[4] श्रवमणं A. Hoc loco श्रमण, mendicus Buddhicus, intelligi videtur, quae vox etiam श्रवण scribitur.

Bhuvas, Uṣika, Kuṣika, Gandharva, Rishabha, Shaḍja[1], Márjálíya, Madhyama, Vairájaka, Nisháda, Panchama, Meghaváhana, Chintaka, Ákúti, Vijnáti, Manas, Bháva, Vṛihat. Kalpas, qui a Gandharva vòcabulo incipiant et in Meghaváhana voce desinant, a modulis musicis denominatos esse, facile apparet. 22, 23. Ṣiva quatuor aevis (kalpa) se manifestavit, forma alba, rubra, nigra, omnigena (Viṣvarúpa). Aetate flava Maheṣvarí orta est. Ṣiva coram Brahmane de futuris kalpis, suis ipsius in singulis manifestationibus, sectae Ṣivaiticae conditoribus disserit: ततस्तस्मिन्तदा कल्पे वाराहे सप्तमे प्रभोः। पुनर्विष्णुर्महातेजाः कालो लोकप्रकालनः। मनुर्वैवस्वतो नाम तव पुत्रो भविष्यति॥ तदा चतुर्युगावस्थे कल्पे तस्मिन्युगांतके। भविष्यामि शिखायुक्तः श्वेतो नाम महामुनिः॥ हिमवच्छिखरे रम्ये छागले पर्वतोत्तमे। चतुःशिष्याः शिवे युक्ता भविष्यंति तदा मम॥ श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वेतलोहितः। चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः॥ ततस्ते ब्रह्मभूयिष्ठा दृष्ट्वा ब्रह्मगतिं परां। तत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं॥ पुनस्तु मम देवेश द्वितीये द्वापरे प्रभुः। प्रजापतिर्यदा व्यासः सत्यो नाम भविष्यति॥ तदा लोकहितार्थाय सुतारो नाम नामतः। भविष्यामि कलौ तस्मिन् लोकानुग्रहकारणात्॥ तत्रापि मम ते पुत्रा भविष्या नाम नामतः। दुंदुभिः शतरूपश्च ऋचीकः केतुमांस्तथा॥ प्राप्य योगं तथा ज्ञानं ब्रह्म चैव सनातनं। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं॥ तृतीये द्वापरे चैव यदा व्यासस्तु भार्गवः। तदा ह्यहं भविष्यामि दमनस्तु युगांतके॥ तत्रापि च भविष्यंति चत्वारो मम पुत्रकाः। विशोकश्च विकेशश्च विशापः शापनाशनः॥ तेऽपि तेनैव मार्गेण योगोक्तेन महौजसः। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं॥ चतुर्थे द्वापरे चैव यदा व्यासोऽंगिराः स्मृतः। तदाप्यहं भविष्यामि सुहोत्रो नाम नामतः॥ तत्रापि मम सत्पुत्राश्चत्वारश्च तपोधनाः। भविष्यंति द्विजश्रेष्ठा योगात्मानो दृढव्रताः॥ सुमुखो दुर्मुखश्चैव दुर्दमो दुरतिक्रमः। प्राप्य योगगतिं सूक्ष्मां विमला दग्धकिल्बिषाः॥ तेऽपि तेनैव मार्गेण गमिष्यंति न संशयः। पंचमे द्वापरे चैव व्यासस्तु सविता यदा॥ तदा चापि भविष्यामि कंको नाम महातपाः। अनुग्रहार्थं लोकानां योगात्मानेककर्मकृत्॥ चत्वारस्तु महाभागा विरजाः शुद्धयोनयः। पुत्रा मम भविष्यंति योगात्मानो दृढव्रताः॥ सनः सनंदनश्चैव प्रभुर्यस्य सनातनः। क्रतुः सनत्कुमारश्च निर्ममा निरहंकृताः॥ मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं। परिवर्ते पुनः षष्ठे मृत्युर्व्यासो यदा विभुः॥ तदाप्यहं भविष्यामि लोकाक्षिर्नाम नामतः। शिष्याश्च मम ते दिव्या योगात्मानो दृढव्रताः॥ भविष्यंति महाभागाश्चत्वारो लोकसंमताः। सुधामा विरजाश्चैव शंख आद्रव (?) एव च॥ योगात्मानो महात्मानस्ते सर्वे दग्धकिल्बिषाः। तेऽपि तेनैव मार्गेण गमिष्यंति न संशयः॥ सप्तमे परिवर्ते तु यदा व्यासः शतक्रतुः। विभुर्नाम महातेजाः पूर्वमासीच्छतक्रतुः॥ तदाप्यहं भविष्यामि कलौ तस्मिन्युगांतके। जैगीषव्येति विख्यातः सर्वेषां योगिनां वरः॥ तत्रापि मम ते पुत्रा भविष्यंति युगे तदा। सारस्वतः सुमेधाश्च वसुवाहः सुवाहनः॥ तेऽपि तेनैव मार्गेण ध्यानयुक्तिं समाश्रिताः। भविष्यंति महात्मानो रुद्रलोकपरायणाः॥ वसिष्ठश्चाष्टमे व्यासः परिवर्ते भविष्यति। कपिलश्चासुरिश्चैव तथा पंचशिखो मुनिः॥ वाग्वलिश्च महायोगी सर्वे एव महौजसः॥ प्राप्य माहेश्वरं योगं ध्यानिनो दग्धकल्मषाः। मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं॥ परिवर्तेऽथ नवमे व्यासः सारस्वतो यदा। तदा चाहं भविष्यामि ऋषभो नाम नामतः॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। पराशरश्च गार्ग्यश्च भार्गवो ह्यंगिरास्तथा॥ भविष्यंति महात्मानो ब्राह्मणा वेदपारगाः। सर्वे तपोबलोत्कृष्टाः शापानुग्रहकोविदाः॥ तेऽपि तेनैव मार्गेण योगोक्तेन तपस्विनः। ध्यानमार्गं समासाद्य गमिष्यंति तथैव च॥ दशमे द्वापरे व्यासस्त्रिधामा नाम नामतः। यदा भविष्यति विप्र[र्षि]स्तदाहं भविता पुनः॥ हिमवच्छिखरे रम्ये भृगुतुंगे नगोत्तमे। नाम्ना भृगोस्तु शिखरं तस्मात्तच्छिखरं भृगुः॥ तत्रैव मम ते पुत्रा भविष्यंति दृढव्रताः। बलबंधुर्निरामित्रः (वलवंधर्निरा° A. वलवंधनिरा° B.) केतुशृंगस्तपोधनः॥ योगात्मानो महात्मानो ध्यानयोगसमन्विताः। रुद्रलोकं गमिष्यंति तपसा दग्धकल्मषाः॥ एकादशे द्वापरे तु भृवृद्व्यासो (विवृ° B. Fortasse *Bhṛigur.*) भविष्यति। तदाप्यहं भविष्यामि गंगाद्वारे कलेर्धुरि॥ उग्रा नाम महानादास्तत्रैव मम पुत्रकाः। भविष्यंति महौजस्काः सुवृत्ता लोकविश्रुताः॥ लंबोदरश्च लंबश्च लंबाक्षो लंबकेशकः। प्राप्य माहेश्वरं योगं रुद्रलोकाय संस्थिताः। तेऽपि तेनैव मार्गेण गमिष्यंति परां गतिं॥ द्वादशे परिवर्ते तु शततेजा महामुनिः। भविष्यति महासत्त्वो व्यासः कविवरोत्तमः॥ ततोऽप्यहं भविष्यामि अत्रिर्नाम युगांतके। हेमकं वनमासाद्य (हेमकंचन° B.) योगमास्थाय भूतले॥ अत्रापि मम ते पुत्रा भस्मस्नानानुलेपनाः। भविष्यंति महायोगा रुद्रलोकपरायणाः॥ सर्वज्ञः समबुद्धिश्च साध्यः सर्वस्तथैव च। रुद्रलोकं गमिष्यंति ध्यानयोगपरायणाः॥ त्रयोदशे पुनः प्राप्ते परिवर्ते क्रमेण तु। धर्मो नारायणो नाम व्यासस्तु भविता यदा॥ तदाप्यहं भविष्यामि वालिर्नाम महामुनिः। वालिखिल्याश्रमे पुण्ये पर्वते गंधमादने॥ तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः। सुधामा काश्यपश्चैव वसिष्ठो विरजास्तथा॥ महायोगबलोपेता विमला ह्यूर्ध्वरेतसः। तेनैव योगमार्गेण गमिष्यंति न संशयः॥ यदा व्यासः सुरक्षस्तु पर्यायश्च चतुर्दशः। तत्रापि पुनरेवाहं भविष्यामि युगांतके॥ वंशे त्वंगिरसः श्रेष्ठो गौतमो नाम योगवित्। तस्माद्भविष्यते पुण्यं गौतमं नाम तद्वनं॥ तत्रापि मम ते पुत्रा भविष्यंति कलौ तथा। अत्रिरुग्रतपाश्चैव श्रावणो प्यविष्टकः (सावणोप्यसतिष्वका: B. Fortasse श्रावणोऽथ श्रविष्ठकः) ॥ योगात्मानो महात्मानो ध्यानयोगपरायणाः। तेऽपि तेनैव मार्गेण रुद्रलोकनिवासिनः॥ ततः प्राप्ते पंचदशे परिवर्ते क्रमागते। त्र्यारुणिस्तु यदा व्यासो द्वापरे भविता प्रभुः॥ तदाप्यहं भविष्यामि नाम्ना वेदशिरा द्विजः। तत्र वेदशिरो नाम अस्त्रं तत्पारमेश्वरं॥ भविष्यति महावीर्यं वेदशीर्षश्च पर्वतः। हिमवत्पृष्ठमाश्रित्य सरस्वत्या नगोत्तमे॥ तदापि मम ते पुत्रा भविष्यंति तपोधनाः। कुणिश्च कुणिबाहुश्च कुशरीरः कुनेत्रकः॥ योगात्मानो महात्मानो ब्रह्मिष्ठाश्चोर्ध्वरेतसः। तेऽपि तेनैव मार्गेण रुद्रलोकं गतास्तु वै॥ ततः षोडशमे चापि परिवर्ते क्रमागते। व्यासस्तु संजयो नाम भविष्यति यदा (तदा MSS.) प्रभुः॥ तदाप्यहं भविष्यामि गोकर्णो नाम

[1] षड्जना यत्र चर्षयः।

नामतः। तस्माद्भविष्यते पुण्यं गोकर्णं नाम तद्वनं ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। काश्यपो ह्युशनाश्चैव च्यवनोऽथ बृहस्पतिः ॥ तेऽपि तेनैव मार्गेण गमिष्यंति परं पदं। ततः सप्तदशे चैव परिवर्ते क्रमागते ॥ तदा भविष्यते व्यासो नाम्ना देवः कृतंजयः। तदाप्यहं भविष्यामि गुह्यवासीति (l. गुहावासीति) नामतः ॥ हिमवच्छिखरे चैव महातुंगे महालये। सिद्धक्षेत्रं महापुण्यं भविष्यति महालयं ॥ तत्रापि मम ते पुत्रा ब्रह्मज्ञा योगवादिनः। भविष्यंति महात्मानो निर्ममा निरहंकृताः ॥ उतथ्यो वामदेवश्च महाकालो महालयः। तेषां शतसहस्रं तु शिष्याणां ध्यानसाधनं ॥ भविष्यंति तदा कल्पे सर्वे ते ध्यानयुंजकाः। ते तु संनिहिता योगे हृदि (तुद्धृदि A.[1]) कृत्वा महेश्वरं। महालये पदं क्षिप्त्वा प्रविष्टाः शिवमव्ययं ॥ ये चान्येऽपि महात्मानः काले तस्मिन्युगांतके। ध्यानयुक्तेन मनसा विमलाः शुद्धबुद्धयः ॥ गत्वा महालयं पुण्यं दृष्ट्वा माहेश्वरं पदं। तूर्णं तारयते जंतुर्दश (जंतु A.) पूर्वान्दशावरान् ॥ आत्मानमेकविंशं च तारयित्वा महालये। मम प्रसादाद्यास्यंति रुद्रलोकं गतज्वराः ॥ ततोऽष्टादशमश्चैव परिवर्तो यदा भवेत्। तदा ऋतंजयो नाम व्यासस्तु भविता मुनिः ॥ तदाप्यहं भविष्यामि शिखंडी नाम नामतः। सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते ॥ हिमवच्छिखरे पुण्ये शिखंडी यत्र पर्वतः। शिखंडिनो वनं चापि ऋषिसिद्धनिषेवितं ॥ तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः। वाचश्रवा ऋचीकश्च श्यावाश्वश्च दृढव्रतः (शावाश्वस्य दृव्रतः A.) ॥ योगात्मानो महासत्त्वाः सर्वे ते वेदपारगाः। प्राप्य माहेश्वरं योगं रुद्रलोकं व्रजंति ते ॥ ततस्त्वेकोनविंशे तु परिवर्ते क्रमागते। व्यासस्तु भविता नाम्ना भारद्वाजो (भरद्वा°?) महामुनिः ॥ तत्राप्यहं भविष्यामि जटामालीति नामतः। हिमवच्छिखरे रम्ये जटायुर्यत्र पर्वतः ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। हिरण्यनामा कौशल्यः काक्षीवः (कौशिल्यः काक्षिवः A.) कुथुमिस्तथा ॥ ईश्वरयोगधर्माणः सर्वे ते ह्यूर्ध्वरेतसः। प्राप्य माहेश्वरं योगं गमिष्यंति [न संशयः ॥ ततो विंशतिमे सर्गे परिवर्ते क्रमेण तु। वाचश्रवाः स्मृतो व्यासो भविष्यति] महामतिः ॥ तदाप्यहं भविष्यामि ह्यट्टहासेति नामतः। अट्टहासप्रियाश्चापि भविष्यंति तदा नरः ॥ तत्रैव हिमवत्पृष्ठे त्वट्टहासो [महागिरिः। भविष्यति] महातेजाः सिद्धचारणसेवितः ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। युक्तात्मानो महासत्त्वा ध्यानिनो नियतव्रताः ॥ सुमंतुर्बर्बरिर्विद्वान्सुबंधुः कुशिकंधरः। प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः ॥ एकविंशे पुनः प्राप्ते परिवर्ते क्रमेण तु। वाचस्पतिः स्मृतो व्यासो यदा स ऋषिसत्तमः ॥ तदाप्यहं भविष्यामि दारुको नाम नामतः। तस्माद्भविष्यते पुण्यं देवदारुवनं महत् ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। प्लक्षो दाल्भायणिश्चैव केतुमाली बकस्तथा ॥ योगात्मानो महात्मानो नियता ह्यूर्ध्वरेतसः। परमं योगमास्थाय रुद्रं प्राप्तास्तथानघाः ॥ द्वाविंशे परिवर्ते तु व्यासः शुक्लायनो यदा। तदाप्यहं भविष्यामि वाराणस्यां महामुनिः ॥ नाम्ना वै लांगली भीमो यत्र देवाः सवासवाः। द्रक्ष्यंति मां कलौ तस्मिन्नवतीर्णं हलायुधं ॥ तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः। भल्लाविर्मधुपिंगाक्षः श्वेतकेतुस्तथैव च (स्वेतकानु° A. In cod. B. totus versus deest.) ॥ तेऽपि माहेश्वरं योगं प्राप्य ध्यानपरायणाः। विरजा ब्रह्मभूयिष्ठा रुद्रलोकाय संस्थिताः ॥ परिवर्ते त्रयोविंशे तृणबिंदुर्यदा मुनिः। व्यासो भविष्यति ब्रह्मा तदाहं भविता पुनः ॥ श्वेतो नाम महाकायो मुनिपुत्रः सुधार्मिकः। तत्र कालं जरिष्यामि तदा गिरिवरोत्तमे ॥ तेन कालंजरो नाम भविष्यति स पर्वतः। तत्रापि मम ते पुत्रा भविष्यंति महौजसः ॥ उशिजो बृहदुक्थ्यश्च देवलः कविरेव च। प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते ॥ परिवर्ते चतुर्विंशे ऋक्षो व्यासो भविष्यति। तत्राहं भविता ब्रह्मन् कलौ तस्मिन्युगांतके ॥ शूली नाम महायोगी नैमिषे योगिवंदिते। तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः ॥ शालिहोत्रोऽग्निवेशश्च (ग्निवेश्यश्च A. B.) युवनाश्वः शरद्वसुः। तेऽपि योगबलोपेता रुद्रं यास्यंति सुव्रताः ॥ पंचविंशे पुनः प्राप्ते परिवर्ते यथाक्रमं। वासिष्ठस्तु यदा व्यासः शक्तिर्नाम भविष्यति ॥ तदाप्यहं भविष्यामि दंडिमुंडीश्वरः प्रभुः। कोटिवर्षं समासाद्य नगरं देवपूजितं ॥ तत्रापि मम ते पुत्रा भविष्यंति क्रमागताः। योगात्मानो महात्मानः सर्वे ते ह्यूर्ध्वरेतसः ॥ छगलः कुंभकर्णश्च कुंभश्चैव प्रबाहुकः। प्राप्य माहेश्वरं योगं गमिष्यंति तथैव ते ॥ षड्विंशे परिवर्ते तु यदा व्यासः पराशरः। तदाप्यहं भविष्यामि सहिष्णुर्नाम नामतः ॥ पुण्यं रुद्रवटं प्राप्य कलौ तस्मिन्युगांतके। तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः ॥ उलूको वैद्युतश्चैव शर्वको ह्याश्वलायनः। प्राप्य माहेश्वरं योगं गंतारस्ते तथैव हि ॥ सप्तविंशतिमे प्राप्ते परिवर्ते क्रमागते। जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥ तदाप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः। प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः ॥ तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः। अक्षपादः कणादश्च उलूको वत्स एव च ॥ योगात्मानो महात्मानो विमलाः शुद्धबुद्धयः। प्राप्य माहेश्वरं योगं रुद्रलोकं ततो गताः ॥ अष्टाविंशे पुनः प्राप्ते परिवर्ते क्रमागते। पराशरसुतः श्रीमान्विष्णुर्लोकपितामहः ॥ यदा भविष्यति व्यासो नाम्ना द्वैपायनः प्रभुः। तदा षष्ठेन चांशेन कृष्णः पुरुषसत्तमः ॥ वसुदेवाद्यदुश्रेष्ठो वासुदेवो भविष्यति। तदा चाहं भविष्यामि योगात्मा योगमायया ॥ लोकविस्मयनार्थाय ब्रह्मचारी – – –ः। श्मशाने मृतमुत्सृष्टं दृष्ट्वा लोकमनायकं ॥ ब्राह्मणानां हितार्थाय प्रविष्टो योगमायया। दिव्यां मेरुगुहां पुण्यां त्वया सार्धं च विष्णुना ॥ भविष्यामि तदा ब्रह्मन् लकुली नाम नामतः। कायारोहणमित्येवं सिद्धक्षेत्रं च वै तदा ॥ भविष्यति तु विख्यातं यावद्भूमिर्धरिष्यति। तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः ॥ कुशिकश्चैव गार्ग्यश्च मित्रको रुष्ट एव च। योगयुक्ता महात्मानो ब्राह्मणा वेदपारगाः ॥ प्राप्य माहेश्वरं योगं विमला ह्यूर्ध्वरेतसः। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं ॥ इत्येतद्वै मया प्रोक्तमवतारेषु लक्षणं। मन्वादिकृष्णपर्यंतमष्टाविंशं युगक्रमात् ॥ तत्र श्रुतिसमूहानां विभागो धर्मलक्षणं। भविष्यति तदा कल्पे कृष्णद्वैपायनो यदा ॥

24. De Brahmanis et Ṣivae origine. 25. De creatione. 26. De syllaba Om, e cujus elementis tres Vedae orti sunt. Quatuordecim vocalibus totidem Manues repraesentantur. 27. Octo Ṣivae nomina, locique in quibus singula colenda sunt: Rudra (सूर्यो मही जलं वह्निर्वायुराकाश एव च। दीक्षितो ब्राह्मणश्चंद्र इत्येते ब्रह्मधातवः ॥ तेषु पूज्यश्च वंद्यः स्याद्रुद्रस्तान्न हिनस्ति वै), Bhava = aqua, Ṣarva = terra,

[1] In cod. B. omnia inde a षोडशमे चापि परिवर्ते [क्रमा° usque ad महासत्त्वा] ध्यानिनो desiderantur.

Íṣána = ventus, Paṣupati = ignis, Bhíma, Ugra, Mahádeva. 28. De septem vatum divinorum prole. 29. De Agnis prole. Hoc caput a quinquagesimo Matsyapuráṇae capite non differt. 31 (fol. 72^b = B. 66^b). De manium generibus. Daksha Ṣivae imprecatione Práchínabarhishis filius, Prachetasis nepos nascitur. Dakshae sacrificium a Ṣiva dirimitur. Haec narratio iisdem verbis in Brahmapuráṇa (cod. 62, fol. 65^a) traditur. 31. De temporis divisione. 32. De quatuor mundi aetatibus. 33. De Manuis Sváyambhuvae prole, et de septem insularum terrestrium regibus. 34–53. Mundi descriptio. Magna pars in Matsyapuráṇa (capp. 102–115) iisdem verbis legitur. 54 (fol. 144^a = B. 125^b). De Nílakaṇṭhae, Ṣivae epitheti, origine. 55. Ṣivae praestantia celebratur origine lingae, cujus magnitudinem neque Brahman neque Vishṇus emetiri potuerunt[1]. 56–58. Haec capita a Matsyapuráṇa (capp. 128–130) non differunt.

Codex, omnium quos equidem vidi sincerissimus, medio seculo quinto decimo videtur exaratus esse. Fol. 79. desideratur. Multa folia tam lacera sunt, ut librum, qui collaturi sunt, viri docti, ut summa cautione tractent, monendi sint. (Wilson 355.)

104.

Lit. Devan. Charta Ind. Foll. 270. Long. 14. Lat. 7. Linn. 13.

Váyupuráṇae pars utraque.

C. 59 (fol. 143^a). Hoc caput a Matsyapuráṇae c. 132. non differt. 60. De Vedarum divisione[2]: द्वापरे तु पुरावृत्ते मनोः स्वायंभुवेऽंतरे । ब्रह्मा मनुमुवाचेदं वेदं व्यस्य महामते ॥ परिवृत्तं युगं तात स्वल्पवीर्या द्विजातयः। संवृत्ता युगदोषेण सर्वं चैव यथाक्रमं ॥ भ्रष्टमानं युगवशादल्पशिष्टं हि दृश्यते । दशसाहस्रभागेन ह्यवशिष्टं कृतादिदं ॥ वीर्यं तेजो बलं चाल्पं सर्वं चैव प्रणश्यति । वेदे वेदा हि कार्याः स्युर्मा भूद्वेदविनाशनं ॥ वेदे नाशमनुप्राप्ते यज्ञो नाशं गमिष्यति । यज्ञे नष्टे देवनाशस्ततः सर्वं प्रणश्यति ॥ आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः । पुनर्दशगुणः कृत्स्नो यज्ञो वै सर्वकामधुक् ॥ एवमुक्तस्तथेत्युक्त्वा मनुर्लोकहिते रतः । वेदमेकं चतुष्पादं चतुर्धा व्यभजत्प्रभुः ॥ ब्रह्मणो वचनात्तात लोकानां हितकाम्यया । तदहं वर्तमानेन युष्माकं वेदकल्पनं ॥ [मन्वंतरेण वक्ष्यामि व्यतीतानां प्रकल्पनं ।][3] प्रत्यक्षेण परोक्षं वै तन्निबोधत सत्तमाः ॥ अस्मिन्युगे कृतो व्यासः पाराशर्यः परंतपः । द्वैपायन इति ख्यातो विष्णोरंशः प्रकीर्तितः ॥ ब्रह्मणा चोदितः सोऽस्मिन्वेदं व्यस्तुं प्रचक्रमे । अथ शिष्यान्स जग्राह चतुरो वेदकारणात् ॥ जैमिनिं च सुमंतुं च वैशंपायनमेव च । पैलं तेषां चतुर्थं तु पंचमं लोमहर्षणं ॥ ऋग्वेदश्रावकं पैलं जग्राह विधिवद्द्विजं । यजुर्वेदप्रवक्तारं वैशंपायनमेव च ॥ जैमिनिं सामवेदार्थश्रावकं सोऽन्वपद्यत । तथैवाथर्ववेदस्य सुमंतुमृषिसत्तमं ॥ इतिहासपुराणस्य वाक्योवाक्यस्य चैव हि । मां चैव प्रतिजग्राह भगवानीश्वरः प्रभुः ॥ एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत् । चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत् ॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथैव च । औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः । ब्रह्मत्वमकरोद्यज्ञे वेदेनाथर्वणेन तु ॥[4] ततः स ऋच उद्धृत्य ऋग्वेदं समकल्पयत् । हौतृकं (होतृत्वं C.) कल्पयत्तेन यज्ञवाहं जगद्धितं ॥ सामभिः सामवेदं च तेनौद्गात्रमरोचयत् । राज्ञस्त्वथर्ववेदेन सर्वकर्माण्यकारयत् ॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कुलकुंकुभिः (कुल्य° C.) । पुराणसंहितां चक्रे पुराणार्थविशारदः ॥ यच्छिष्टं तु यजुर्वेदे तेन यज्ञमथायुजत् । युंजानः स यजुर्वेद इति शास्त्रविनिश्चयः ॥ पादानामुद्धृतत्वाच्च यजूंषि विषमाणि च । स तेनोद्धृतवीर्यैस्तु ऋत्विग्भिर्वेदपारगैः । प्रयुज्यते ह्यश्वमेधस्तेन (°धतेन C. aṣvamedhe?) वा युज्यते तु सः ॥ ऋचो गृहीत्वा पैलस्तु व्यभजत्तद्द्विधा पुनः । द्विः कृत्वा संयुगे चैव शिष्याभ्यामददात्प्रभुः ॥ इंद्रप्रमतये चैकां द्वितीयां बाष्कलाय च । चतस्रः संहिताः कृत्वा बाष्कलिर्द्विजसत्तमः ॥ शिष्यानध्यापयामास शुश्रूषाभिरतान्हितान् । बोध्यं तु प्रथमां शाखां द्वितीयामग्निमाठरं । पाराशरं तृतीयां तु याज्ञवल्क्यमथापरां ॥ इंद्रप्रमतिरेकां तु संहितां द्विजसत्तमः । अध्यापयन्महाभागं मार्कंडेयं यशस्विनं ॥ सत्यश्रवसमग्र्यं तु पुत्रं स तु महायशाः । सत्यश्रवाः सत्यहितं पुनरध्यापयद्द्विजं ॥ सोऽपि सत्पितरं (sic C. सच्छितरं B. सत्छितरं D.) पुत्रं पुनरध्यापयद्विभुः । सत्यश्रियं महात्मानं सत्यधर्मपरायणं ॥ अभवंस्तस्य शिष्या वै त्रयस्तु सुमहौजसः । सत्यश्रियस्तु विद्वांसः शास्त्रग्रहणतत्पराः ॥ शाकल्यः प्रथमस्तेषां तस्मादन्यो रथीतरः । बाष्कलिश्च भरद्वाज इति शाखाप्रवर्तकाः ॥ देवमित्रस्तु शाकल्यो ज्ञानाहंकारगर्वितः । जनकस्य स यज्ञे वै विनाशमगमद्द्विजाः ॥ Sequitur narratio de Devamitra Ṣákalya, qui a Yájnavalkya doctrinae certamine victus moritur. देवमित्रस्तु शाकल्यो महात्मा द्विजसत्तमः । चकार संहिताः पंच बुद्धिमान्पदवित्तमः ॥ तस्य शिष्या भवन्पंच मुद्गलो गोलकस्तथा । खालीयश्च (स्वालोपश्च B. स्वालोयश्च D.) तथा मत्स्यः शैशिरेयश्च पंचमः ॥[5] प्रोवाच संहितास्तिस्रः शाकपूणी रथीतरः (शाकपूणिरथीतरः C. शाकपूर्णरथंतरः B.) । निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तमाः ॥ तस्य शिष्यास्तु चत्वारः कैजवो वामनस्तथा । धर्मशर्मा देवशर्मा सर्वे व्रतधरा द्विजाः ॥ शाकल्ये च मृते सद्यो ब्रह्मघ्नास्ते बभूवतुः । ततश्चिंतां परां प्राप्य गतास्ते ब्रह्मणोऽंतिकं etc. 61. भारद्वाजो याज्ञवल्क्यो गालविः सालकिस्तथा । धीमान् शतबलाकश्च

---

[1] Occurrit ibi hoc Ṣivae dictum: अयं मे दक्षिणो बाहुर्ब्रह्मा लोकपितामहः । वामो बाहुश्च मे विष्णुर्नित्यं युद्धेषु निर्जितः ॥

[2] Cf. Vishṇupuráṇa III, 4.

[3] In hac parte codicibus E. I. H. 2102, 2103 (= C.) et 1310 (= D.) usus sum. Versus uncis inclusus in codd. B. D. desideratur.

[4] Hic versus subditivus est.

[5] मुद्गलो गोमुखश्चैव वात्स्यः शालीय एव च । शिशिरः पंचमश्चासीन्मैत्रेयस्तु महामुनिः ॥ Vishṇupuráṇa III, 4, 20. Pro Gomukha codices deterrimi गोखलु legunt.

नैगमश्च द्विजोत्तमाः ॥ बाष्कलिश्च भरद्वाजस्तिस्रः प्रोवाच संहिताः । रथीतरो निरुक्तं च पुनश्चक्रे चतुर्थकं ॥ त्रयस्तस्याभवन् शिष्या महात्मानो गुणान्विताः । धीमान्नंदायनीयश्च पन्नगानिश्च (पन्नगारिश्च B.D.) बुद्धिमान् ॥ तृतीयश्चार्जवस्ते च तपसा शंसितव्रताः । वीतरागा महातेजाः संहिताज्ञानपारगाः ॥ इत्येते बह्वृचां प्रोक्ता संहिता यैः प्रवर्तिताः । वैशंपायनगोत्रोऽसौ यजुर्वेदं व्यकल्पयत् ॥ षडशीतिस्तु येनोक्ता संहिता यजुषां शुभाः । शिष्येभ्यः प्रददौ ताश्च जगृहुस्ते विधानतः ॥ एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः । षडशीतिश्च तस्यापि संहितानां विकल्पकाः ॥ सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः । त्रिधा भेदास्तु ते प्रोक्ता भेदेऽस्मिन्नवमे शुभे ॥ उदीच्या मध्यदेशाश्च प्राच्याश्चैव पृथग्विधाः । श्यामायनिरुदीच्यानां प्रधानः संबभूव ह ॥ मध्यदेशप्रतिष्ठानामारुणिः प्रथमः स्मृतः । आलंबिरादिः प्राच्यानां त्रयोदश्यादयस्तु ते । इत्येते चरका प्रोक्ता संहितावादिनो द्विजाः ॥ ऋषयस्तद्वचः श्रुत्वा सूतं जिज्ञासवोऽब्रुवन् । चरकाध्वर्यवः केन कारणं ब्रूहि तत्त्वतः ॥ किं चीर्णं कस्य हेतोश्च चरकत्वं च भेजिरे । इत्युक्तः प्राह तेषां स चरकत्वमभूद्यथा ॥ सूत उवाच ॥ कार्यमासीदृषीणां च किंचिद्ब्राह्मणसत्तमाः । मेरुपृष्ठं समासाद्य तैस्तदास्त्विति मंत्रितं ॥ यो नोऽत्र सप्तरात्रेण नागच्छेद्द्विजसत्तमाः । स कुर्याद्ब्रह्मवध्यां वै समयो नः प्रकीर्तितः ॥ ततस्ते सगणाः सर्वे वैशंपायनवर्जिताः । प्रययुः सप्तरात्रेण यत्र संधिः कृतोऽभवत् ॥ ब्राह्मणानां तु वचनाद्ब्रह्मवध्यां चकार सः । शिष्यानथ समानीय स वैशंपायनोऽब्रवीत् ॥ ब्रह्मवध्यां चरध्वं वै मत्कृते द्विजसत्तमाः । सर्वे यूयं समागम्य ब्रूत मे तद्धितं वचः ॥ याज्ञवल्क्य उवाच ॥ अहमेव चरिष्यामि तिष्ठंतु मुनयस्त्विमे । बलं चोत्थापयिष्यामि तपसा स्वेन भावितः ॥ एवमुक्तस्ततः क्रुद्धो याज्ञवल्क्यमथाब्रवीत् । उवाच यत्त्वयाधीतं सर्वं प्रत्यर्पयस्व मे ॥ एवमुक्तः सरूपाणि यजूंषि प्रददौ गुरोः । रुधिरेण तथाक्तानि छर्दित्वा ब्रह्मवित्तमः ॥ ततः स ध्यानमास्थाय सूर्यमाराधयद्द्विजः । सूर्ये ब्रह्म यदुच्छिन्नं खं गत्वा प्रतितिष्ठति ॥ ततो यानि गतान्यूर्ध्वं यजूंष्यादित्यमंडलं । तानि तस्मै ददौ तुष्टः सूर्यो वै ब्रह्मरातये ॥ अश्वरूपश्च मार्तंडो याज्ञवल्क्याय धीमते । यजूंष्यधीयते यानि ब्रह्मणा (ब्राह्मणो B. D.) येन केनचित् ॥ अश्वरूपाणि दत्तानि ततस्ते वाजिनोऽभवन् । ब्रह्महत्या तु यैश्चीर्णा चरणाच्चरकाः स्मृताः ॥ वैशंपायनशिष्यास्ते चरकाः समुदाहृताः । इत्येते चरकाः प्रोक्ता वाजिनस्तु निबोधत ॥ याज्ञवल्क्यस्य शिष्यास्ते कण्ववैधेयशालिनः । मध्यंदिनश्च शापेयी विदग्धश्चाथ उद्दलः ॥ ताम्रायणश्च वात्स्यश्च तथा गालवशैषिरी (गोलवशैषिरी C. गालवशौषिरी B. गालवशैषिरी D.) । आटवी (आटवी C. अटव्या B. अटवी D.) च तथा पर्णी वीरणी सपरायणः ॥ इत्येते वाजिनः प्रोक्ता दश पंच च संमताः । शतमेकाधिकं कृत्स्नं यजुषां ये विकल्पकाः ॥ पुत्रमध्यापयामास सुमंतुमथ जैमिनिः । सुमंतुश्चापि सुत्वानं पुत्रमध्यापयत्प्रभुः ॥ स सहस्रमधीत्याशु सुकर्माप्यथ संहिताः । प्रोवाचाथ सहस्रस्य सुकर्मा सूर्यवर्चसः ॥ अनध्यायेष्वधीयानान् तान् जघान शतक्रतुः । प्रायोपवेशमकरोत्ततोऽसौ शिष्यकारणात् ॥ क्रुद्धं दृष्ट्वा ततः शक्रो वरमस्मै ददौ पुनः । भाविनौ ते महावीर्यौ शिष्यावनलवर्चसौ ॥ अधीयानौ महाप्राज्ञौ सहस्रसंहिता उभौ । एते सुरा महाभाग मा क्रुध्य द्विजसत्तम ॥ इत्युक्त्वा वासवः श्रीमान् सुकर्माणं यशस्विनं । शांतक्रोधं द्विजं दृष्ट्वा तत्रैवांतरधीयत ॥ तस्य शिष्योऽभवद्धीमान्पौष्पिंजिर्द्विजसत्तमाः । हिरण्यनाभः कौशिल्यो द्वितीयोऽभून्नराधिपः ॥ अध्यापयत्तु पौष्पिंजिः सहस्रार्धं तु संहिताः । ते नाम्नोदीच्यसामान्याः शिष्याः पौष्पिंजिनः शुभाः ॥ शतानि पंच कौशिल्यः संहितानां च वीर्यवान् । शिष्या हिरण्यनाभस्य स्मृतास्ते प्राच्यसामगाः ॥ लोकाक्षिः कुथुमिश्चैव कुशीतिर्लांगलिस्तथा । पौष्पिंजिशिष्याश्चत्वारस्तेषां भेदान्निबोधत ॥ राणायनीयः (रायाणनीयः C.) सहतंडिपुत्रस्तस्मादन्यो मूलचारी सुविद्वान् । सकैतिपुत्रः सहसात्यपुत्र एतान्भेदान्विद्धि लोकाक्षिणस्तु ॥ त्रयस्तु कुथुमेः पुत्रा औरसा सपराशराः (रसपासराः B. D.) । भागवित्तिश्च तेजस्वी त्रिविधाः कुथुमाः स्मृताः ॥ शैरिकः (शैरिद्युः C.) शृंगिपुत्रस्तु द्वावेतौ चरितव्रतौ । राणायनीयिः सौमित्रिः सामवेदविशारदौ ॥ प्रोवाच संहितास्तिस्रः शृंगिपुत्रो महातपाः । चैलः (चौल° C.) प्राचीनयोगश्च सुरालश्च (?) द्विजोत्तमाः ॥ प्रोवाच संहिताः षट् तु पाराशर्यस्तु कौथुमः । आसुरायणवैशाख्यौ वेदवृद्धपरायणौ ॥ प्राचीनयोगपुत्रश्च बुद्धिमांश्च पतंजलिः । कौथुमस्य तु भेदास्ते पाराशर्यस्य षट् स्मृताः ॥ लांगलिः शालिहोत्रस्तु (शालिगोत्रस्तु C.) स षट् प्रोवाच संहिताः । भालुकिः कामहानिश्च जैमिनिर्लोमगायिनिः (लोम° MSS.) ॥ कंडुश्च कोहलश्चैव षडेते लांगलाः स्मृताः । एते लांगलिनः शिष्याः संहिता यैः प्रसाधिताः ॥ ततो हिरण्यनाभस्य कृतिः शिष्यो (कृतशिष्यो MSS.) नृपात्मजः । सोऽकरोच्चतुर्विंशत्संहिता द्विपदां वरः ॥ प्रोवाच चैव शिष्येभ्यो येभ्यस्तान्वै निबोधत । राडुश्च (राडश्चन्मह° C.) महवीर्यश्च पंचमो वाहनस्तथा ॥ तालिकः (तालकाः B. तालकः D.) पांडकश्चैव कालिको राजिकस्तथा । गौतमश्चाजवस्तश्च सोमराजा यतकृतः (पतंजतः B. यतंततः D.) ॥ पृष्ठघ्नः परिकृष्टश्च उलूखलक एव च । यवीयसश्च वैशालो अंगुलीयश्च कौशिकः ॥ सालिमंजरिः सत्यश्च कापीयकानिकश्च यः । पाराशरश्च (परा° C.) धर्मात्मा इति क्रांतास्तु सामगाः ॥ सामगानां तु सर्वेषां श्रेष्ठौ द्वौ तु प्रकीर्तितौ । पौष्पिंजिश्च कृतिश्चैव संहितानां विकल्पकौ ॥ अथर्वाणं द्विधा कृत्वा सुमंतुरददाद्द्विजाः । कबंधाय गुरुः कृत्स्नं संचविद्या (sic C. सचविद्या B. D.) यथाक्रमं ॥ कबंधस्तु द्विधा कृत्वा पथ्यायैकं पुनर्ददौ । द्वितीयं वेदस्पर्शाय (वेददर्शाय Vishṇup.) स चतुर्धाकरोत्पुनः ॥ मोदो[1] ब्रह्मबलश्चैव पिप्पलादस्तथैव च । शौल्कायनिश्च (शौष्कायनिश्च C. शौका° B. शोक° D.) धर्मज्ञश्चतुर्थस्तु यतः स्मृतः (चतुर्थः तपतः C.) ॥ वेदस्पर्शस्य चत्वारः शिष्यास्त्वेते दृढव्रताः । पुनश्च त्रिविधं विद्धि पथानां (पंथानां MSS.) भेदमुत्तमं ॥ जाजलिः कुमुदादिश्च तृतीयः शौनकः स्मृतः । शौनकस्तु द्विधा कृत्वा ददावेकं तु बभ्रवे ॥ द्वितीयां संहितां धीमान् सैंधवायनसंज्ञिते । सैंधवो मुंजकेशाय भिन्नां चास्य द्विधा पुनः ॥ नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः । चतुर्थोऽंगिरसः कल्पः शांतिकल्पश्च पंचमः ॥ श्रेष्ठा ह्यथर्वणो ह्येते संहितानां विकल्पनाः । षट्शः कृत्वा मया प्रोक्तं पुराणमृषिसत्तमाः ॥ आत्रेयः सुमतिर्धीमान्काश्यपो ह्यकृतव्रणः । भारद्वाजोऽग्निवर्चाश्च वसिष्ठो मित्रयुश्च यः ॥ सावर्णिः सौमदत्तिस्तु सुशर्मा शांशपायनः । एते शिष्या मम ब्रह्मन्पुराणेषु दृढ-

[1] Pro मोदो Vishnupuránae codd. haec: मौंदो A. मैत्रो D. मौञ्जो B. C.

व्रता: ॥ त्रिभिस्तिस्र: कृतास्तिस्र: संहिता: पुनरेव हि । काश्यप: संहिताकर्ता सावर्णि: शांशपायनि: ॥ सामिषा (सामिका D.) च चतुर्थी स्यात्सा चैषा पूर्वसंहिता । सर्वास्ता हि चतुष्पादा: सर्वाश्चैकार्थवाचिका: ॥ पाठांतरे पृथग्भूता वेदशाखा यथा तथा । चतु:साहस्रिका: सर्वा: शांशपायनिकामृते ॥ लोमहर्षणिका मूला तत: काश्यपिका परा । सावर्णिका तृतीयासामृजुवाक्यार्थपंडिता: । शांशपायनिका चांत्या नोदनार्थ(निदाना°?)विभूषिता ॥ सहस्राणि ऋचामष्टौ षट्शतानि तथैव च । एता: पंचदशान्याश्च दशान्या दशभिस्तथा ॥ वालिखिल्या: ससप्रैषा: ससावर्णा: प्रकीर्तिता: । अष्टौ सामसहस्राणि सामानि च चतुर्दश ॥ आरण्यकं सहोमं च एतद्गायंति सामगा: । द्वादशैव सहस्राणि छंद आध्वर्यवं स्मृतं ॥ यजुषां ब्राह्मणानां च तथा व्यासो व्यकल्पयत् । सग्राम्यारण्यकं तस्मात्समंत्रकरणं तथा ॥ अत: परं कथानां तु पूर्वा इति विशेषणं । ग्राम्यारण्यं समंत्रं च ऋग्ब्राह्मणयजु: स्मृतं ॥ तथा हारिद्रवीयाणां खिलान्युपखिलानि तु । तथैव तैत्तिरीयाणां परक्षुद्रा इति स्मृतं ॥ द्वे सहस्रे शतन्यूने वेदे वाजिसनेयके । ऋग्गण: परिसंख्यातो ब्राह्मणं च चतुर्गुणं ॥ अष्टौ सहस्राणि शतानि चाष्टौ अशीतिरष्टाभ्यधिकश्च पाद: । एतत्प्रमाणं यजुषामृचां च सशुक्रियं साखिलयाज्ञवल्क्यं ॥ तथा चरणविद्यानां प्रमाणं संहितां शृणु । षट्सहस्रमृचामुक्तमृच: षड्विंशति: पुन: ॥ एतावदधिकं तेषां यजु: कामं विवक्षति । एकादशसहस्राणि दश चान्या दशोत्तरा: ॥ ऋचां दशसहस्राणि अशीतिं त्रिंशतानि च । सहस्रमेकं मंत्राणामृचामुक्तं प्रमाणत: ॥ एतावद्भृगुविस्तारमन्यच्चाथर्विकं बहु । ऋचामथर्वणां पंच सहस्राणीति निश्चय: ॥ सहस्रमन्यद्विज्ञेयमृषिभिर्विंशतिं विना । एतदंगिरसां प्रोक्तं तेषामारण्यकं पुन: ॥ इति संख्या प्रसंख्याता शाखाभेदास्तथैव च । कर्तारश्चैव शाखानां भेदहेतुस्तथैव च ॥ सर्वमन्वंतरेष्वेवं शाखाभेदा: समा: स्मृता: । प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे स्मृता: ॥ De vatum divinorum generibus, eorumque in singulis Manvantaris reditu. Desinit in hoc capite pars prior. 62 (fol. 155[b]). De Manvantaris et de creatione a Manubus singulis facta. De Prithuis Vainyae rebus gestis[1]. 63. De Prithuis prosapia. Dakshae origo. 64. Maríchae, Kasyapae filii, creatio. De Bhúr, Bhuvas, Svar mundis.

naiva kramena pratikshanam parinamamánáḥ paridriṣyante. Ataḥ siddham, kramányatvát pariṇámányatvam. Sarveshám chittádínám pariṇámasáráṇám kechid dharmáḥ pratyaksheṇaivopalabhyante, yathá sukhádayaḥ saṃsthánádayaṣ cha; kechich chaikántenánumánagamyá, yathá karmasaṃskáraṣaktiprabhṛitayo: dharmiṇaṣ cha bhinnábhinnarúpatayá sarvatránugamaḥ ॥ 15 ॥ परिणामत्रयसंयमादतीतानागतज्ञानं ॥१६॥ शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं । Eshám ṣabda-artha-jnánánáṃ vyavahára itaretarádhyásád bhinnánám api buddhyaikarúpatápádanát saṃkírṇatvam. Tathá hi. Gám ánayety uktaḥ kaṣchid, *a.* golakshaṇam arthaṃ gotvajátyavachhinnaṃ sásnádimatpiṇḍarúpaṃ, *b.* ṣabdaṃ cha tadváchakaṃ, *c.* jnánaṃ cha tadgráhakam *abhedenaivá*dhyavasyati; na tv *a.* asya goṣabdo váchako, *b.* 'yaṃ goṣabdasya váchyas, *c.* tayor idaṃ gráhakaṃ jnánam iti *bhedena* vyavaharati. Tathá hi, ko 'yam arthaḥ, ko 'yaṃ ṣabdaḥ, kim idaṃ jnánam iti pṛishṭaḥ sarvatraikarúpam evottaraṃ dadáti 'gaur' iti. Sa yady ekarúpatáṃ na pratipadyate, katham ekam uttaram prayachhati? Evaṃ tasminn avasthite yo 'yam pravibhága, 'idaṃ ṣabdasya tattvaṃ yad váchakatvaṃ náma, idam arthasya (scil. tattvam) yad váchyatvam, idaṃ jnánasya yat prakáṣakatvam' iti pravibhágaṃ vidháya, tasmin pravibhága yaḥ saṃyamaṃ karoti, tasya sarveshám bhútánám etc. ॥ 17 ॥ संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं । dvividháṣ chittasya vásanárúpáḥ saṃskáráḥ. Kechit smṛitimátrotpádanaphaláḥ, kechij játyáyurbhogalakshaṇavipákahetavo, yathá dharmádharmákhyáḥ. Teshu saṃskáreshu yadá saṃyamaṃ karoti, 'evam mayá so 'rtho 'nubhúta, evam mayá sá kriyá nishpáditá' iti púrvakṛitaṃ sarvam anusaṃdadháno bhávanayaiva, prabodhakam antareṇodbuddhasaṃskáraḥ, sarvam atítaṃ smarati ॥ 18 ॥ प्रत्ययस्य परचित्तज्ञानं । pratyayasya parachittasya kenachin mukharágádiná lingena gṛihítasya yadá saṃyamaṃ karoti, tadá parakíyasya chittasya jnánam utpadyate. Sarágam asya chittaṃ vítarágaṃ veti parachittagatán sarván eva dharmán jánáti ॥ 19 ॥[1] न च सालंबनं तस्याविषयीभूतत्वात् । tasya parasya yach chittaṃ sálambanaṃ svakíyálambanena sahitaṃ, [tan] na ṣakyate jnátum, álambanasya kenachil lingenávishayíkṛitatvál, *lingách* chittabhávamátram parasyávagataṃ, na tu *níla*vishayam asya chittam *píta*vishayam iti vá ॥ 20 ॥ कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंयोगेऽन्तर्धानं । káyaḥ ṣaríraṃ, tasya rúpam chakshurgráhyo guṇaḥ. Tasmin káye rúpam iti saṃyamát, tasya rúpasya chakshurgráhyatvarúpá yá ṣaktis, tasyáḥ stambhe (bhávanávaṣát pratibandhe) chakshuḥprakáṣásaṃyoge, chakshushaḥ prakáṣaḥ sattvadharmas, tasyásaṃyoge, tadgrahaṇasya vyápárábháve yogino 'ntardhánam bhavati ॥ 21 ॥ एतेन शब्दाद्यंतर्धानमुक्तं ॥२२॥ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा । áyurvipákaṃ yat púrvakṛitaṃ karma tad dviprakáraṃ: sopakramaṃ nirupakramaṃ cha. Tatra *sopakramaṃ* yat phalajananáya sahopakrameṇa káryakáraṇábhimukhyena vartate, yathoshṇapradeṣe prasáritam árdravastraṃ ṣíghram eva ṣushyati. Uktarúpaviparítaṃ *nirupakramaṃ*, yathá tad evárdraṃ vásaḥ saṃvartitam anushṇadeṣe chireṇa ṣosham eti. Tasmin dvividhe karmaṇi yaḥ saṃyamaṃ karoti, 'kim mama karma ṣíghravipákaṃ, kiṃ chiravipákam' ity avadhánadárḍhyád aparántajnánam asyotpadyate. Aparántaḥ ṣaríraviyogas, tasmin jnánam: amushmin kále 'mushmin deṣe mama ṣaríraviyogo bhavishyatíti niḥsaṃṣayaṃ jánáti. *Arishṭebhyo vá.* Arishṭáni trividháni, ádhyátmikádhibhútádhidaivikabhedena. Tatra *a.* ádhyátmikáni, pihitakarṇaḥ kaushṭhasya váyor ghoshaṃ na ṣṛiṇotíty evamádíni, *b.* ádhibhautikány, akasmád vikṛitapurushadarṣanádíni, *c.* ádhidaivikány, akáṇḍa eva drashṭum aṣakyasvargádipadárthadarṣanádíni. Tebhyaḥ ṣaríraviyogakálaṃ jánáti ॥ 23 ॥ मैत्र्यादिषु बलानि । maitríkaruṇámuditásu yo vihitaḥ saṃyamas tasya baláni tásám maitryádínáṃ sambandhíni prádurbhavanti. Maitríkaruṇámuditás tathásya prakarshaṃ gachhanti, yathá sarvasya mitratvádikaṃ sampratipadyate ॥ 24 ॥ बलेषु हस्तिबलादीनि ॥२५॥ प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं । pravṛittir vishayavatí (1, 35) jyotishmatí cha (1, 36). Tasyáṃ yo 'sáv *álokaḥ* sáttvikaprakáṣaprasaras tasya nikhileshu vishayeshu *nyását* tadárúpitánáṃ vishayáṇám bhávanát sántaḥkaraṇeshv indriyeshu prakṛishṭaṣaktitám ápanneshu *súkshmasya* paramáṇváder, *vyavahitasya* bhúmyantargatasya nidhánáder, *viprakṛishṭasya* megháder, aparapárṣvavartino rasáyanáder jnánam utpadyate ॥ 26 ॥ भुवनज्ञानं सूर्ये संयमात् ॥२७॥ चंद्रे ताराव्यूहज्ञानं । vyúho viṣishṭaḥ saṃniveṣaḥ ॥ 28 ॥ ध्रुवे तद्गतिज्ञानं ॥२९॥ नाभिचक्रे कायव्यूहज्ञानं । ṣaríra[madhya]varti nábhisaṃjnakaṃ yat shoḍaṣáraṃ chakraṃ tasmin kṛitasaṃyamasya yoginaḥ káyagato yo 'sau vyúho viṣishṭarasamaladhátunáḍyádínám avasthánaṃ, tatra jnánam utpadyate. Nábhichakraṃ ṣarírasya madhyavarti sarvataḥ prasṛitánáṃ náḍyádínám múlabhútam, atas tatra kṛitávadhánasya samagraḥ saṃniveṣo yathávad ábháti ॥ 30 ॥ कंठकूपे क्षुत्पिपासादिनिवृत्तिः ॥३१॥ कूर्मनाड्यां स्थैर्यं । kaṇṭhakúpasyádhastád dṛiḍhá kúrmákhyá náḍí ॥ 32 ॥ मूर्धज्योतिषि सिद्धदर्शनं । ṣiraḥkapále brahmarandhrákhyaṃ chhidram prakáṣádháratváj jyotiḥ. Yathá guhábhyantarasthasya maṇeḥ prasarantí prabhá kunchikávivarapradeṣe saṃghaṭate, tathá hṛidayasthaḥ sáttvikaḥ prakáṣaḥ prasṛitaḥ sampiṇḍitatvam bhajate. Tatra kṛitasaṃyamasya ye dyávápṛithivyor antarálavartinaḥ *siddhá*

[1] Mirabilis profecto haec facultas foret, et homine statum 'ecstaticum' subeunte vix digna.

divyáḥ purushás teshám itarapráṇyadṛiṣyánáṃ tasya darṣanam bhavati. Tán paṣyati taiṣ cha saha sambháshate ॥ 33 ॥ प्रातिभाद्वा सर्वं । sarvanimittánapeksham manomátrajanyam avisaṃvádakaṃ jaṭity utpadyamánaṃ jnánam pratibhá. Tasyáṃ saṃyame kriyamáṇe prátibhaṃ vivekakhyáteḥ púrvabhávi tárakaṃ jnánam udeti ॥ 34 ॥ हृदये चित्तसंवित् ॥ ३५ ॥ सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानं । *Sattvam* prakáṣasukhátmakaḥ prádhánikaḥ pariṇámaviṣeshaḥ, *purusho* bhoktr-adhishṭhátṛirúpaḥ. Tayor bhogyabhoktṛirúpatvách chetanáchetanatvách chátyantásaṃkírṇatvam, bhinnatvam ity arthaḥ. Tayor yaḥ pratyayasyáviṣesho bhedenápratibhásanaṃ, tasmát sattvasyaiva kartṛitápratyayatayá sukhaduḥkhasaṃvit sá bhogaḥ. Sattvasya svárthanairapekshyeṇa *parárthaḥ* purushárthaniḥsṛitaḥ. Tasmád anyo yaḥ *svárthaḥ* purushasvarúpamátrávalambanaḥ parityaktáhaṃkáre sattve yá chichháyásaṃkrántiḥ, tatra kṛitasaṃyamasya purushavishayaṃ jnánam utpadyate. Tad evaṃrúpaṃ sválambanajnánaṃ sattvásattvanishṭham purusho jánáti, na punaḥ purusho jnátá jnánasya vishayabhávam ápadyate jneyatvápatter, jnátṛijneyayoṣ chátyantavirodhát ॥ 36 ॥ ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायंते । *ṣrávaṇam* ṣrotrendriyajaṃ jnánaṃ, *vedaná* sparṣanendriyajaṃ jnánam, *ádarṣaṣ* chakshurindriyajaṃ jnánam, *ásvádo* rasanendriyajaṃ jnánaṃ, *várttá* gandhasaṃvittiḥ ॥ 37 ॥ ते समाधावुपसर्गा व्युत्थाने सिद्धयः । Te prák pratipáditáḥ phalaviṣesháḥ samádheḥ prakarshaṃ gachata upasargá upadravá vighnakáriṇaḥ, tatra harshavismayádikáraṇena samádhiḥ ṣithilíbhavati. *Vyuttháne* punar vyavaháradaṣáyáṃ viṣishṭaphaladáyakatvát siddhayo bhavanti ॥ 38 ॥ बंधकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः । yadá samádhivaṣád bandhakáraṇaṃ dharmádharmákhyaṃ karma ṣithilam bhavati tánavam ápadyate, chittasya yo 'sau pracháro hṛidayapraveṣád indriyadváreṇa vishayábhimukhyena prasaras, tasya saṃvedanaṃ jnánam (iyaṃ chittavahá náḍí, anayá chittaṃ vahati, iyaṃ rasapráṇádivahábhyo náḍíbhyo vilakshaṇá, iti svaparaṣarírayor yadá ṣarírasaṃcháraṃ jánáti) tadá etc. ॥ 39 ॥ उदानजयाज्जलपंककंटकादिष्वसंग उत्क्रांतिश्च ॥ ४० ॥ समानजयात्प्रज्वलनं । tejasá jvalann iva yogí pratibháti ॥ 41 ॥ श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं । sambandho deṣadeṣibhávalakshaṇaḥ ॥ 42 ॥ कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं । laghuni túládau samápattiṃ tanmayím bhávalakshaṇáṃ vidháya, práptátyantalaghubhávo yogí prathamaṃ yathárucbi jale saṃcharan etc. ॥ 43 ॥ बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः । ṣarírád bahir yá manasaḥ ṣaríranairapekshyeṇa vṛittiḥ sá *mahávidehá* náma nirgataṣaríráhaṃkáradárḍhyadváreṇochyate. Tatas tasyáṃ kṛitát saṃyamát *prakáṣávaraṇakshayaḥ*, sattvikasya chittasya yaḥ prakáṣas tasya yad ávaraṇam kleṣakarmádi tasya kshayaḥ pravilayo bhavati ॥ 44 ॥ स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः । panchánám pṛithivyádibhútánáṃ ye panchávastháviṣesharúpá dharmáḥ sthúlatvádayas, tatra kṛitasaṃyamasya bhútajayo bhavati. Prathamaṃ sthúlarúpe saṃyamaṃ vidháya tadanu súkshmarúpe ity evaṃ krameṇa etc. ॥ 45 ॥ ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च । *aṇimá* paramáṇurúpatápattir, *mahimá* mahattvaṃ, *laghimá* laghutvaṃ (túlapiṇḍaval laghutvapráptir), *garimá* gurutvapráptir (angulyagreṇa chandrádisparṣanaṣaktiḥ), *prákámyam* ichhánabhighátaḥ (ṣarírántaḥkaraṇeṣvaratvam), *íṣitvaṃ* sarvatra prabhavishṇutá, *vaṣitvaṃ* sarváṇám eva bhútánám anugámitvát, *yatrakámávasáyo*, yasmin vishaye 'sya káma ichhá bhavati, tasmin vishaye yogino 'vasáyo bhavati (taṃ vishayasvíkáradváreṇábhiláshasamáptiparyantaṃ nayatíty arthaḥ)[1]. Tasya káyasya ye dharmá rúpádayas, teshám *anabhigháto* náṣo násya kutaṣ chid api bhavati: násya rúpam agnir dahati, na cha váyuḥ ṣoshayatítyádi yojyam ॥ 46 ॥ रूपलावण्यबलवज्रसंहननानि कायसंपत् । vajravat kaṭhiná saṃhatir asya ṣaríre bhavati ॥ 47 ॥ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः । grahaṇam indriyáṇáṃ vishayábhimukhíkṛitiḥ ॥ 48 ॥ ततो मनोजवित्वं विकरणभावः प्रधानजयश्च । káyanirapekshánáṃ indriyáṇáṃ vṛittilábho *vikaraṇabhávaḥ*, sarvavaṣitvam *pradhánajayaḥ*. Etáḥ siddhayo jitendriyasya prádurbhavanti, táṣ chásmin ṣástre *madhupratíká* ity uchyante ॥ 49 ॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च । Tasmin ṣuddhe sáttvikapariṇáme kṛitasaṃyamasya yá sattvapurushayor utpadyate vivekakhyátir guṇáṇáṃ kartṛitvábhimánaṣithilíbhávarúpá tanmáhátmyát tatraiva sthitasya yoginaḥ sarvabhávádhishṭhátṛitvaṃ sarvajnátṛitvaṃ cha samádhir bhavati[2] ॥ 50 ॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यं । tasyám api *viṣokáyáṃ* siddhau yadá vairágyam utpadyate yoginas, tadá tasmád dosháṇáṃ rágádínáṃ yad víjam avidyá, tasyáḥ kshaye nirmúlane kaivalyam átyantikí duḥkhanivṛittiḥ ॥ 51 ॥ स्थान्युपमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात् । chatváro yogino bhavanti. Tatra *abhyásaván* pravṛittamátrajyotiḥ prathama, *ṛitambharáprajno* dvitíyo, *bhútendriyajayí* tṛitíyo, *'tikrántabhávaníyaṣ* chaturthaḥ. Tasya chaturthasya samádhibhútasaptavidhaprántabhúmiprajnasyántyám *madhumatí*-saṃjnám bhúmikáṃ sákshátkurvataḥ, *sthánino* devá upanimantrayitáro bhavanti (divyastrírasáyanádinotkaṇṭhayantíti). Tasminn upanimantraṇe nánena sangaḥ kartavyo, nápi smayaḥ. Sangakaraṇe punar vishayabhoge patati, smayakaraṇe kṛitakṛityam átmánam manyamáno na samádháv utsahate ॥ 52 ॥ क्षणतत्क्रमयोः संबंधसंयमाद्विवेकज्ञानं । kshaṇaḥ

---

[1] Vid. supra p. 51[a].

[2] Ea facultas *viṣoká* appellatur.

sarvántyaḥ kálávayavo, yasya kaláḥ pravibhaktuṃ na ṣakyante. Tathávidhánáṃ kálakshaṇánáṃ yaḥ kramaḥ paurváparyeṇa pariṇámas tatra saṃyamát práguktavivekajaṃ jnánam utpadyate ॥53॥ जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः । padárthánáṃ bhedahetavo játi-lakshaṇa-deṣá bhavanti. Yatra punar bhedo 'vadhárayituṃ na ṣakyate, yathaika*deṣa*sthitayoḥ *ṣuklayoḥ párthivayoḥ* paramáṇvos, tathávidhe vishaye *bhedáya* kṛitasaṃyamasya yadá bhedena jnánam upajáyate, tadá tadabhyását súkshmáṇy api tattváni bhedena pratipadyate ॥54॥ तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं । *sarvathávishayaṃ* sarvábhir avasthábhiḥ sthúla-súkshmádibhedena tais taiṣ cha pariṇámaiḥ sarveṇa prakáreṇávasthitáni tattváni vishayo 'sya. *Akramaṃ cheti* niḥṣeshajnánávasthápariṇámanyúnádhikabhávagrahaṇe násya kramo vidyata ity akramaṃ, sarvaṃ karatalámalakavad yugapat paṣyatíty arthaḥ ॥55॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यं ॥56॥

De eaque *solitate,* sive perfecta animi a corporis vinculis emancipatione, capite ultimo agitur.

Commentarius subscriptionibus quidem *Bhojae, Dhárae regi,* tribuitur, haec enim in capitum fine leguntur: इति श्रीमहाराजाधिराजश्रीभोजदेवविरचितायां राजमार्तंडाभिधानायां sive इति श्रीधारेश्वरविरचितायां etc. Sed prudentes his non fallentur, neque eidem humero regio lexicon, librum grammaticum, rhetoricum, philosophicum, veterinarium imponent. Idem commentarius in codice E. I. H. 2427. exstat, sed nostro multo corruptior, eoque in textu constituendo usus sum.

Haec pars anno 1678 satis accurate exarata est. (Mill 61[b].)

562.

Opuscula duo. Lit. Devan. Charta Ind. Foll. 74. Long. 9. Lat. 4. Linn. 7.

Foll. 1–57. *Yogasárasangrahas,* doctrinae yogicae brevis expositio, a *Vijnána* áchárya scripta. Incipit: ओं युंजे वाचा । ँ शतपदीम् etc.

I. *samádhi* fol. 15[b], *sádhana* fol. 38[a], *siddhi* fol. 47[a], *kaivalya* fol. 56[a]. Capitis quarti subscriptione libellus *Jnánapradípa* appellatur.

Opera sua auctor haec laudat: *Yogavárttika, Sánkhyasára, Brahmádarṣa.* Cf. fol. 49[b]:

योगशास्त्रस्य सारार्थः संक्षेपेणायमीरितः ।
नातोऽधिको मुमुक्षूणामपेक्ष्यो योगदर्शने ॥
सांख्यसारप्रकरणे विवेको बहुवर्णितः ।
नातः प्रपंच्यते सोऽत्र ग्रंथबाहुल्य[भीति]तः ॥
ब्रह्मप्रकरणे ब्रह्मादर्शादावीश्वरो[1]ऽपि च ।
वर्णितो वर्ण्यते नात्र ग्रंथसंक्षेपकाम्यया ॥

Haec voluminis pars post annum 1810 parum accurate exarata est. (Wilson 481[a].)

563.

Foll. 50–112. Linn. 4–6. *Yogavásishthasáras,* Yogavásishthae medulla, cum brevi *Mahídharae* annotatione. (A.) Libellus sententias, quibus numinis cognitio commendatur, e majore opere excerptas et in capita (prakaraṇa) decem divisas continet. Primum paulum emendatum subjeci:

दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्त्तये । स्वानुभूत्येकमानाय नमः शांताय चेतसे ॥१॥ अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः । नात्यंतमज्ञो नो तज्ज्ञः सोऽस्मिन् शास्त्रेऽधिकारवान् ॥२॥ यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् । तावन्न सद्गुरुं कश्चित्सच्छास्त्रं वापि नो लभेत् ॥३॥ महानुभावसंपर्कात्संसारार्णवलंघने । युक्तिः संप्राप्यते राम दृढा नौरिव नाविकात् ॥४॥ संसारदीर्घरोगस्य सुविचारो महौषधं । कोऽहं कस्य च संसारो विवेकेन विलीयते ॥५॥ यस्मिन्देशे हि तज्ज्ञो नास्ति सज्जनपादपः । सफलः शीतलच्छायो न तत्र दिवसं वसेत् ॥६॥ सदा संतोऽभिगंतव्या यद्यप्युपदिशंति न । या हि स्वैरकथास्तेषामुपदेशा भवंति ताः ॥७॥ शून्यमापूर्णतामेति मृत्युरप्यमृतायते । आपत्संपदिवाभाति विद्वज्जनसमागमात् ॥८॥ ज्ञानिनामपि चित्तं चेत्केवलात्मसुखोदितं । सत्त्वाः संसारदुःखार्ताः कं यांति शरणं तदा ॥९॥ तज्ज्ञानं स च शास्त्रार्थस्तद्विज्ञानमखंडितं । सच्छिष्याय विरक्ताय सद्यो यदुपदिश्यते ॥१०॥ उपदेशक्रमो राम व्यवस्थामात्रपालनं । ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव केवला ॥११॥ न शास्त्रैर्नापि गुरुणा दृश्यते परमेश्वरः । दृश्यते स्वात्मनैवात्मा स्वया सत्त्वस्थया धिया ॥१२॥ सर्वा एव कला जंतोरनभ्यासेन नश्यति । इयं ज्ञानकला त्वंतः सकृज्जाताभिवर्धते ॥१३॥ स्वकंठेऽपि स्थितं वस्तु यथा न प्राप्यते भ्रमात् । भ्रमते प्राप्यते तद्वदात्मापि गुरुवाक्यतः ॥१४॥ स्वस्वरूपमजानन्वै जनोऽयं दैववर्जितः । विषये तु सुखं वेत्ति पश्चात्पाके विषान्नवत् ॥१५॥ बुद्ध्वाप्यत्यंतवैरस्यं यः पदार्थेषु दुर्मतिः । बध्नाति भावनां भूयो नरो नासौ स गर्दभः ॥१६॥ यत्किंचिदपिसंकल्पान्नरो दुःखे निमज्जति । नकिंचिदपिसंकल्पात्सुखमक्षयमश्नुते ॥१७॥ यथा स्वप्नमुहूर्ते स्याच्छतसंवत्सरभ्रमः । तथा मायाविलासेन जायते जाग्रति भ्रमः ॥१८॥ योऽंतःशीलया बुद्ध्या रागद्वेषविमुक्तया । साक्षिवत्पश्यतीदं हि जीवितं तस्य शोभते ॥१९॥ येन सम्यक्परिज्ञातं हेयोपादेयमुज्झता । चित्तस्यांते स्थितं चित्तं जीवितं तस्य शोभते ॥२०॥ हृदयाकाशमात्रस्य विनाशो देहनाशतः । व्यर्थं भूतानि शोचंति नष्ट आत्मेति शंकया ॥२१॥ घटादिषु प्रनष्टेषु यथाकाशमखंडितं । तथा देहेषु नष्टेषु देही नित्यमलेपकः ॥२२॥ न जायते म्रियते वा क्वचित्किंचित्कदाचन । जगद्विवर्तरूपेण केवलं ब्रह्म जृंभते ॥२३॥ आकाशादपि विस्तीर्णः शुद्धः सूक्ष्मोऽव्ययः शिवः । य आत्मा स कथं

[1] ब्रह्माददर्शादावीश्वरो MS.

राम जायते म्रियतेऽथ वा ॥२४॥ सर्वमेकमिदं शांतमादिमध्यांतवर्जितं। भावाभावविनिर्मुक्तमिति मत्वा सुखी भव ॥२५॥ वरं शरावहस्तस्य चांडालागारवीथिषु। भिक्षार्थमटनं राम न मौर्ख्यहतजीवितं ॥२६॥ न व्याधिर्न विषं तापस्तथान्यद्वापि भूतले। दुःखाय स्वशरीरोत्थं मौर्ख्यमेतद्यथा नृणां ॥२७॥

Sequuntur capita: 2. *jaganmithyátva*; 3. *jívanmukti-phalaka-tattvajnána*; 4. *manolaya*; 5. *vásanopaṣamana*; 6. *átmamanana*; 7. *ṣuddhinirúpaṇa*; 8. *átmárchana*; 9. *átmanirúpaṇa*. Caput decimum, *jívanmuktinirúpaṇa* appellatum, incipit:

दृश्यदर्शनसंबंधान्न भवेत्परमं सुखं। ब्रह्मैकांते विचिंत्याहं मनोनाशः परं पदं ॥१॥ दृश्यदर्शनसंबंधे सुखसंविदनुत्तमा। दृश्यसंवलितो बंधस्तन्मुक्त्या मुक्तिरुच्यते ॥२॥ शुद्धं सदसतोर्मध्ये पदं लब्ध्वावलंब्य तत्। सवाह्याभ्यंतरं विश्वं मा गृहाण विमुंच मा ॥३॥ जडाजडदृशोर्मध्ये यत्तत्वं पारमार्थिकं। अनंताकाशहृदयं तत्सदाश्रय सर्वदा ॥४॥

Mahídharae commentarius incipit: लक्ष्मीकांतं नमस्कृत्य यथामति विरच्यते। वासिष्ठसारविवृतिः परोपकृतये मया ॥१॥ वसिष्ठेन यतींद्रेणोपदिष्टाद्राघवं प्रति। सारमुद्धृतवान् *kaṣchit* ब्रह्मविद्यामहार्णवात् ॥२॥

Haec folia seculo superiore medio exarata sunt. (Mill 74^d.)

564.

Opuscula quinque. Lit. Devan. Charta Ind. Foll. 92. Long. foll. 1–55. 11. foll. 56–71. 10. foll. 72–92. 9. Lat. 4½.

Foll. 1–31. Linn. 9. *Yogavasishṭhasáras* cum Mahídharae commentario. (B.) Commentarius passim decurtatus est.

De codicibus Berolinensibus cf. Weber Catal. p. 186.

Haec folia post annum 1820 exarata sunt. (Mill 62^a.)

565.

Lit. Bengal. Charta Ind. Foll. 18. Long. 9. Lat. 3½. Linn. 6–8.

Vasishṭhasanhitá, libellus capitibus quatuor constans, quo, forma dialogi a Vasishṭha cum Ṣakti filio habiti, *yogae* principia traduntur. Incipit:

सर्वज्ञानमयो यस्मान्मुक्तो हं स्यां सदा सुखी।
पुत्रेनैवं पिता पृष्टः शक्तिना वेदवादिना।
मुनिरालोक्य नेत्राभ्यां वाक्यमेतदुवाच ह।
उत्तिष्ठोत्तिष्ठ भद्रन्ते शक्तिर्वुद्धिमताम्वर।
वक्ष्यामि सर्व्वसुखदमुपायं भवनाशनं।
इत्युक्त्वा भगवान् योगी वशिष्ठो ब्रह्मवित्तमः।
ध्यायेन्नारायणं देवं सर्व्वभूतहृदि स्थितं। etc.

Opusculi argumentum his versibus declaratur:

यमश्च नियमश्चैव तथासनमपीष्यते।
प्राणायामस्तथा युक्तः प्रत्याहारश्च धारणा ॥
ध्यानं समाधिरेतानि योगांगानि तपोधन।
आदौ चत्वारि वाह्यानि तद्वदभ्यंतराणि च ॥
यमश्च दशधा प्रोक्तो नियमाश्च तथा दश।
आसनानि च सर्वेषामुत्तमानि तथा दश ॥
तेषूत्तमानि चत्वारि सूक्ष्मरूपाणि यानि च।
प्राणायामो द्विधा प्रोक्तः प्रत्याहारश्चतुर्विधः ॥
धारणा पंचधा प्रोक्ता ध्यानं षोढा प्रकीर्तितं।
समाधिस्तावतः प्रोक्तो ध्यानं च द्विविधं पृथक् ॥

Singulae igitur partes sequentibus accuratius sed brevissime exponuntur.

In fine capitum hic titulus subscriptus est: इति योगशास्त्रे वशिष्ठसंहितायां etc.

Codex post annum 1810 exaratus est. (Wilson 483.)

566.

Lit. Devan. Charta Ind. Foll. 51. Long. 9. Lat. 3½. Linn. 5, 6.

Inest in hoc codice libellus ab *Átmáráma* sive *Svátmáráma*[1] de *Haṭhayoga*, i. e. meditationis abstrusae specie quadam, *violentis* animi a rebus externis revocandi rationibus exercendae, compositus et *Haṭhapradípiká* appellatus. Incipit:

श्रीआदिनाथाय नमो स्तु तस्मै येनोपदिष्टा हठयोगविद्या।
विराजते प्रोन्नतराजसौधमारोढुमिच्छोरधिरोहिणीव ॥१॥
प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण धीमता।
केवलं राजयोगाय हठविद्योपदिश्यते ॥२॥
भ्रांत्या बहुमतध्वांते राजयोगमजानतः।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥३॥

Versibus sequentibus ejusdem doctrinae (haṭhavidyá) magistros enumerat, quos versus ita dedi ut in codice leguntur, variantes codicis Berolinensis, e *Weberi* Catal. p. 196 excerptas, et cod. E. I. H. 1725 (Lond.) lectiones in calce adjunxi:

हठविद्यां हि मत्स्येंद्रगोरक्षादि (°dyá) विजानते।
आत्मारामो थवा योगी जानीते तत्प्रसादतः ॥४॥
marg. शांबरा
श्रीआदिनाथमत्स्येंद्रशारदानंदभैरवाः।
चौरंगी मीनगोरक्षविरूपाक्षबिलेशयाः ॥५॥
मंथानभैरवो योगी सिद्धबुद्धश्च कंथडि[2]।
पौरंठकः सुरानंदः सिद्धपादश्च चर्पटी[3] [६]

[1] De profano auctoris nomine non constat.

[2] शुद्धबुद्धश्चुकंदली Berol. सिद्धबुद्धश्च कंथरिः Lond.

[3] पुराटंकः सुरानंदः शुद्धपादश्च चर्पटिः Berol. Deest versus in Lond.

कनेरी पूज्यपादश्च नित्यनाथो निरंजनः[1] ।
कपाली बिंदुनाथश्च काकचंडीश्वराद्यः ॥७॥
अल्ल
सक्षमः प्रभुदेवश्च घोडाचोली च टिंटिणि[2] ।
भा
वालुकिर्नागबोधश्च चंडकापालिकस्तथा[3] ॥८॥
इत्यादयो महासिद्धा हठयोगप्रभावतः ।
खंडयित्वा कालदंडं ब्रह्मांडे विचरंति ते ॥९॥

Libellus in quatuor capita, *upadeṣa* appellata, distributus est, quorum primum 72, secundum 76, tertium 100, quartum 83 disticha continet.

Primo capite de ascetae casa (maṭha), vivendi ratione, praecipue vero de variis sedendi modis (ásana) disseritur. Dist. 20. sedendi rationes nonnullae, quibus *Vasishṭha, Matsyendra*, alii usi sunt, enumerantur. Nomina earum: *svastikam* (22), *gomukham* (23), *vírásanam* (24), *kúrmásanam* (25), *padmásanam* (26), *kukkuṭásanam* (26), *uttánakúrmakam* (27), *dhanurásanam* (28), *ṣrí-Matsyanáthoditam ásanam* (29), *paṣchimatánam* (31), *mayúram* (32). A Ṣiva 84 sessiones traditae sunt, quarum in numero quatuor, *siddhásanam* (39. ab aliis vajrásanam, muktásanam, guptásanam appellatum), *padmam* (49), *sinhásanam* (55), *bhadram* (58. etiam Gorakshásanam appellata), efficacissimae sunt. Meditationis mysticae fructus duodecim annorum studio obtinentur (44).

Secundo capite de spiritu moderando agitur. Incipit:

अथासने वशी योगी दृढं हितमिताशनः ।
गुरूपदेशमार्गेण प्राणायामं समभ्यसेत् ॥१॥
चले वाते चलं चित्तं निश्चले निश्चलं तथा ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् ॥२॥
यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते ।
मरणं तस्य निष्क्रांतिस्ततो वायुं निरोधयेत् ॥३॥

Quae tormenta absurda et incredibilia superstitionis suae causa ne terrae Indicae quidem fanatici subire fastidierint, his sex operibus apparebit:

धौती वस्ती तथा नेती त्राटकं नौलिकं तथा ।
कपालभाती चैतानि षट् कर्माणि समाचरेत् ॥२३॥
कर्मषट्कमिदं प्रोक्तं घटशोधनकारकं ।
विचित्रगुणसंधायि पूज्यते मुनिपुंगवैः ॥२४॥

अथ धौती ॥

चतुरंगुलिविस्तारं सितं वस्त्रं शनैर्ग्रसेत् ।
पुनः प्रत्याहरेदेतदभ्यासाद्धौतिकर्मवित् ॥२५॥
कासश्वासप्लीहकुष्ठं कफरोगश्च विद्रधिः ।
धौतीकर्मप्रभावेन प्रयांत्येव न संशयः ॥२६॥

अथ वस्ती ॥

नाभिदघ्ने जले पायुन्यस्तनालोत्कटासनः ।
आधाराकुंचनं कुर्यादपानाद्वस्तिकर्मवित् ॥२७॥
गुल्मः प्लीहोदरं चापि वातपित्तकफोद्भवाः ।
वस्तिकर्मप्रभावेन वार्यंते सकलामयाः ॥२८॥
धात्विंद्रियांतःकरणप्रसादं दद्याच्च कांतिं दहनप्रदीप्तिं ।
अशेषदोषोपचयं निहन्यादभ्यस्यमानं जलवस्तिकर्म ॥२९॥

अथ नेती ॥

सूत्रं वितस्तिसुस्निग्धं नासानाले प्रवेशयेत् ।
मुखान्निर्गमयेत्साहि नेती सिद्धैर्निगद्यते ॥३०॥
कपालशोधनी चैव दिव्यदृष्टिप्रदायिनी ।
जानूर्ध्वजातरोगौघान् (jánúru?) जयत्याशु स नेतिवित् ॥३१॥

अथ त्राटकं ॥

निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः ।
अश्रुसंपातपर्यंतमाचार्यैस्त्राटकं मतं ॥३२॥
मोटकं नेत्ररोगाणां निद्रादीनां कपाटकं ।
एतच्च त्राटकं गोप्यं यथा हाटकपेटकं ॥३३॥

अथ नौलिकं ॥

अमंदावर्तवेगेन तुंदं सव्यापसव्ययोः ।
नतांसो भ्रामयेदेषा नौली योगे प्रचक्ष्यते ॥३४॥
मंदाग्निसंदीपनपाचनाग्निसंधानिकानंदकरी तथैव ।
अशेषदोषामयशोषणी च हठक्रियामौलिरियं हि नौली ॥३५॥

अथ कपालभाती ॥

भस्त्रेव लोहकाराणां रेचपूरौ ससंभ्रमौ ।
कपालभाती विख्याता कफशोषविशोषिणी ॥३६॥

Spiritus moderandi rationes tres, species singularum haud paucae:

प्राणायामस्त्रिधा प्रोक्तो रेचकपूरककुंभकैः ।
सहितः केवलश्चेति कुंभको द्विविधः मतः ॥६८॥
आरेच्य पूरं यत्कुर्यात्स वै सहितकुंभकः ।
यावत्केवलसिद्धिः स्यात्तावत्सहितमभ्यसेत् ॥६९॥
रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणं ।
प्राणायामोऽयमित्युक्तः स वै केवलकुंभकः ॥७०॥
केवले कुंभके सिद्धे रेचपूरकवर्जिते ।
न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥७१॥
शुद्धः केवलकुंभेन यथोक्तं वायुधारणं ।
Rájayogapadam चैव लभते नात्र संशयः ॥७२॥

---

[1] कानेरीपूर्वपादश्च ध्वनिनाथो निरंजनः Berol. करणी पूज्यपादश्च बिल्वनाथो निरंजनाः Lond.

[2] अल्लमः प्रभुदेवश्च घोडाचोली च टिंटिणिः Berol. सुक्षामः प्रभुदेवश्च घोनाराली घ टिंठिनिः Lond.

[3] भालुकी नागबोधश्च पंडकापालिकस्तथा Berol. वालुकि° etc. ut noster, Lond.

हठं विना राजयोगो राजयोगं विना हठः ।
न सिध्यति ततो युग्ममा निष्पत्तेः समभ्यसेत् ॥७३॥
कुंभकं प्राणरेचांते कुर्याच्चित्तं निराश्रयं ।
एवमभ्यासयोगेन राजयोगपदं लभेत् ॥७४॥[1]
कुंभकात्कुंडलीबोधः कुंडलीबोधतो भवेत् ।
अनर्गला सुषुम्णा च हठसिद्धिश्च जायते ॥७५॥

Capite tertio varii et pedum et manuum gestus tractantur, cum spiritu moderando conjuncti, eum ad usum exercendi, ut *kuṇḍalí* vel *kuṇḍaliní*, quae mystica quaedam potestas est, suscitetur:

सशैलवनधात्रीणां यथाधारो हि नायकः ।
सर्वेषां योगतंत्राणां तथाधारो हि कुंडली ॥१॥
सुप्ता गुरुप्रसादेन बोधिता सुखदा भवेत् ।
तदा सर्वाणि दामानि भिद्यंते ग्रंथयोऽपि च ॥२॥
Práṇasya ṣúnyapadaví तदा राजपथायते ।
तदा चित्तं निरालंबं तदा कालस्य वंचनं ॥३॥

Ṣúnyapadavíti kim.

Sushumṇá, ṣúnyapadaví, brahmarandhram, mahápatham।
Ṣmaṣánaṃ, ṣámbhaví, mudrámárgaṣ[2] chety ekaváchakam [॥४॥
तस्मात्सर्वप्रयत्नेन तां बोधयितुमीश्वरीं ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासेन बोधयेत् ॥५॥

10 18 22 30
महामुद्रा महाबंधो महावेधश्च खेचरी ।
55 47 63
उड्डीयानं मूलबंधो बंधो जालंधराभिधः ॥६॥
68
करणी विपरीताख्या वज्रोली[3] शक्तिचालनं ।
एतद्धि मुद्रादशकं जरामरणनाशनं ॥७॥

De Kuṇḍaliní haec conferantur: कुटिलांगी कुंडलिनी भुजंगी शक्तिरीश्वरी । कुटिलारुंधती देवी शब्दाः पर्यायवाचकाः ॥ उद्घाटयेत्कपाटं तु यथा कुंचिकया हठात् । कुंडलिन्या तथा योगी मोक्षद्वारं विभेदयेत् ॥ येन द्वारेण गंतव्यं ब्रह्मस्थानं निरामयं । मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥ कुंडली कुटिलाकारा सर्पवत्परिकीर्तिता । सा शक्तिश्चालिता येन स मुक्तो नात्र संशयः ॥८१॥ गंगायमुनयोर्मध्ये बालरंडा तपस्विनी । बलात्कारेण गृह्णीयात्तद्विष्णोः परमं पदं ॥८२॥

Caput quartum incipit:

नमः शिवाय गुरवे नादबिंदुकलात्मने ।
निरंजनपदं याति यत्र नित्यं परायणः ॥१॥
अथेदानीं प्रवक्ष्यामि समाधिक्रमलक्षणं ।
मृत्युघ्नं सुसुखोपायं ब्रह्मानंदकरं परं ॥२॥
सलिले सैंधवं यद्वत्साम्यं भजति योगतः ।
तथात्ममनसोरैक्यं समाधिः सोऽभिधीयते ॥३॥
दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनं ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥५॥
विविधैरासनैः कुंभैर्विचित्रकरणैरपि ।
प्रबुद्धायामादिशक्तौ प्राणः शून्ये विलीयते ॥६॥
उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः ।
योगिनः सहजावस्था स्वयमेवोपजायते ॥७॥
सुषुम्णावाहिनि प्राणे, शून्ये विशति मारुते, ।
तदा समस्तकर्माणि निर्मूलयति योगवित् ॥८॥

His peractis conditio ecstatica obtinetur, externis actionibus omnibus libera[4], in eaque varii soni mystici (náda), beatitudinis summae nuntii, audiuntur:

मुक्तासनस्थितो योगी मुद्रां संधाय शांभवीं ।
शृणुयाद्दक्षिणे कर्णे नादमेकांतिके सुधीः ॥२७॥
काष्ठे प्रवर्तितो वह्निः काष्ठेन सह शाम्यति ।
नादे प्रवर्तितं चित्तं नादेन सह लीयते ॥२८॥
विस्मृत्य सकलं वाह्यं नादे दुग्धांबुवन्नरः ।
एकीभूयाथ सहसा चिदाकाशे विलीयते ॥२९॥
औदासीन्यपरो भूत्वा सदाभ्यासेन संयमी ।
उन्मनीकारकं सद्यो नादमेवावधारयेत् ॥३०॥
आरंभश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्वयोगेषु योगावस्थाः प्रकीर्तिताः ॥३३॥

अथारंभावस्था ॥

ब्रह्मग्रंथौ भवेद्भिन्न आनंदः शून्यसंभवः ।
विचित्रः क्षणिको[5] (?) देहे श्रूयतेऽनाहतध्वनिः ॥३४॥

अथ घटावस्था ॥

द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तथा ॥३५॥
विष्णुग्रंथिर्यदा भिन्नः परमानंदसूचकः ।
अतिशून्यविभेदश्च भेरीशब्दस्तदा भवेत् ॥३६॥

अथ परिचयावस्था ॥

तृतीयायां ततो भित्त्वा विमलो मर्दलध्वनिः ।
महाशून्यं ततो याति सर्वसिद्धिसमाश्रयं ॥३७॥

अथ निष्पत्त्यवस्था ॥

निष्पत्तौ वैणवः शब्दः क्वणद्वीणासमो भवेत् ।
एकीभूतं तदा चित्तं राजयोगाभिधानकं ॥३९॥

---

[1] *Rájayoga* inferior yogae gradus est; qui enim post exspirationem spiritum coercet, non eo sanctitatis processit, quo is qui spiritum omnino suspendit.

[2] Ita Lond. *madhyamárgaṣ* noster.

[3] Cod. Lond. अत्रत्या वज्रोली ग्रंथांतरे लिखितासीत् । क्रमप्राप्तापत्र त्यक्ता । असाधारणप्रायनुष्ठेयत्वात्तस्याः ।

[4] वेदशास्त्रपुराणौघाः सामान्यगणिका इव । एकैव शांभवी मुद्रा सर्वतंत्रेषु गोपिता ॥ 4, 18. केचिदागमजालेन केचिन्नियमसंकुलाः । केचित्तर्केण मुह्यंति नैव जानंति तारकं ॥ 4, 25.

[5] विचित्रक्वणिके MS. विचित्रक्षणिके Lond.

Praeterea hoc memorabile: *Amanaskalayaṣ* chaiva *ṣúnyáṣúnyam paráparam* । *jívanmuktiṣ* cha *sahajaṃ turyaṃ* chety ekavâchakam ॥45॥

Praeter *Matsyendram* in fine libri *Viṣvarúpácháryas* laudatur. Gorakshae disticha satis multa in usum suum convertit.

De codice Havniensi cf. Westergaard, p. 9; de Berolinensi Weber Catal. p. 195.

Codex exeunte seculo superiore parum accurate exaratus est. Folium 35, in quo capitis tertii disticha 74–81. inerant, desideratur. (Wilson 482.)

567.

Opuscula quatuor. Lit. Devan. Charta Ind. Foll. 86. Long. $11\frac{1}{4}$. Lat. $4\frac{1}{2}$.

Foll. 1–13. Linn. 9–12. *Gorakshaṣatakam*, distichorum centuriae duae a *Goraksha* scriptae, quibus *haṭhayogae* principia exponuntur. Auctor, dummodo libellus jure ei tribuatur, ut supra vidimus, ab Átmáráma laudatur. Incipit:

श्रीगुरुं परमानन्दं वन्दे स्वानन्दविग्रहं ।
यस्य सन्निधिमात्रेण चिदानन्दायते नमः (manaḥ) ॥१॥
अन्तर्निश्चलितात् प्रदीपकलिकास्वाधारबन्धादिभि-
  र्यो योगी युगकल्पकालकलनातत्वं च योगीयते ।
ज्ञानामोदमहोदधिः समभवद्यत्रादिनाथः (l. सम°) स्वयं
  व्यक्ताव्यक्तगुणाधिपत्यमनिशं ṣrí-Mínanátham भजे ॥२॥
नमस्कृत्य गुरुं भक्त्या गोरक्षो ज्ञानमुत्तमं ।
अभिष्टं योगिनां ब्रुते परमानन्दकारणं ॥३॥
गोरक्षशतकं वक्ति योगीनां हितकाम्यया ।
ध्रुवं यस्याववोधेन जायते परमं पदम् ॥४॥

Auctor de his sex contemplationis mysticae membris disserit:

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगांगानि भवंति षट् ॥८॥

Atque primum *sedendi rationum* species duas: *siddhásanam* et *kamalásanam* (padmásanam) distichis 12. et 13. definit. Deinde de quibusdam corporis externi regionibus agit, ad meditationem mysticam accurate circumscriptis (distt. 14–23),

षट्चक्रं षोडशाधारं त्रैलोक्यं व्योमपंचकं ।
स्वदेहे ये न जानंति कथं सिध्यंति योगिनः ॥१४॥

tum de venis spiritalibus decem[1] praecipuis:

प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ॥२५॥
इडा च पिंगला चैव सुषुम्णा च तृतीयका ।
गांधारी हस्तिजिह्वा च पूषा चैव यशस्विनी ॥२६॥
अलंबुषा कुहूश्चैव शंखिनी दशमी स्मृता ।
एतन्नाडीमयं चक्रं ज्ञातव्यं योगिभिः सदा ॥२७॥
सततं प्राणवाहिन्यो सोमसूर्याग्निदेवताः ।
इडा पिंग्ला [2]सुषुम्णा च प्राणमार्गे समाश्रिताः ॥२८॥
इडा वामे स्थिता मार्गे पिंगला दक्षिणे स्थिता ।
सुषुम्णा मध्यदेशे च गांधारी वामचक्षुषि ॥२९॥
दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ।
यशस्विनी वामकर्णे आनने चाप्यलंबुषा ॥३०॥
कुहूश्च लिंगदेशे तु मूलस्थाने च शंखिनी ।
एवं द्वारं समाश्रित्य तिष्ठंति दश नाडयः ॥३१॥

Sequuntur quinque spiritus, solita sive etiam quinque technica nomina illa (nága, kúrma, kṛikara, devadatta, dhananjaya) gerentes (distt. 32–36). At animus (jíva) inspirando et exspirando huc illuc tractus exiturus syllabam *ha*, retro versus syllabam *sa* profert, hocque modo mysticam precem *hansa hansa* intra diei unius spatium semel et vicies millies sexcenties repetit[3] (distt. 37–43). De *kuṇḍaliní* eadem fere verba, quae supra excerpsimus (distt. 44–55). De quinque gestuum (mudrá) speciebus: *mahámudrá*, *nabhomudrá* (khecharí), *uḍḍiyána*, *jalandhara*, *múlabandha* appellatis (distt. 56–80). De Om syllabae significatione (distt. 81–87).

2. De spiritu moderando (*práṇáyáma*), distt. 87–123.

3. De animo a rebus externis revocando sive potius retrahendo (*pratyáhára*), distt. 123–156.

चरतां चक्षुरादीनां विषयेषु यथाक्रमं ।
यत्प्रत्याहरणं तेषां प्रत्याहारः स उच्यते ॥१२४॥
अंगमध्ये यथांगानि कूर्मः संकोचयेद्ध्रुवं ।
योगी प्रत्याहरत्येवमिंद्रियाणि तथात्मनि ॥१२६॥
यं यं (vishayam?) शृणोति कर्णाभ्याममप्रियं प्रियमेव वा ।
तं तमात्मेति विज्ञाय प्रत्याहरति योगवित् ॥१२७॥

4. De quinque elementis animo immoto concipiendis (*dháraṇá*), distt. 157–165.

हृदये पंचभूतानां धारणा च पृथक् पृथक् ।
मनसो निश्चलत्वेन धारणा साभिधीयते (sá vi° MS.) ॥१५७॥[4]

---

[1] Gáyatrí decem vocabulis constat.

[2] निरंकुशाः कवयः ।

[3] i. e. 360 × 60. Sexaginta Indici diei horae, anni 360 dies.

[4] Multo accuratior Patanjalis definitio. Is enim (3, 1) ait: 'In loco defixus animus *intentus* est,' idque scholiasta ita explicat: '*In loco*, i. e. in umbilici circulo, naso extremo, aliis locis, *animus defixus*, i. e. aliis rebus externis sublatis immobilis redditus, hic animus *intentus* appellatur:' देशे नाभिचक्रनासाग्रादौ चित्तस्य बंधो विषयांतरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणेत्युच्यते । अयमर्थो । मैत्र्यादिचित्तपरिकर्मवासितांतःकरणेन, यमनियमवता, जितासनेन, परिहृतप्राणविक्षेपेण, प्रत्याहृतेंद्रियग्रामेण, निर्बाधे प्रदेशे, ऋजुकायेन, जितद्वंद्वेन योगिना नासाग्रादौ संप्रज्ञातस्य समाधेरभ्यासाय चेतसः स्थिरीकरणं कर्तव्यमिति ॥

Exemplo 'conceptio sive intentio aetherea' sit:

आकाशं स विशुद्धवारिसदृशं यद्ब्रह्मरंध्रे स्थितं
तन्नादेन सदाशिवेन सहितं तत्त्वं हकारान्वितं ।[1]
प्राणं तत्र विलीय पंचघटिकां चित्तान्वितं धारये-
देषा मोक्षकपाटलंघनपटुः प्रोक्ता नभोधारणा ॥१६३॥
स्तंभिनी (terra) धारिणी (aqua) चैव दहनी (ignis) भ्रमणी (ventus) तथा।
शोषिणी (aether) च भवंत्येता भूतानां पंच धारणाः ॥१६४॥

5. De meditatione (*dhyána*), distt. 166–187.

6. De *συννοίᾳ* (*samádhi*), distt. 188–205.

धारणा पंचनाडीभिर्ध्यानं च षष्टिनाडिकं ।
दिनद्वादशकेन स्यात्समाधिः प्राणसंयमात् ॥१८८॥
यत्सर्वद्वंद्वयोरैक्यं जीवात्मपरमात्मयोः ।
समस्तनष्टसंकल्पः समाधिः सोऽभिधीयते ॥१८९॥
संबुसैंधवयोरैक्यं यथा भवति योगतः ।
तथा जीवात्मनोरैक्यं समाधिरभिधीयते ॥१९०॥

In fine hoc animadversum velim, quinque *haṭhayogae* partibus re vera minorem majoremve spiritus coercendi gradum significari. Haec enim auctor noster:

प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः ।
प्रत्याहारद्विषट्केन जायते धारणा शुभा ॥११५॥
धारणा द्वादश प्रोक्तं ध्यानं ध्यानविशारदैः ।
ध्यानद्वादशकेनैव समाधिरभिधीयते ॥११६॥

Haec voluminis folia ineunte seculo superiore Vṛindávanae a Vṛindávanadása satis accurate exarata sunt. (Wilson 337[a].)

568.

Foll. 58–74. *Yogaṣástre Videhamuktyádikathanam.* Fragmentum libri yogici, disticha circiter 250. continens, quo animi a corporis vinculis liberandi, eoque theurgiae obtinendae instrumenta traduntur. Quare de spiritu moderando, variis sedendi et membrorum luxandorum modis, mente ad unam rem dirigenda agitur. Disticha longe plurima cum iis consentiunt, quae Ṣárngadhara in fine Paddhatis de yoga protulit. Initium paulum emendatum hocce: प्राणायामान्नरः षष्टिं कुर्यादेवमहर्मुखे। चत्वारिंशच्च मध्याह्ने संध्यायां विंशतिर्भवेत् ॥१॥ अर्धरात्रे विंशतिः स्यादेवं प्राणविनिग्रहः । शरीरलघुता दीप्तिर्जठराग्निविवर्धनं । कृशत्वं च शरीरस्य जायते वै ध्रुवं तदा ॥२॥ लवणं सरसाम्लं च उष्णं रूक्षं च तीक्ष्णकं । स्त्रीसेवामग्निसेवां च बह्वाशित्वं च वर्जयेत् ॥३॥ क्षीरं घृतं च मिष्टान्नं मिताहारश्च शस्यते । मितोक्तिः पवनाभ्यासो निद्रायाश्च जयस्तथा ॥४॥ केवलं कुंभके सिद्धे रेचपूरविवर्जिते । न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥५॥

Haec folia anno 1821 exarata sunt. (Wilson 481[b].)

[1] Cf. circulus *kulákula*, supra p. 96.

D. SANKHYA.

569.

Lit. Devan. Charta Ind. Foll. 53. Long. 13. Lat. 5. Linn. 7.

A. Foll. 1–9. *Sánkhyakárikás*, philosophiae Sánkhyicae aphorismi, ab *I'ṣvarakṛishṇa* compositi.

Libellus a Lassen, Bonnae 1832, et a Wilson, Oxonii 1837, editus est.

Haec folia anno 1833 exarata sunt.

B. Foll. 10–53. *Sánkhyachandriká*, commentarius brevis ad I'ṣvarakṛishṇae aphorismos, a *Náráyaṇatírtha*, Rámagovindatírthae discipulo, scriptus. Incipit:

श्रीरामगोविंदसुतीर्थपादकृपाविशेषादुपलभ्य वोधं ।
श्रीवासुदेवाद[धि]गत्य सर्वशास्त्राणि वक्तुं किमपि स्पृहा नः १
प्रकृतिं पुरुषं चैव नत्वा चार्यान्गुरूंस्तथा ॥
नारायणः सांख्यमूले तनुते सांख्यचंद्रिकां २

Libri initium hoc: तदिदं शास्त्रं चतुर्व्यूहं। हेयं हेयसाधनं हानं हानसाधनं चेति मुमुक्षुजिज्ञासितत्वात् । तत्र हेयं सर्वप्रतिकूलवेदनीयतया दुःखं। हेयहेतुः प्रकृतिपुरुषयोरविवेकः। हानं दुःखस्यात्यंतनिवृत्तिः परमपुरुषार्थः । हानहेतुः प्रकृतिपुरुषविवेकद्वारा शास्त्रं । अतोऽत्र परमपुरुषार्थस्य स्वत एवेष्टत्वेन तदुपाये शास्त्रे प्रेक्षावतामिष्टसाधनताज्ञानादवश्यं जिज्ञासा भवतीत्याह । दुःखेति ।

Auctor, qui nomen proprium non tradidit, ad distichon secundum *Yogasútravyákhyánam* a se scriptum laudat. Náráyaṇatírthae cuidam *Kṛishṇalílátarangiṇí* carmen tribuitur (E. I. H. 56), neque tamen temere eundem esse scriptorem asseveraverim.

Haec voluminis pars post annum 1810 e cod. E. I. H. 2640. transscripta est. (Wilson 184.)

570.

Opuscula duo. Lit. Devan. Charta Ind. Foll. 98. Long. 11. Lat. $4\frac{1}{2}$. Linn. 10.

Foll. 1–45. *Sánkhyatattvakaumudí*, commentarius ad *I'ṣvarakṛishṇae Sánkhyakárikás*, a *Váchaspatimiṣra* compositus. (A.) Incipit:

अजामेकां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां नमामः ।
अजा ये तां जुषमाणां भजंते जहत्येनां भुक्तभोगानुमस्तान् ॥१॥
कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पंचशिखाय तथेश्वरकृष्णायैते नमस्यामः ॥२॥

Praeter commentarium suum, *Nyáyavárttikatátparyaṭíká* appellatum, auctor *Várshagaṇyam* (dist. 47. पंचपर्वा विद्येत्याह वार्षगण्यः), ad dist. 72. *Bhojarájavárttikam* (*Rájavárttika* A. B. pr. m. D. Edit. Calc.), necnon paucas *Panchaṣikhae* sententias laudat.

Libellus Calcuttae anno 1848 editus est.

Haec voluminis pars anno 1677 a Vinayasundara (syádvádiná syádvádángam vichárya) exarata est. (MILL 61ᵃ.)

571.

Lit. Devan. Charta Ind. Foll. 48. Long. $10\frac{1}{2}$. Lat. $4\frac{1}{2}$. Linn. 9.

Sánkhyatattvakaumudí. (B.)

Codex hoc seculo ineunte exaratus est. (MILL 71.)

572.

Lit. Devan. Charta Ind. Foll. 36. Long. $9\frac{1}{2}$. Lat. 4. Linn. 11–16.

Sánkhyatattvakaumudí. (C.)

Codex hoc seculo ineunte exaratus est. (MILL 89.)

573.

Lit. Devan. Charta Ind. Foll. 41. Long. $9\frac{1}{2}$. Lat. 6. Linn. 13.

Sánkhyatattvakaumudí. (D.)

Codex post annum 1820 exaratus est. (WILSON 515.)

574.

Foll. 36–47. Linn. 11. Fragmentum commentarii ad *Sánkhyasútra.* Incipit:

नत्वा सांबशिवं सांख्यसूत्रवृत्तिं लिखाम्यहं ॥
यथामति विचार्यार्यैरात्मानात्मविवेकिनी ॥१॥

यद्यपि पद्मपुराणे पार्वतीश्वरसंवादे । शृणु देवी प्रवक्ष्यामि तामसानि यथाक्रमं । येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि etc.

Hoc fragmento nostro commentarius ad sútra 1–50. libri primi continetur. Qui quum, omissis omittendis, e *Vijnánabhikshus* Sánkhyabháshya verbo tenus excerptus sit, initium hoc esse suspicor *Laghusánkhyasútravṛittis* a *Nágeṣa* compositae. Cf. F. E. Hall in ed. Sánkhyapravachanabháshyae praef. p. 32.

Haec folia hoc seculo ineunte exarata sunt. (WILSON 426ᶠ.)

575.

Foll. 139–258. *Paramárthasáras,* ab *Abhinavagupta* compositus, cum commentario auctoris anonymi Vitastápurensis.

Hoc libello, disticha 100. Áryá metro scripta (Ádhárakárikás) continente, auctor sectae Ṣivaiticae doctrinam adumbravit. Disticha sedecim prima haec:

परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव शंभुं शरणं प्रपद्ये ॥१॥

गर्भाधिवासपूर्वकमरणांतकदुःखचक्रविभ्रांतः । आधारं भगवंतं शिष्यः पप्रच्छ परमार्थं ॥२॥ आधारकारिकाभिस्तं गुरुरभिभाषति स्म, तत्सारं । kathayaty *Abhinavaguptaḥ* शिवशासनदृष्टियोगेन ॥३॥[1] निजशक्तिवैभवभरादंडचतुष्टयमिदं विभागेन । शक्तिर्माया प्रकृतिः पृथ्वी चेति प्रभावितं प्रभुणा ॥४॥ तत्रांतर्विश्वमिदं विचित्रतनुकरणभुवनसंतानं । भोक्ता च तत्र देही शिव एव गृहीतपशुभावः ॥५॥ नानाविधवर्णानां रूपं धत्ते यथामलः स्फटिकः । सुरमानुषपशुपादपरूपत्वं तद्वदीशोऽपि ॥६॥ गच्छति गच्छति जल इव हिमकरविंबं स्थिते स्थितिं याति । तनुकरणभुवनवर्गे तथायमात्मा महेशानः ॥७॥ राहुरदृश्योऽपि यथा शशिविंबस्थः प्रकाशते तद्वत् । सर्वगतोऽप्ययमात्मा विषयाश्रयणेन धीमकुरे ॥८॥ आदर्शे मलरहिते यद्वद्वदनं विभाति तद्वदयं । शिवशक्तिपातविमले धीतत्त्वे भाति भारूपः ॥९॥ भारूपं परिपूर्णं स्वात्मनि विश्रांतितो महानंदं । इच्छासंवित्करणैर्निर्भरितमनंतशक्तिपरिपूर्णं ॥१०॥ सर्वविकल्पविहीनं शुद्धं शांतं व्ययोदयविहीनं । यत्परतत्त्वं तस्मिन्विभाति षट्त्रिंशदात्म जगत् ॥११॥ दर्पणविंबे यद्वन्नगरग्रामादि चित्रमविभागि । भाति विभागेनैव परस्परं दर्पणादपि च ॥१२॥ विमलतमपरमभैरवबोधात्तद्वद्विभागशून्यमपि । अन्योन्यं च ततोऽपि च विभक्तमाभाति जगदेतत् ॥१३॥ शिवशक्तिसदाशिवतामीश्वरविद्यामयीं च तत्त्वदशां । शक्तीनां पंचानां विभक्तभावेन भासयति ॥१४॥ परमं यत्स्वातंत्र्यं दुर्घटसंपादनं महेशस्य । देवी माया शक्तिः स्वात्मावरणं शिवस्यैतत् ॥१५॥ मायापरिग्रहवशाद्बोधो मलिनः पुमान्पशुर्भवति । कालकलानियतिवशाद्रागाविद्यावशेन संबंधः ॥१६॥

Desinit liber in distichis:

इदमभिनवगुप्तोदितसंक्षेपं ध्यायतः परं ब्रह्म ।
अचिरादेव शिवत्वं निजहृदयावेशमभ्येति ॥
आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढं ।
अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन ॥

Commentarius incipit: चिद्घनो पि जगन्मूर्त्या श्यानो यः स जयत्यजः । स्वात्मप्रछादनक्रीडाविदग्धो हि महेश्वरः ॥ यो यं व्यधायि गुरुणा युक्त्या परमार्थसारसंक्षेपः । विवृतिं करोमि लघ्वीमस्मिन्विद्वज्जनार्थितो *Yogaḥ* ॥

Praeter Puráṇa, Bhagavadgítám, Manum, scholiasta hos auctores et libros laudat: *Abhinavaguptae* Vivṛitivimarṣiní fol. 162ᵇ (तदेव ग्रंथकृता विवृतिविमर्शिन्यामुक्तं अंतर्विभाति सकलं जगदात्मनीह etc.) et ejusdem *Tantrasára* fol. 182ᵇ (इति श्रीमद्ग्रंथकृता तंत्रसारे निरूपितं); ṣrí-bhaṭṭa-*Kallárya* fol. 193ᵇ; *Kálikákrama* fol. 193ᵃ; *Kularatnamáliká* sáhasriká fol.

[1] Schol. कश्चिद्भगवत्प्रसादात्समुत्पन्नवैराग्यः संसाराद्विरतमतिर्गुरोः शासनीयोऽस्मीति मत्वा सद्गुरुमाधारं भगवंतं शेषाख्यं मुनिं सम्यगाराध्य परमार्थोपदेशस्वरूपं पृष्टवान् । तदा तद्योग्यतापरिपाकपरिशीलनक्रमेण तं शिष्यं विगलितांतःकरणं मत्वा सोऽप्यनंतनाथो निःशेषशास्त्रोपदेशज्ञः परमार्थसारनाम्ना *Ádhárakáriká* इत्यपराभिधेन ग्रंथेन सांख्यनयोक्तोपदेशानुसारेण प्रकृतिपुरुषविवेकज्ञानात्परं ब्रह्मावाप्तिरिति तं शिष्यं प्रोक्तवान् ।

237^{b}, cf. ṣrí-*Kula* (श्रीकुले यथोक्तं। हेलया क्रीडया वापि आदराद्वापि तंत्ववित्। यस्य संपातयेद्दृष्टिं स मुक्तस्तत्क्षणात्प्रिये); *Trinṣiká* fol. 195^{a} (यथादिष्टं भगवता। तृतीयं ब्रह्म सुश्रे[ा]णि); bhaṭṭa-*Divákaravatsa* fol. 186^{a}. 201^{b} (Kakshyástotre); *Nirváṇayogottara* fol. 236^{a}; *Niṣáṭana* fol. 237^{b} (गोदोहमिषुपातं वा नयनोन्मीलनात्मकं। सकृद्युक्तः परे तत्त्वे स मुक्तो मोचयेत्परान्॥ यस्मात्पूर्वं परे न्यस्तो येनात्मा ब्रह्मणि क्षणं। स्मरणं तु कथं तस्य प्राणांते समुपस्थितं); *Parameshṭhin* fol. 188^{a} (Nareṣvaraviveke). 207^{a} (यथोक्तं परमेष्ठिपादैः); *Bhartṛihari* fol. 194^{b} (vp.); ṣrí-*Mangaláṣástra* fol. 144^{b} (शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते। शक्तयोऽस्य जगत्सर्वं शक्तिमांश्च महेश्वरः); *Rájánakaráma* (?) fol. 226^{b}; bhaṭṭa-ṣrí-*Víravámana* fol. 227^{b} (यत्रेंधनं द्वैतवनं मृत्युरेव महापशुः। अलौकिकेन यज्ञेन तेन नित्यं यजामहे); *Ṣivadharmottaraṣástra* fol. 256^{a}; *Ṣivasútra* fol. 230^{a}; *Ṣivopanishad* fol. 228^{b}. 230^{a}; ṣrí-*Sára*-bhaṭṭáraka fol. 174^{a} (एको भावः सर्वभावः स्वभावः सर्वे भावा एकभावस्वभावाः। एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतो तेन दृष्टाः); *Spandaṣástra* fol. 140^{b}. 186^{b}. 225^{a}; *Svatantrasára* fol. 228^{b}.

In fine haec leguntur:

श्रीमतो योगराजस्य सद्गुर्वाम्नायशालिना।
साक्षात्कृतमहेशस्य तस्यांतेवासिना मया॥
श्रीवितस्तापुरीधाम्ना विरक्तेन तपस्विना।
विवृतिर्योगनाम्नेयं वर्णद्वयमयी कृता॥

Commentator igitur anachoreta *Yoga* nomine gaudebat. (Wilson 531^{e}.)

E. NYAYA.

576.

Lit. Bengal. Charta Ind. Foll. 73. Long. 13. Lat. $4\frac{1}{2}$. Linn. 8.

Nyáyasútra a *Gautama* scripta cum *Viṣvanáthae* (panchánanabhaṭṭácháryae) commentario. Incipit liber: प्रयोजनानुसन्धानं विना प्रेक्षावतामप्रवृत्तेस्तदभिधातव्यं तदाहुः सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन इति।

Textus cum Viṣvanáthae commentario Calcuttae anno 1828, et a Ballantyne cum versione Anglica anno 1854 editus est.

Codex hoc seculo ineunte satis accurate exaratus est. (Wilson 407.)

577.

Foll. 55–62. Linn. 12. *Bhásháparichhedas*, disticha 166, quibus *Viṣvanátha*, Vidyánivásae filius, categorias philosophiae nyáyicae septem exposuit. (A.)

Textus cum auctoris commentario anno 1850 a Roer denuo editus et Anglice versus est.

Haec folia seculo superiore medio exarata sunt. In fine haec leguntur: इति कारिकानिबंधो विश्वनाथीयः समाप्तः॥ (Walker 201^{d}.)

578.

Foll. 110–118. Linn. 6. *Viṣvanáthae Bhásháparichhedas*. (B.)

Distichon 167. in fine hoc legitur: नितान्तमलयोद्भूतरसरूषितविग्रहं। नमामि जगतां नाथं नीलाचलनिवासिनं॥१६७॥

Haec folia seculo superiore medio accurate exarata sunt. (Wilson 278^{d}.)

579.

Foll. 38. Linn. 12–17. *Nyáyasiddhántamuktávalí*, commentarius a *Viṣvanátha* (mahopádhyáyapanchánanabhaṭṭáchárya) ad Bhásháparichhedam scriptus. Incipit:

नूतनजलधररुचये गोपवधूटीदुकूलचोराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥१॥ (in marg.)
चूडामणीकृतविधुर्वलयीकृतवासुकिः।
भवो भवतु भव्याय लीलातांडवपंडितः॥१॥

Haec voluminis pars medio seculo superiore exarata est. (Ouseley 151^{c}.)

580.

Lit. Devan. Charta Europ. Foll. 238. Long. 11. Lat. $5\frac{1}{2}$. Linn. 9.

Continetur hoc codice *Nyáyasiddhántamuktávalídipiká*, commentarius a *Mahádeva*, Bálakṛishṇae filio, ad *Viṣvanáthae Nyáyasiddhántamuktávalím* commentarium compositus. Incipit:

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलांबुधौ विधुमिव श्रीगौरवास्यांबुजात्
ज्ञात्वा शेषमतं मितेन वचसा सिद्धांतमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते १

भाषापरिछेदव्याख्यानं चिकीर्षुः श्रीविश्वनाथपंचाननो तिर्विघ्नपरिसमाप्तिसिद्धये कृतस्येश्वरनिर्देशरूपमंगलस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै निवंधं कुर्वन्नीश्वरं प्रार्थयते चूडामणीकृतेति.

In fine haec leguntur: भानुं प्रणम्य परिभाव्य च शास्त्रसारं मुक्तावलीकिरण एष पितृप्रदिष्टः॥ सधुक्तिभिर्दिनकरेण करेण सो यं नीतः प्रकाशयदंवी सुधियां मुदे स्तु॥१॥ मुक्तावलीप्रकाशो यमज्ञानसिमिरापहः (timirápahaḥ)। तेन संसोषमायातु नीलकंठः सतां प्रियः॥२॥ इति श्रीमद्दिनकरभट्टविरचिता न्यायसिद्धांतमुक्तावलीदीपिका

समाप्ता ॥ de qua nominis mutatione ii sententiam ferant, quibus antiquiores codices praesto sunt. In marginibus foliorum 1–174. मु° प्र°, exinde vero दि° प्र° legitur.

Apographon nostrum post annum 1828 factum est. (WILSON 402.)

581.

Foll. 176–182. Linn. 15–18. *Nyáyasiddhántamanjarí* libri, a Bhaṭṭácháryachúḍámaṇi quodam compositi, *pratyakshaparichheda* particula. Incipit: यत्र यदस्ति तत्र तदनुभवः प्रमा यथा इदं रजतमिति ज्ञाने विशेष्यं रजतं प्रधानतयाभासते रजतत्वं च तद्विशेषणतया ज्ञायत इति यत्र विशेष्ये यत्प्रकारतया भाति यथा रजते रजतत्वं प्रकारः ।

Haec folia exeunte seculo septimo decimo exarata sunt. (WALKER 181g.)

582.

Lit. Devan. Charta Ind. Foll. 107. Long. 11. Lat. 4½. Linn. 9–12.

Nyáyasiddhántamálae a *Jayaráma* (nyáyapanchánana) compositae pars, qua demonstrationis pars verborum testimonio innixa tractatur. Incipit:

ओं नमः कमलालोलदृगंचलविलासिने ।
विचित्रविश्वनिर्म्माणकारिणे मुरवैरिणे ॥

क्रमप्राप्तं शब्दं लक्षयति ॥ आप्तोपदेशः शब्दः (Gau° 1, 7) ॥ शब्द इति लक्ष्यनिर्देशः शाब्दप्रमाकरणं तदर्थः आप्तो यथार्थः उपदेशः शब्दज्ञानजन्यत्वव्याप्यशब्दाविषयकवृत्तिजातिमान् वोधः etc.

In fine haec: *Śabdárthanirṇayo* नाम गुरोरपि सुदुर्घटः । किंचित् श्रीजयरामोक्तं सुधीभिरवधीयतां ॥ ॥ इति महामहोपाध्यायश्रीजयरामन्यायपंचाननकृतायां न्यायसिद्धांतमालायां प्रमाणलक्षणप्रकरणं ॥

Maṇḍanamiśram (Miśra) auctor saepe laudat.

Codex tribus quatuorve manibus seculo septimo decimo exeunte exaratus est. (WILSON 418.)

583.

Lit. Devan. Charta Ind. Foll. 8. Long. 10. Lat. 4½. Linn. 8.

Padárthadharmasangrahas, quo libello auctor anonymus, systema vaiśeshicum secutus maximamque partem Kaṇádae aphorismis usus, sex categorias definivit. Incipit:

प्रणम्य हेतुमीश्वरं, munim Kaṇádam anv, ataḥ ।
पदार्थधर्म्मसंग्रहः प्रवक्ष्यते महोदयः ॥१॥

द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां षट्पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानं निःश्रेयसहेतुः (cf. Kaṇáda I, 1, 4) ॥ तच्चेश्वरज्ञानाभिव्यक्ताद्धर्मादेव ॥ अथ के द्रव्यादयः पदार्थाः किञ्च तेषां साधर्म्यं वैधर्म्यंचेति ॥ तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञयोक्तानि नवैव (cf. l. l. 5) ॥ तद्व्यतिरेकेण संज्ञान्तरानभिधानात् ।

Praefationis distichon in secundo Sarasvatíkaṇṭhábharaṇae libro laudari jam supra significavimus. In fine haec subscriptio: इति भाष्यं संपूर्णम् ॥

Codex anno 1643 a Nánúgangáharu, Durgadásae filio, exaratus est. (WILSON 507.)

584.

Lit. Devan. Charta Europ. Foll. 77. Long. 15½. Lat. 5½. Linn. 8.

Tattvachintámaṇis, a *Gangeṣa* compositi, liber primus, *Pratyakshakhaṇḍa*, de argumentis perceptione suppeditatis. Incipit:

गुणातीतो etc.

अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं
चिंतादिव्यविलोकनेन च तयोः सारं विलोक्याखिलं ।
तंत्रे दोषगणेन दुर्गमतरे सिद्धांतदीक्षागुरु-
र्गंगेशस्तनुते मितेन वचसा श्रीतत्वचिंतामणिं २

Codex anno 1834 exaratus est. (WILSON 45.)

585.

Foll. 38–109. Lit. Bengal. Linn. 5–7. *Anumánatattvachintámaṇis*, institutionis logicae a *Gangeṣa* compositae de ratiocinatione liber secundus. Incipit: प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं वहुवादिसम्मतत्वादुपमानात् प्राग अनुमानं निरूप्यते ॥

Desinit in verbis: द्वितीयन्तु लिङ्गज्ञानात् प्रतिवन्धकत्वज्ञानमनेनापि स्वरूपेण दूषणत्वं = ed. Calc. p. 79.

Textus Calcuttae anno 1848 impressus est.

Haec voluminis pars seculo superiore exeunte exarata est. (WILSON 278c.)

586.

Foll. 119–177. Lit. Bengal. Linn. 4–6.

Ejusdem libri fragmenta.

I. Foll. 119–127 = Calc. p. 1–6, l. 21. II. Foll. 128–140 = 3, 9–15, 16. III. Foll. 141–153 (Pakshadharmatá) = 24–37, 10. IV. Foll. 154–158 = 55, 5–59, 18. V. Foll. 159–177 (Hetvábhása) = 59–78, 10.

Haec folia hoc seculo ineunte exarata sunt. (WILSON 278e.)

587.

Lit. Devan. Charta Ind. Foll. 181. Long. $8\frac{1}{2}$. Lat. 3. Linn. 6–12.

Anumánadídhitis, commentarius a *Raghunátha* (bhaṭṭácháryaṣiromaṇi) ad Gangeṣae Anumánachintámaṇim compositus. (A.)

Finis desideratur. Desinit in verbis: तदुभयव्यापकीभूता भावप्रतियोगि (ed. Calc. p. १४२). Praeterea folia १२. १६. ७१. १५०. desunt.

Codex pluribus manibus seculo septimo decimo exeunte exaratus est. (Walker 198.)

588.

Lit. Devan. Charta Ind. Foll. 123. Long. 13. Lat. 5. Linn. 9.

Raghunáthae Anumánadídhitis. (C.)

Gangeṣae Tattvachintámaṇi (anumánakhaṇḍa) et Raghunáthae commentarius Calcuttae anno 1849 editi sunt. De codice Berolinensi cf. Weber Cat. p. 197.

Codex anno 1834 exaratus est. (Wilson 182.)

589.

Lit. Bengal. Charta Ind. Foll. 146. Long. 15. Lat. 3. Linn. 5–7.

Ejusdem libri fragmenta majora. (B.)

I. Foll. 1–105. Initium libri usque ad fol. 107. ed. Calc. Desiderantur folia ६०. ६६.

II. Foll. 106–113 = foll. 112 (केवलान्वयी)–122. ed. Calc.

III. Foll. 114–145 = foll. 118 (उचितानुपूर्वीकं)–158^b. 19. ed. Calc.

Codex pluribus manibus hoc seculo ineunte exaratus est. (Wilson 178.)

590.

Lit. Bengal. Charta Ind. Foll. 244. Long. $17\frac{1}{2}$. Lat. $3\frac{1}{2}$. Linn. 8.

Anumánamúlaṭippaní[1], commentarius a *Mathuránátha* ad Gangeṣae Anumánachintámaṇim compositus. (A.) Incipit: प्रत्यक्षं निरूपितमिदानीमनुमान निरूपणीयमतः शिष्याणामवधानाय प्रतिजानीते प्रत्यक्षानन्तरमित्यादिना ।

In opere componendo[2] auctor id egisse videtur, ut, quae superstitiones temporibus suis praevalebant, eas dilucida et populari captui adaptata Vedántae expositione refutaret. Cui doctrinae ut auctoritatem asciscere, Ṣankaram cum singularum sectarum principibus disputantem, omnes eloquentia sua ad veram fidem traducentem, immo miracula efficientem induxit. Quod in sectarum externis indiciis et ritibus describendis moratur, intimam vero superstitionum et dogmatum cognitionem rarissime prodit, id his de causis factum esse puto. Alias enim fidei ethnicae species, quarum explicationem aggressus est, quo tempore liber scriptus est, obsoletas, auctor auditione tantum accepisse, aliae ita quidem a cultu communi distinctae, ut disciplinam peculiarem constituerent, omnino non videntur fuisse. An Áryas illos antiquos propterea triginta tres religiones habuisse putabimus, quod tantus deorum supremorum numerus tradatur, hymnique singulos celebrantes exstent? Nomina autem, quae sectarum antistitibus tribuit, fere omnia ficta et a superstitionibus, quas capitibus singulis exponit, desumta esse puto. Non enim veri simile videtur, in tanto numero tam paucos fuisse dignos, quorum memoria ab aliis scriptoribus traderetur. Eum vero Ṣankarae discipulum fuisse credemus, qui, ut alias fabulas taceam, Kumárilam magistri aequalem facit? Atque eos libros omnes, quos Ṣankara laudans fingitur, tunc jam scriptos esse nobis persuadebimus, ne Bhágavata quidem, quo Vishṇubhaktae celebrantur, Ṣivagítá, Rudrayámala[3] exceptis? Utrum igitur Anantánandagiri noster idem sit cum Ánandajnánagiri, qui Sureṣvarae, Ṣankarae discipuli, Bṛihadáraṇyakae interpretatione se usum esse profitetur, an nomen illud a serae aetatis homine usurpatum sit, in praesentia quidem in medio relinquo.

Haec voluminis pars circiter annum 1820 negligentissime exarata est, et in medio libro lacunae minores inveniuntur. In hac codicis conditione, ea quae supra excerpsi, non equidem pro veris venditare, sed lectorum animos ad opus non prorsus contemnendum advertere volui. (WILSON 348ª.)

625.

Lit. Devan. Charta Ind. Foll. 105. Long. 13½. Lat. 5. Linn. 9.

Ṣankaravijayas. (B.)

Titulus in fine capitum hic subscriptus est: इत्यानंदगिरिकृतौ etc. In margine codicis A. शं° क° legitur.

De codice Havniensi cf. Westergaard, p. 10.

Hoc apographon ex eodem codice atque A. sed post annum 1830 transscriptum est. Desinit in capite 70. (MILL 30.)

626.

Foll. 113–206. Linn. 10. *Sankshepaṣankarajayas,* Ṣankarae victoria succincte enarrata, liber *Mádhavae* tributus. (A.) Incipit: प्रणम्य परमात्मानं ṣrí-*Vidyátírtha*-rúpiṇam। प्राचीनशंकरजये सारः संगृह्यते स्फुटं ॥१॥ यद्वद्घटानां पटलो विशालो विलोक्यतेऽल्पे किल दर्पणेऽपि। तद्वन्मदीये लघुसंग्रहेऽस्मिन्नुद्वीक्ष्यतां शांकरवाक्यसारः ॥२॥ यथातिरुच्ये मधुरेऽपि रुच्युत्पादाय रुच्यंतरयोजनार्हा। तथेष्यतां प्राक्कविहृद्यपद्येष्वेषापि मत्पद्यनिवेशभंगी ॥३॥ स्तुतोऽपि सम्यक्कविभिः पुराणैः कृत्यापि नस्तुष्यतु भाष्यकारः। क्षीराब्धिवासी सरसीरुहाक्षः क्षीरं पुनः किं चकमे न गोष्ठे ॥४॥ पयोब्धिविवरीसुनिःसृतसुधाझरीमाधुरीधुरीणभणिताधरीकृतफणाधराधीशितुः। शिवंकरसुशंकराभिधजगद्गुरोः प्रायशो यशो हृदयशोधकं कलयितुं समीहामहे ॥५॥[4] क्वेमे शंकरसद्गुरोर्गुणगणा दिग्जालकूलंकषाः कालोन्मीलितमालतीपरिमलावष्टंभमुष्टिंधयाः। क्वाहं हंत तथापि सद्गुरुकृपापीयूषपारंपरीमग्नोन्मग्नकटाक्षवीक्षणबलादस्ति प्रशस्तार्हता ॥६॥ धन्यंमन्यविवेकशून्यसुजनंमन्याब्धिकन्यानटीनृत्तोन्मत्तनराधमाधमकथासंमर्ददुष्कर्दमैः। दिग्धां मे गिरमद्य शंकरगुरुक्रीडासमुद्यद्यशःपारावारसमुच्चलज्जलझरैः संक्षालयामि स्फुटं ॥७॥ बंध्यासूनुखरीविषाणसदृशक्षुद्रक्षितींद्रक्षमाशौर्योदार्यदयादिवर्णनकलादुर्वासनावासि-

[1] सतमनसं MS.

[2] Major pars oratione soluta scripta est, nunnunquam versus epicus aliaque metra adhibentur.

[3] Dhanapati auctore Ṣankara ipse in Ṣivapuráṇa (ubinam vero?) laudatur. Ad Sankshep. I, 2: शिवावतारत्वं च भगवतो भाष्यकारस्य शिवपुराणादेरवगंतव्यं। तथा चोक्तं शिवपुराणे। व्याकुर्वन्व्याससूत्रार्थं श्रुतेरर्थं यथोचिवान्। श्रुतेर्न्याय्यः स एवार्थः शंकरः सवितानन: ॥

[4] Hujus distichi annominationem observatam velim.

तां । मद्वाणीमधिवासयामि यमिनस्त्रैलोक्यरंगस्थलीनृत्यत्कीर्तिनटीपटीरपटलीचूर्णैर्विकीर्णैः क्षितौ ॥८॥ पीयूषद्युतिखंडमंडनकृपारूपांतरः श्रीगुरुप्रेमस्थेमसमर्हणार्हमधुरव्याहारसूनोत्करः । प्रौढोऽयं nava-Kálidása (!)-kavitásaṃtánasaṃtánako दद्यादद्य समुद्यतः सुमनसामामोदपारंपरीं ॥९॥ सामोदैरनुमोदिता मृगमदैरानंदिता चंदनैर्मंदारैरभिनंदिता प्रियगिरा काश्मीरजैः स्मेरिता । वागेषा nava-*Kálidása*-vidusho दोषोज्झिता दुष्कविव्रातैर्निष्करुणैः क्रियेत विकृता धेनुस्तुरुष्कैरिव ॥१०॥ यद्वा दीनदयालवः सहृदयाः सौजन्यकल्लोलिनीदोलांदोलनखेलनैकरसिकस्वांताः समंतादमी । संतः संति परोक्तिमौक्तिकजुषः किं चिंतयाथानया[1], यद्वा तुष्यति शंकरः परगुरुः कारुण्यरत्नाकरः ॥११॥ उपक्रम्य स्तोतुं कतिचन गुणान् शंकरगुरोः प्रभग्नाः श्लोकार्धे, कतिचन तदर्धार्धरचने । अहं तुष्टूषुस्तानहह कलये शीतकिरणं कराभ्यामाहर्तुं व्यवसितमतेः साहसिकतां ॥१२॥ तथाप्युज्जृंभंते मयि विपुलदुग्धाब्धिलहरीलसत्कल्लोलालीलसितपरिहासैकरसिकाः । अमी मूकान्वाचालयितुमपि शक्ता यतिपतेः कटाक्षाः, किं चित्रं भृशमघटिताभीष्टघटने ॥१३॥ अस्मज्जिह्वाग्रसिंहासनमुपनयतु स्वोक्तिधारामुदारामद्वैताचार्यपादस्तुतिकृतसुकृतोदारताशारदांबा । नृत्यन्मृत्युंजयोच्चैर्मुकुटतटकुटीनिःस्रवत्स्वःस्रवंतीकल्लोलोद्वेलकोलाहलमदलहरीखंडिपांडित्यहृद्यां[2] ॥१४॥ क्वेदं शंकरसद्गुरोः सुचरितं क्वाहं वराकी, कथं निर्वभ्रासि चिरार्जितं मम यशः, किं मज्जयस्यंबुधौ । इत्युक्त्वा चपलां पलायितवतीं वाचं नियुंक्ते बलात्प्रत्याहृत्य गुणस्तुतौ कविगणश्चित्रं गुरोर्गौरवं ॥१५॥ rukshaiksharaván-nighaṇṭuṣaraṇair auṇádikapratyayapráyair हंत यङंतदंतुरतरैर्दुर्बोधदूरान्वयैः । क्रूराणां कवितावतां कतिपयैः कष्टेन कृष्टैः पदैर्हा हा स्याद्वशगा किरातविततेरेणीव वाणी मम? ॥१६॥ नेता यत्रोल्लसति भगवत्पादसंज्ञो महेशः, शांतिर्यत्र प्रकचति रसः शेषवानुज्ज्वलाद्यैः । यत्राविद्याक्षतिरपि फलं, तस्य काव्यस्य कर्ता धन्यो *Vyásáchalakavivaras*[3], तत्कृतिज्ञाश्च धन्याः ॥१७॥

तत्रादिम उपोद्घातो द्वितीये तु तदुद्भवः । तृतीये तत्तदमृतांधोऽवतारनिरूपणं ॥१८॥ चतुर्थसर्गे तच्छुद्धाष्टमप्राक्चरितं स्थितं । पंचमे तद्योग्यसुखाश्रमप्राप्तिनिरूपणं ॥१९॥ महतानेहसा यैषा संप्रदायागता गता । तस्याः शुद्धात्मविद्यायाः षष्ठे सर्गे प्रतिष्ठितिः ॥२०॥ तद्व्यासाचार्यसंदर्शविचित्रं सप्तमे स्थितं । स्थितोऽष्टमे मंडनार्यसंवादो, नवमे मुनेः ॥२१॥ वाणीसाक्षिकसार्वज्ञनिर्वाहोपायचिंतनं । दशमे योगशक्त्या भूपतिकायप्रवेशनं ॥२२॥ बुद्ध्वा मीनध्वजकलां तत्प्रसंगप्रपंचनं । सर्ग एकादशे तूग्रभैरवाभिधनिर्जयः ॥२३॥ द्वादशे हस्तधात्र्यार्यतोटकोभयसंश्रयः[4] । वार्त्तिकांतब्रह्मविद्याचालनं तु त्रयोदशे ॥२४॥ चतुर्दशे पद्मपादतीर्थयात्रानिरूपणं । सर्गे पंचदशे तूक्तं तदाशाजयकौतुकं ॥२५॥ षोडशे शारदापीठवासस्तस्य महात्मनः । इति षोडशभिः सर्गैर्व्युत्पाद्या शांकरी कथा ॥२६॥ सैषा कलिमलच्छेत्री सकृच्छ्रुतापि कामदा । नानाप्रश्नोत्तरै रम्या विदामारभ्यते मुदे ॥२७॥

एकदा देवता रूप्याचलस्थमुपतस्थिरे । देवदेवं तुषारांशुमिव पूर्वाचलस्थितं ॥२८॥ प्रसादानुमितस्वार्थसिद्धयः प्रणिपत्य तं । मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ॥२९॥ विज्ञातमेव भगवन्विद्यते यद्धिताय नः । वंचयन्सुगतान्बुद्धवपुर्धारी जनार्दनः ॥३०॥ तत्प्रणीतागमालंबैर्बौद्धैर्दर्शनदूषकैः । व्याप्तेदानीं प्रभो धात्री रात्रिः संतमसैरिव ॥३१॥ वर्णाश्रमसमाचारान्द्विषंति ब्रह्मविद्विषः । ब्रुवंत्याम्नायवचसां जीविकामात्रतां प्रभो ॥३२॥ न संध्यादीनि कर्माणि न्यासं वा न कदाचन । करोति मनुजः कश्चित्सर्वे पाषंडतां गताः ॥३३॥ श्रुते पिदधति श्रोत्रे क्रतुरित्यक्षरद्वये । क्रियाः कथं प्रवर्तेरन्कथं क्रतुभुजो वयं ॥३४॥ शिवविष्णवागमपरैर्लिंगचक्रादिचिह्नितैः । पाषंडैः कर्म संन्यस्तं कारुण्यमिव दुर्जनैः ॥३५॥ अनन्येनैव भावेन गच्छंत्युत्तमपूरुषं । श्रुतिः साध्वी मदक्षीबैः का वा शाक्तैर्न दूषिता ॥३६॥[5] सद्यः कृत्तद्विजशिरःपंकजार्चितभैरवैः । न ध्वस्ता लोकमर्यादा का वा कापालिकाधमैः ॥३७॥ अन्येऽपि बहवो मार्गाः संति भूमौ ससंकटाः । जनैर्येषु पदं दत्त्वा दुरंतं दुःखमाप्यते ॥३८॥ तद्भवाँल्लोकरक्षार्थमुत्साद्य निखिलान्खलान् । वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥३९॥ इत्युक्त्वोपरतान्देवानुवाच गिरिजाप्रियः । मनोरथं पूरयिष्ये मानुष्यमवलंब्य वः ॥४०॥ दुष्टाचारविनाशाय धर्मसंस्थापनाय च । भाष्यं कुर्वन्ब्रह्मसूत्रतात्पर्यार्थविनिर्णयं ॥४१॥ मोहनप्रकृतिद्वैतध्वांतमध्याह्नभानुभिः । चतुर्भिः सहितः शिष्यैश्चतुर्भिर्हरिवद्भुजैः ॥४२॥[6] यतींद्रः शंकरो नाम्ना भविष्यामि महीतले । मद्वत्तया भवंतोऽपि मानुषीं तनुमाश्रिताः ॥४३॥ तं मामनुसरिष्यंति सर्वे त्रिदिववासिनः । तदा मनोरथः पूर्णो भवतां स्यान्न संशयः ॥४४॥ ब्रुवन्नेवं दिविषदः कटाक्षानन्यदुर्लभान् । कुमारे निदधे भानुः किरणानिव पंकजे ॥४५॥ क्षीरनीरनिधेर्वीचिसचिवान्प्राप्य तान्गुहः । कटाक्षान्मुमुदे रश्मीन्कुमुद्वानैंदवानिव ॥४६॥ अवदन्नंदनं स्कंदममंदं चंद्रशेखरः । दंतचंद्रातपानंदिवृंदारकचकोरकः[7] ॥४७॥ शृणु सौम्य वचः श्रेयो जगदुद्धारगोचरं । कांडत्रयात्मके[8] वेदे प्रोद्धृते स्याद्द्विजोद्धृतिः ॥४८॥ तद्रक्षणे रक्षितं स्यात्सकलं जगतीतलं । तदधीनत्वतो वर्णाश्रमधर्मततेस्, ततः ॥४९॥ इदानीमिदमुद्धार्यमिति वृत्तिमतः पुरा । मम गूढाशयविदौ विष्णुशेषौ समीपगौ ॥५०॥ मध्यमं कांडमुद्धर्तुमनुज्ञातौ मयैव तौ । अवतीर्यांशतो भूमौ संकर्षणपतंजली ॥५१॥ मुनी

---

[1] चिंतयानंतया Schol. B. E. I. H. 441. चिंतया मेऽनया E. I. H. 1960.

[2] *Khaṇḍin* vocabulo *Harsha* significatur.

[3] Schol. व्यास इवाचलः स्थिरश्चासौ कविश्रेष्ठश्चेति व्यासाचलकविवरो माधवः । Me vero nescio quae impellunt, ut sub hoc epitheto veri auctoris nomen (Vyásagiri ?) latere existimem.

[4] Hastadhátrí = Hastámalaka.

[5] ‘Quae animo integro uni viro summo devota est, num quaequam traditio honesta (quasi matrona) superstes est, quae non a superstitionis Ṣákticae asseclis temulentis contaminata sit.’ Auctor doctrinas sacras cum matronis comparat, quibus utrisque Ṣáktas prave usos esse constat.

[6] ‘Cum quatuor aptis discipulis conjunctus, sicut Hari quatuor manibus, qui, sol velut meridianus, dualitatis tenebras dispellent, fatuitate (*ajnána*) productas . . .’

[7] दंतचंद्रामितानं° A. et E. I. H. 1960.

[8] Schol. कांडत्रयात्मके । कर्मोपसनाज्ञानभेदेन वृंदत्रयात्मके ।

भूत्वा तदोपास्तियोगकांडकृतौ[1] स्थितौ । अग्रिमं ज्ञानकांडं तूद्धरिष्यामीति, देवता: ॥५२॥ संप्रति प्रतिजाने स्म, जानात्येव भवानपि । जैमिनीयन्यायवार्धे: शरत्पर्वशशी भव ॥५३॥ विशिष्टं कर्मकांडं त्वमुद्धर ब्रह्मण: कृते । सुब्रह्मण्य इति ख्यातिं गमिष्यसि ततो, ऽधुना ॥५४॥ नैगमीं कुरु मर्यादामवतीर्य महीतले । निर्जित्य सौगतान्सर्वानाम्नायार्थविरोधिन: ॥५५॥ ब्रह्मापि ते सहायार्थं मंडनो नाम भूसुर: । भविष्यति महेंद्रोऽपि सुधन्वा नाम भूमिप: ॥५६॥ तथेति प्रतिजग्राह विधेरपि विधायिनीं । बुधानीकपतिर्वाणीं सुधाधारामिव प्रभो: ॥५७॥ अथेंद्रो नृपतिर्भूत्वा प्रजा धर्मेण पालयन् । दिवं चकार पृथिवीं स्वपुरीममरावतीं ॥५८॥ सर्वज्ञोऽप्यसतां शास्त्रे कृत्रिमश्रद्धयान्वित: । प्रतीक्षमाण: क्रौंचारिं मेलयामास सौगतान् ॥५९॥ तत: स तारकारातिरजनिष्ट महीतले । भट्टपादाभिधा यस्य भूषा दिक्सुदृशामभूत् ॥६०॥ स्फुटयन्वेदतात्पर्यमभाज्जैमिनिसूत्रितं । सहस्रांशुरिवानूरुव्यंजितं भासयञ्जगत् ॥६१॥ राज्ञ: सुधन्वन: प्राप नगरीं स जयन्दिश: । प्रत्युद्गम्य क्षितींद्रोऽपि विधिवत्तमपूजयत् ॥६२॥ सोऽभिनंद्याशिषा भूपमासीन: कांचनासने । तां सभां शोभयामास सुरभिर्द्युवनीमिव ॥६३॥ सभासमीपविटपिश्रितकोकिलकूजितं । श्रुत्वा जगाद तद्व्याजाद्राजानं पंडिताग्रणी: ॥६४॥ मलिनैश्चेन्न संगस्ते नीचै: काककुलै: पिक । श्रुतिदूषकनिर्ह्रादै: श्लाघनीयस्तदा भवे: ॥६५॥ षडभिज्ञा निशम्येमां वाचं तात्पर्यगर्भितां । नितरां चरणस्पृष्टा भुजंगा इव चुक्रुधु: ॥६६॥ छित्त्वा युक्तिकुटारेण बुद्धसिद्धांतशाखिनं । स तज्ज्ञैर्येंधनैश्शीर्णै: क्रोधज्वालामवर्धयत् ॥६७॥ सा सभा वदनैस्तेषां रोषपाटलकांतिभि: । बभौ बालातपाताम्रै: सरसीव सरोरुहै: ॥६८॥ उपन्यस्यत्सु साक्षेपं खंडयत्सु परस्परं । तेषूदतिष्ठन्निर्घोषो भिंदन्निव रसातलं ॥६९॥ अध: पेतुर्बुधेंद्रेण क्षता: पक्षेषु तत्क्षणं । व्यूढकर्कशतर्केण तथागतधराधरा: ॥७०॥[2] स सर्वज्ञपदं विज्ञोऽसहमान इव द्विषां । चकार चित्रविन्यस्तानेतान्मौनविभूषितान् ॥७१॥ तत: प्रक्षीणदर्पेषु बौद्धेषु वसुधाधिपं । बोधयन्बहुधा वेदवचांसि प्रशशंस स: ॥७२॥ बभाषेऽथ धराधीशो विद्यायत्तौ जयाजयौ । य: पतित्वा गिरे: शृंगादव्ययस्तन्मतं ध्रुवं ॥७३॥ तदाकर्ण्य मुखान्यन्ये परस्परमलोकयन् । द्विजाग्र्यस्तु स्मरन्वेदानारुरोह गिरे: शिर: ॥७४॥ यदि वेदा: प्रमाणं स्युर्भूयात्काचिन्न मे क्षति: । इति घोषयता तस्मान्न्यपाति सुमहात्मना ॥७५॥ किमु दौहित्रदत्तेऽपि पुण्ये विलयमास्थिते । ययातिश्च्यवते स्वर्गात्पुनरित्यूचिरे जना: ॥७६॥ अपि लोकगुरु: शैलात्तूलपिंड इवापतत् । श्रुतिरात्मशरण्यानां व्यसनं नो छिनत्ति किं ॥७७॥ श्रुत्वा तदद्भुतं कर्म द्विजा दिग्भ्य: समाययु: । घनघोषमिवाकर्ण्य निकुंजेभ्य: शिखावला: ॥७८॥ दृष्ट्वा तमक्षतं राजा श्रद्धां श्रुतिषु संदधे । निनिंद बहुधात्मानं खलसंसर्गदूषितं ॥७९॥ सौगतास्त्वब्रुवन्नेदं प्रमाणं मतनिर्णये । मणिमंत्रौषधैरेवं देहरक्षा भवेदिति ॥८०॥ दुर्विधैरन्यथानीते प्रत्यक्षेऽर्थेऽपि पार्थिव: । भ्रुकुटीभीकरमुख: संधामुग्रतरां व्यधात् ॥८१॥ पृच्छामि भवत: किंचिद्वक्तुं न प्रभवंति ये । यंत्रोपलेषु सर्वांस्तान्घातयिष्याम्यसंशयं ॥८२॥ इति संश्रुत्य[3] गोत्रेशो घटमाशीविषान्वितं । आनाय्यात्र[4] किमस्तीति पप्रच्छ द्विजसौगतान्[5] ॥८३॥ वक्ष्यामहे वयं भूय: श्व: प्रभातेऽस्य निर्णयं । इति प्रसाद्य राजानं जग्मुर्भूसुरसौगता: ॥८४॥ पद्मा इव तपस्तेपु: कंठद्वयसपाथसि । द्युमणिं प्रति भूदेवा: सोऽपि प्रादुरभूत्तत: ॥८५॥ संदिश्य वचनीयांशमादित्येऽंतर्हिते द्विजा: । आजग्मुरपि निश्चित्य सौगता: कलशस्थितं ॥८६॥ ततस्ते सौगता: सर्वे भुजगोऽस्तीत्यवादिषु: । भोगीशभोगशयनो भगवानिति भूसुरा: ॥८७॥ श्रुतभूसुरवाक्यस्य वदनं पृथिवीपते: । कासारशोषणम्लानसारसश्रियमाददे ॥८८॥ अथ प्रोवाच दिव्या वाक् सम्राजमशरीरिणी । नुदंती संशयं तस्य सर्वेषामपि शृण्वतां ॥८९॥ सत्यमेव महाराज ब्राह्मणा यद्बभाषिरे । मा कृथा: संशयं तत्र भव सत्यप्रतिश्रव: ॥९०॥ श्रुत्वाशरीरिणीं वाणीं ददर्श वसुधाधिप: । मूर्ध्नि मधुद्विष: कुंभे सुधामिव सुराधिप: ॥९१॥ निरस्ताखिलसंदेहो विन्यस्तेतरदर्शनात् ।[6] व्यधादाज्ञां ततो राजा वधाय श्रुतिविद्विषां ॥९२॥ आ सेतोरा तुषाराद्रेर्बौद्धानावृद्धबालकं ।[7] न हंति य: स हंतव्यो भृत्यानित्यन्वशान्नृप: ॥९३॥ इष्टोऽपि दृष्टदोषश्चेद्वध्य एव महात्मनां । जननीमपि किं साक्षान्नावधीद्भृगुनंदन:[8] ॥९४॥ स्कंदानुसारिराजेन जैना धर्मद्विषो हता: । योगींद्रेणेव योगज्ञा विघ्नास्तत्त्वावलंबिना ॥९५॥ हतेषु तेषु दुष्टेषु परितस्तार कोविद: । श्रौतवर्त्म तमिस्रेषु नष्टेष्विव रविर्मह: ॥९६॥ कुमारिलमृगेंद्रेण हतेषु जिनहस्तिषु । निष्प्रत्यूहमवर्धंत श्रुतिशाखा: समंतत: ॥९७॥

प्रागित्थं ज्वलनभुवा प्रवर्तितेऽस्मि-
न्कर्माध्वन्यखिलविदा कुमारिलेन ।
उद्धर्तुं भुवनमिदं भवाब्धिमग्नं
कारुण्यांबुनिधिरियेष चंद्रचूड: ॥९८॥

इति श्रीमाधवीये तदुपोद्घातकथापर: ।
संक्षेपशंकरजये सर्गोऽयं प्रथमोऽभवत् ॥१॥[9]

Cap. I. Coelestes, quum inter homines verum deorum cultum in dies evanescere, dogmata vero heretica, et maxime Bauddharum placita, gliscere vidissent, a Ṣiva auxilium petunt. Isque, se in terra Ṣankarae forma manifestatum iri pollicitus, Skandam ad Sudhanvanem regem mittit. Quem deus, Kumárilae speciem gerens, duobus miraculis ad delendos Bauddhas impellit. 2. Incipit: ततो महेश: किल *Keraleshu* ṣrímad-*Vṛishádrau* करुणासमुद्र: । *Púrṇánadí*-puṇyataṭe स्वयंभूलिंगात्मनानंगधगाविरासीत् ॥१॥[10] तच्चोदित: कश्चन *Rájaṣekharaḥ* स्वप्ने मुहुर्दृष्टतदीयवैभव: । प्रासादमेकं परिकल्प्य सुप्रभं प्रावर्तयत्तस्य

[1] मुदोपास्तियोग° B.

[2] Si vocem *tarka* excipias, a montibus alienam, distichon optimi aevi poeta dignum est.

[3] इति निश्चित्य A. [4] आनीयात्र A. E. I. H. 441.

[5] i.e. et a Bráhmanis et a Bauddhis quaerebat.

[6] 'Omnibus dubiis compositis, quum aliud, atque imposuerat, conspexisset.'

[7] Sic E. I. H. 734. in margine. °बौद्धानावृद्धबालकान् A. °बौद्धानां वृद्धबालकं B. C. E. I. H. 1960. 441. वृद्धं बालकं चाभिव्याप्य Schol. [8] i.e. Parasuráma.

[9] Et hoc prooemium, et eos locos, qui infra excerpti sunt, codicibus collatis emendavi. [10] Schol. *jyotirlingátmaná*.

समर्हणं विभोः ॥२॥ तस्येश्वरस्य प्रणतार्तिहर्तुः प्रसादतः प्राप्तनिरीतिभावः। कश्चित्तदभ्यासगतोऽग्रहारः *Kálaty*-abhikhyo ऽस्ति महान्मनोज्ञः ॥३॥ कश्चिद्विपश्चिदिह निश्चलधीर्विरेजे *Vidyádhirája* इति विश्रुतनामधेयः। रुद्रो वृषाद्रिनिलयोऽवतरीतुकामो यत्पुत्रमात्मपितरं समरोचयत्सः ॥४॥ पुत्रोऽभवत्तस्य पुरात्तपुण्यैः सुब्रह्मतेजाः *Ṣivagurv*-abhikhyaḥ। ज्ञाने शिवो यो वचने गुरुश्चान्वर्थनामाकृत लब्धवर्णः ॥५॥ Ṣankara Ṣivagurus filius gignitur. 3. Eo nato, etiam alii dei mortalem formam induunt. Atque Vishṇu *Padmapáda,* Vimalae filius; Agni *Hastámalaka,* Prabhákarae filius; Váyu *Toṭaka; Udanka,* Ṣiládae filius[1]; Brahman *Sureṣvara*[2]; Váchaspati *Ánandagiri;* Aruṇa *Sanandana;* Varuṇa *Chitsukha* factus est. Eodem tempore Sarasvatí dea, Durvásasis jussu in terram descendere coacta, Vishṇumitrae sacerdotis filia nata est (Ṣoṇatíre), et adulta Viṣvarúpae (Maṇḍanae), Himamitrae filio, nupsit. 4. Incipit: अथ शिवो मनुजो निजमायया द्विजगृहे द्विजमोदमुपावहन्। प्रथमहायन एव समग्रहीत्सकलवर्णमसौ निजभाषिकां ॥१॥ द्विसम एव शिशुर्लिखिताक्षरं गदितुमक्षमताक्षरवित्सुधीः। अथ स काव्यपुराणमुपाशृणोत्स्वयमवैत्किमपि श्रवणं विना ॥२॥ Hoc in capite, quo res a Ṣankara puero gestae verbis nimis tumidis celebrantur, haec narratio sola lectu digna est: स हि (Ṣankara) जातु गुरोः कुले वसन्सवयोभिः सह भैक्ष्यलिप्सया। भगवान्भवनं द्विजन्मनो धनहीनस्य विवेश कस्यचित् ॥२१॥ तमवोचत तत्र सादरं वटुवर्यं गृहिणः कुटुंबिनी। कृतिनो हि भवादृशेषु ये वरिवस्यां प्रतिपादयंति ते ॥२२॥ विधिना खलु वंचिता वयं वितरीतुं वटवे न शक्नुमः। अपि भैक्ष्यमकिंचनत्वतो, धिगिदं जन्म निरर्थतां गतं ॥२३॥ इति दीनमुदीरयंत्यसौ प्रददावामलकं व्रतींदवे। करुणं वचनं निशम्य सोऽप्यभवज्ज्ञाननिधिर्दयार्द्रधीः ॥२४॥ स मुनिर्मुरभित्कुटुंबिनीं पदचित्रैर्नवनीतकोमलैः। मधुरैरुपतस्थिवान्स्तवैर्द्विजदारिद्र्यदशानिवृत्तये ॥२५॥ अथ कैटभजित्कुटुंबिनी तडिदुद्दामनिजांगकांतिभिः। सकलाश्च दिशः प्रकाशयंत्यचिरादाविरभूत्तदग्रतः ॥२६॥ अभिवंद्य सुरेंद्रवंदितं पदयुग्मं पुरतः कृतांजलिं। ललितस्तुतिभिः प्रहर्षिता तमुवाच स्मितपूर्वकं वचः ॥२७॥ विदितं तव वत्स हृद्गतं कृतमेभिर्न पुराभवे शुभं। अधुना मदपांगपातितां कथमेते महितामवाप्नुयुः ॥२८॥ इति तद्वचनं स शुश्रुवान्निजगादांब मयीदमर्पितं। फलमद्य ददस्व तत्फलं दयनीयो यदि तेऽहमिंदिरे ॥२९॥ अमुना वचनेन तोषिता कमला तद्भवनं समंततः। कनकामलकैरपूरयज्जनताया हृदयं च विस्मयैः ॥३०॥ 5 (inc. fol. 132ᵃ). Ṣankaram Rájaṣekhara, Keralae rex, invisit, et comoediis tribus recitatis conciliat (1–30)[3]. Ordinibus mediis omissis, Ṣankara puer, mendici errabundi (saṃnyásin) vita adoptata, Govindanátham magistrum adit, qui in eremo ad Indubhavám sito degebat[4]. 6. In Káṣí urbe commoratus, Ṣankara Sanandanam, e Chola regione oriundum (यत्रापगा वहति तत्र कवेरकन्या i. e. Káverí), in discipulorum numerum recipit, eique postea Padmapáda nomen tribuit (6, 71). A Ṣiva ipso edoctus, commentarium ad Brahmasútra componit[5]. Hic liber et nonnulli alii duodecimo aetatis anno in Badarívana scripti sunt: करतलकलिताद्वयात्मतत्त्वं क्षपितदुरंतचिरंतनप्रमोहं। उपचितमुदितोदितैर्गुणौघैरुपनिषदामयमुज्जहार[6] भाष्यं ॥६१॥ ततो महाभारतसारभूताः स व्याकरोद्भागवतीश्च गीताः। सनत्सुजातीयमसत्सुदूरं ततो नृसिंहस्य च तापनीयं ॥६२॥ 7. Vyása quum Ṣankaram convenisset, aphorismorum suorum interpretationem commendat (1–60). Exinde Ṣankara Prayágam ad refutanda Kumárilae placita proficiscitur: भाष्यस्य वार्त्तिकमथैष कुमारिलेन भट्टेन कारयितुमादरवान्मुनींद्रः। बंध्यायमानदरविंध्यमहीधरेण वाचंयमेन चरितां हरितं (i. e. australis regio, Agastyadiṣ) प्रतस्थे ॥६१॥ ततः स वेदांतरहस्यवेत्ता भेत्तामतांतरसंमतानां। प्रयागमागात्प्रथमं जिगीषुः कुमारिलं साधितकर्मजालं ॥६२॥ Ṣankarae cum Kumárila colloquium. 8. Ṣankara ad confutandum Maṇḍanamiṣram[7] proficiscitur: अथ प्रतस्थे भगवान्प्रयागात्तन्मंडनं पंडितमाशु जेतुं। गच्छन्खसृत्या पुरमालुलोके माहिष्मतीं मंडनमंडितां सः ॥१॥ तस्मिन् (scil. in luco) स विश्रम्य कृताह्निकः सन्खस्वस्तिकारोहणशालिनीने। गच्छन्नसौ मंडनपंडितौको दासीस्तदीयाः स ददर्श मार्गे ॥४॥ कुत्रालयो मंडनपंडितस्येत्येनाः स पप्रच्छ जलाय गंत्रीः। ताश्चापि दृष्ट्वाद्भुतशंकरं तं संतोषवत्यो ददुरुत्तरं स्म ॥५॥

---

[1] उदभावि शिलादसूनुना मदवद्वादिकदंबनिग्रहैः। समुदंचितकीर्तिशालिनं यमुदंकं ब्रुवते महीतले ॥५॥ Schol. Ṣiládasya súnuná putreṇa *Ánandi*saṃjnakenodabhávi.

[2] *Maṇḍana*-aparasaṃjnaḥ. Conf. dist. 8. चार्वाकदर्शनविधानसरोषधातृशापेन गोष्पतिरभूद्भुवि मंडनाख्यः। नंदीश्वरः करुणयेश्वरचोदितः सन्नानंदगिर्यभिधया व्यजनीति केचित्।

[3] Plurima hujus partis disticha in similem sonum desinunt. Cf. तेन पृष्टकुशलः क्षितिपालः स्वेन सृष्टमथ (i. e. a se factas tres fabulas) शात्रवकालः। हाटकायुतसमर्पणपूर्वं नाटकत्रयमवोचदपूर्वं ॥२५॥ तद्रसार्द्रगुणरीतिविशिष्टं भद्रसंधिरुचिरं सुकवीष्टं। संग्रहेण स निशम्य सुवाचं तं गृहाण वरमित्यमुमूचे ॥२६॥

[4] व्यासः पराशरसुतः किल सत्यवत्यां तस्यात्मजः शुकमुनिः प्रथितानुभावः। तच्छिष्यतामुपगतः किल गौडपादो गोविंदनाथमुनिरस्य च शिष्यभूतः ॥५॥

[5] भास्कराभिनवगुप्तपुरोगान्नीलकंठगुरुमंडनमुख्यान्। पंडितानथ विजित्य जगत्यां ख्यापयाद्वयमते परतत्त्वं ॥५०॥ Schol. भास्करो भेदाभेदवादी। अभिनवगुप्तः शाक्तः। नीलकंठो भेदवादी शैवः। गुरुः प्रभाकरः। मंडनमिश्रो भाट्टमतानुयायी।

[6] Schol. ईशकेनकठप्रश्नमुंडकमांडूक्यतैत्तिरीयैतरेयछांदोग्यबृहदारण्यकाख्यानां वेदांतानां।

[7] उंवेक इत्यभिहितस्य तस्य लोकैरुंवेति बांधवैरभिधीयमाना। हेतोः कुतश्चिदिह वाक् परुषाभिशप्ता दुर्वाससाजनि वधूर्द्वयभारतीति ॥ 7, 116. Populare igitur Maṇḍanae nomen *Umveka* fuit.

‘स्वतः प्रमाणं, परतः प्रमाणं?’ कीरांगना यत्र गिरं गिरंति । द्वारस्थनीडांतरसंनिरुद्धा जानीहि तन्मंडनपंडितौकः ॥६॥ ‘फलप्रदं कर्म, फलप्रदोऽजः?’ कीरांगना यत्र गिरं गिरंति । द्वा° ॥७॥ ‘जगद्ध्रुवं स्याज्जगदध्रुवं स्यात्?’ कीरांगना यत्र गिरं गिरंति । द्वा°[1] ॥८॥ Maṇḍanae de dualitate disputatio. 9 (fol. 159ᵃ). Maṇḍana se a Ṣankara victum esse profitetur. Ṣankara autem ipse, ne a Sarasvatí, illius uxore, superaretur, Amarakae regis mortui corpus intrat. Quae occasione oblata traditur fabula de cadaveris a vivis intrandi facultate, eam subjunxi: मत्स्येंद्रनामा[2] हि पुरा महात्मा गोरक्षमादिश्य निजांगगुप्त्यै । नृपस्य कस्यापि तनुं परासोः प्रविश्य तत्पत्तनमाससाद ॥८०॥ भद्रासनाध्यासिनि योगिवर्ये भद्राख्यनिद्राख्यभवन्प्रजानां । ववर्ष कालेषु वलाहकोऽपि सस्यानि चाशास्यफलान्यभूवन् ॥८१॥ विज्ञाय विज्ञाः सचिवा नृपस्य काये प्रविष्टं कमपीह दिव्यं । समादिशन्नाजसरोरुहाक्षीः सर्वात्मना तस्य वशीक्रियायै ॥८२॥ संगीतलास्याभिनयादिमेषु संसक्तचेता ललितेषु तासां । स एष विस्मृत्य मुनिः समाधिं सर्वात्मना प्राकृतवद्बभूव ॥८३॥ गोरक्ष एषोऽस्य गुरोः प्रवृत्तिं विज्ञाय रक्षन्बहुधास्य देहं । निशांतकांतानटनोपदेष्टा नितांतमस्याभवदंतरंगः ॥८४॥ तत्रैकदा तत्त्वनिबोधनेन निवृत्तरागं निजदेशिकं सः । योगानुपूर्वीमुपदिश्य निन्ये यथापुरं प्राक्तनमेव देहं ॥८५॥ 10. Kámaṣástram edoctus[3], Ṣankara in Maṇḍanae eremum revertitur, Sarasvatí divinam formam recuperat, Maṇḍana veram religionem amplectitur, et *Sureṣvarae* cognomine a Ṣankara inter discipulos recipitur[4]. In Mahárashṭram profectus, Ṣankara in Ṣríṣaila monte Mallikárjunam adorat. 11. Ṣankara insidias ab Ugrabhairava kápálika sibi structas miraculo effugit: तत्रैकदाच्छादितनैजदोषः पौलस्त्यवत्कल्पितसाधुवेषः । निर्मानमायं स्थितकार्यशेषः कापालिकः कश्चिदनल्पदोषः ॥१॥ असावपश्यन्मदनाद्यवश्यं वश्येंद्रियाश्चैर्मुनिभिर्विमृग्यं । आदिश्य भाष्यं सपदि प्रशस्यमासीनमाश्रित्य मुनिं रहस्यं ॥२॥ दृष्ट्वैव हृष्टः स चिरादभीष्टं निर्धार्य संसिद्धमिव स्वमिष्टं । महद्विशिष्टं निजलाभतुष्टं विस्पष्टमचष्ट च कृत्यशिष्टं ॥३॥ गुणांस्तवाकर्ण्य मुनेऽनवद्यान्सार्वज्ञसौशील्यदयालुताद्यान् । द्रष्टुं समुत्कंठितचित्तवृत्तिर्भवंतमागां विदितप्रवृत्तिः ॥४॥ त्वमेक एवात्र निरस्तमोहः पराकृतद्वैतवचःसमूहः । आभासि दूरीकृतदेहमानः शुद्धाद्वये योजितसर्वमानः ॥५॥ परोपकृत्यै प्रगृहीतमूर्त्तिरमर्त्यलोकेष्वपि गीतकीर्त्तिः । कटाक्षलेशार्दितसज्जनार्त्तिः सदुक्तिसंपादितविश्वमूर्त्तिः ॥६॥ गुणाकरत्वाद्भुवनैकमान्यः समस्तविद्यादभिमानशून्यः । विजित्वरत्वान्नलहस्तितान्यः स्वात्मप्रदत्वाच्च महावदान्यः ॥७॥ अशेषकल्याणगुणालयेषु परावरज्ञेषु भवादृशेषु । कार्यार्थिनः क्वाप्यनवाप्य कामं न यांति दुष्प्रापमपि प्रकामं ॥८॥ तस्मान्महत्कार्यमहं प्रपद्य निर्वर्तितं सर्वविदा त्वयाद्य । कापालिनं प्रीणयितुं यतिष्ये कृतार्थमात्मानमतः करिष्ये ॥९॥ अनेन देहेन सहैव गंतुं कैलाशमीशेन समं च रंतुं । अतोऽयं तीव्रतपोभिरुग्रं सुदुष्करैरब्दशतं समग्रं ॥१०॥ तुष्टोऽब्रवीन्मां गिरिशोऽमुमर्थमभीप्सितं प्राप्स्यसि मत्प्रियार्थं । जुहोषि चेत्सर्वविदः शिरो वा हुताशने भूमिपतेः शिरो वा ॥११॥ एतावदुक्त्वांतरधान्महेशस्तदादि तत्संग्रहणे धृताशः । चराम्यथापि क्षितिपो न लभ्यो न सर्ववित्तत्र मयोपलब्धः ॥१२॥ दिष्ट्याद्य लोकस्य हिते चरंतं सर्वज्ञमद्राक्षमहं भवंतं । इतः परं सेत्स्यति मेऽनुबंधः संदर्शनांतो हि जनस्य बंधः ॥१३॥ मूर्धाभिषिक्तस्य शिरःकपालं मुनीशितुर्वा मम सिद्धिहेतुः । आद्यं पुनर्मे मनसाप्यलभ्यं ततः परं तत्रभवान्प्रमाणं ॥१४॥ शिरःप्रदानेऽद्भुतकीर्तिलाभस्तवापि लोके मम सिद्धिलाभः । आलोच्य देहस्य च नश्वरत्वं यद्रोचते सत्तम तत्कुरु त्वं ॥१५॥ तद्याचितुं न क्षमते मनो मे को वेष्टदायी स्वशरीरमुज्झन् । भवान्विरक्तो न शरीरमानी परोपकाराय धृतात्मदेहः ॥१६॥ जनाः परक्लेशकथानभिज्ञा नक्तंदिवं स्वार्थकृतात्मचिन्ताः । रिपुं निहंतुं कुलिशाय वज्री दाधीचमादत्किल वांछितास्थि ॥१७॥ दधीचिमुख्याः क्षणिकं शरीरं त्यक्त्वा, परार्थे स्म यशःशरीरं । प्राप्य स्थिरं सर्वगतं, जगंति गुणैरनर्घ्यैः खलु रंजयंति ॥१८॥ वपुर्धरंते परतुष्टिहेतोः केचित्प्रशांता दयया परीताः । अस्मादृशाः केचन संति लोके स्वार्थैकनिष्ठा दयया विहीनाः ॥१९॥ परोपकारं न विनास्ति किंचित्प्रयोजनं ते विधुतैषणस्य । अस्मादृशाः कामवशास्तु युक्तायुक्ते विजानंति न हंत योगिन् ॥२०॥ *Jímútaváho* निजजीवदायी दधीचिरप्यस्थि मुदा ददानः । आचंद्रताराकमपायशून्यं प्राप्तौ यशः, कर्णपथं गतौ हि ॥२१॥ यद्यप्यदेयं ननु देहवद्भिर्मयार्थितं गर्हितमेव सद्भिः । तथापि सर्वत्र विरागवद्भिः किमस्त्यदेयं परमार्थविद्भिः ॥२२॥ अखंडमूर्धन्यकपालमाहुः संसिद्धिदं साधकपुंगवेभ्यः । विना भवंतं बहवो न संति तद्वत्पुमांसो भगवन्पृथिव्यां ॥२३॥ प्रयच्छ शीर्षं भगवन्नमः स्तादितीरयित्वा पतितं पुरस्तात् । तमब्रवीद्वीक्ष्य सुधीरधस्तात्कृपालुरावृत्तमनाः[5] समस्तात् ॥२४॥ नैवाभ्यसूयामि वचस्त्वदीयं प्रीत्या प्रयच्छामि शिरोऽस्मदीयं । को वार्षिसात्प्राज्ञतमो नृकायं जानन्न कुर्यादिह बह्वपायं ॥२५॥ पतत्यवश्यं हि विकृष्यमाणं कालेन यत्नादपि रक्ष्यमाणं । वर्ष्मामुना सिध्यति चेत्परार्थः स एव मर्त्यस्य परः पुमर्थः ॥२६॥ वर्ते विविक्तेऽधिसमाधिसिद्धिविस्मितः समायाहि करोमि ते मतं । नाहं प्रकाशं वितरीतुमुत्सहे शिरःकपालं विजनं समाश्रय ॥२७॥ शिष्या विदंति यदि चिंतितकार्यमेतद्योगिन्मदेकशरणा विहतिं विदध्युः । को वा सहेत वपुरेतदपोहितुं स्वं, को वा क्षमेत निजनाथशरीरमोक्षं ॥२८॥ तौ संविदं वितनुतामिति संप्रहृष्टौ योगी जगाम मुदितो निलयं मनस्वी । श्रीशंकरोऽपि निजधामनि जोषमास्ते प्रोचे न किंचिदपि भावमसौ मनोगं ॥२९॥ शूली त्रिपुंड्री पुरतो व्यलोकि कंकालमालाकृतगात्रभूषः । संरक्तनेत्रो मदघूर्णिताक्षो योगी ययौ *Deṣika*-vásabhúmim ॥३०॥ शिष्येषु शिष्टेषु विदूरगेषु, स्नानादिकार्याय विविक्तभाजि । Ṣrí-*deṣikendre* तु सनंदनाख्ये, भीत्या स्वदेहं व्यवधाय गूढे ॥३१॥ तं भैरवाकारमुदीक्ष्य *deṣikas*

[1] Haec disticha Anantánandagirikṛitis imitatione facta sunt.

[2] De Matsyendra et Goraksha v. supra pp. 233, 236.

[3] Sankara ipse ejusmodi librum composuisse traditur: वात्स्यायनप्रोदितसूत्रजातं तदीयभाष्यं च निरीक्ष्य सम्यक् । स्वयं व्यधत्ताभिनवार्थगर्भं निबंधमेकं नृपवेषधारी ॥७८॥

[4] Sureṣvara = Brahman = Sarasvatís conjux.

[5] Kṛipálu B. कृतकृत् reliqui.

त्यक्तुं शरीरं व्यधित स्वयं मनः । आत्मानमात्मन्युदयुंक्त योजयन्समाहितात्मा करणानि संहरन् ॥३२॥ तं भैरवोऽलोकत लोकपूज्यं स्वसौख्यतुच्छीकृतदेवराज्यं । योगीशमासादितनिर्विकल्पं सनत्सुजातप्रभृतेरनल्पं ॥३३॥ जत्रुप्रदेशे चिबुकं निधाय व्यात्तास्यमुत्तानकरौ निधाय । जानूपरि प्रेक्षितनासिकांतं विलोचने सामि निमील्य कांतं ॥३४॥ आसीनमुच्चीकृतपूर्वगात्रं[1] सिद्धासने शेषितबोधमात्रं । चिन्मात्रविन्यस्तहृषीकवर्गं समाधिविस्मारितविश्वसर्गं ॥३५॥ विलोक्य तं हंतुमपास्तशंकः स्वबुद्धिपूर्वार्जिततीव्रपंकः । प्रापोद्यतासिः सविधं स यावद्विज्ञातवान्पद्मपदोऽपि तावत् ॥३६॥ त्रिशूलमुद्यम्य निहंतुकामं गुरुं यतात्मा समुदैक्षतांतः । स्थितश्रुकोप ज्वलिताग्निकल्पः स पद्मपादः स्वगुरोर्हितैषी ॥३७॥ स्मरन्नथैष स्मरदार्तिहारी प्रह्लादवश्यं परमं महस्तत् । स मंत्रसिद्धो नृहरेर्नृसिंहः श्रुत्वा ददर्शोग्रदुरीहचेष्टां ॥३८॥ स तत्क्षणक्षुब्धनिजस्वभावः प्रवृद्धरुड्विस्मृतमर्त्यभावः । आविष्कृतात्युग्रनृसिंहभावः समुत्पपाताatुलितप्रभावः ॥३९॥ सटाछटास्फोटितमेघसंघस्तीव्रारवत्रासितभूतसंघः । संवेगसंमूर्छितलोकसंघः किमेतदित्याकुलदेवसंघः ॥४०॥ क्षुभ्यत्समुद्रं समुदूढरौद्रं रटन्निशाटं स्फुटदद्रिकूटं । ज्वलद्दिशांतं प्रचलद्धरांतं प्रभ्रश्यदक्षं दलदंतरिक्षं ॥४१॥ जवादभिद्रुत्य शितस्वरूग्रैर्दैत्येश्वरस्येव पुरा नखाग्रैः । क्षिपन्त्रिशूलस्य स तस्य वक्षो ददार विक्षिप्तसुरारिपक्षः ॥४२॥ तत्रादृगत्युग्रनखायुधाग्र्यो दंष्ट्रांतरप्रोतदुरीहदेहः । नृत्यं प्रचक्रे[2] नृहरिर्विदीर्णद्युपट्टनाट्टालिकाट्टहासं ॥४३॥ आकर्णयंस्तं निनदं वहिर्गता उपागमन्नाकुलचित्तवृत्तयः । व्यलोकयन्भैरवमग्रतो मृतं ततो विमुक्तं च गुरुं सुखोषितं ॥४४॥ 12 (fol. 174[a]). Deinde Gokarṇam, Hariṣankaram, Múkámbikáyáḥ sadanam proficiscitur[3]. In Ṣríbali vico Prabhákarae filium surdum et mutum sanat. In Ṣṛingagiri Sarasvatís templum condit: या *Ṣáradámbety* अभिधां वहंती कृतां प्रतिज्ञां प्रतिपालयंती । अद्यापि *Ṣṛingeripure* वसंती प्रद्योततेऽभीष्टवरान्दिशंती ॥६९॥ Toṭaka[4] (sive Troṭaka) a magistro quatuordecim scientias docetur. 13. Sureṣvaram, quem ad scribendum Bádáráyaṇasútravárttikam ipse adhortatus erat, Ṣankara, monentibus reliquis discipulis, illum disciplinae in ritibus observandis summum bonum quaerentis asseclam esse, ab opere absolvendo arcet, et ad explicandos alios libros suos impellit: इत्युक्तोपरते सुरेश्वरगुरौ, तेनैव 'शारीरके नो संभाव्यहहात्र वार्त्तिकं' इति प्रौढः शुगग्निं शनैः । धीराग्र्यः शमयन्विवेकपयसा देवेश्वरेण त्रयीभाष्ये[5] कारयितुं स वार्त्तिकयुगं बद्धादरोऽभून्मुनिः ॥६३॥ भावानुकारिमृदुवाक्यनिवेशितार्थं स्वीयैः पदैः सह निराकृतपूर्वपक्षं । सिद्धांतयुक्तिविनिवेशिततत्स्वरूपं दृष्ट्वाभिनंद्य परितोषवशादवोचत् ॥६४॥ सत्यं यदात्थ विनयिन्मम याजुषी या शाखा तदंतगतभाष्यनिबंध इष्टः । तद्वार्त्तिकं मम कृते भवता प्रणेयं सच्चेष्टितं परहितैकफलं प्रसिद्धं ॥६५॥ तद्वत्त्वदीया खलु काण्वशाखा ममापि तत्रास्ति तदंतभाष्यं । तद्वार्त्तिकं चापि विधेयमिष्टं परोपकाराय सतां प्रवृत्तिः ॥६६॥ तत्रोभयत्र कुरु वार्त्तिकमार्तिहारि कीर्तिं च याहि जितकार्त्तिकचंद्रिकाभां । मा शंकि पूर्वमिव दुःशठवाक्यरोधो मद्वाक्यमेव शरणं व्रज मा विचारीः ॥६७॥ इत्थं स उक्तो भगवत्पदेन श्रीविश्वरूपो विदुषां वरिष्ठः । चकार भाष्यद्वयवार्त्तिके द्वे आज्ञा गुरूणां ह्यविचारणीया ॥६८॥ आज्ञा गुरोरनुचरैर्न हि लंघनीयेत्युक्त्वा तयोर्निगमशेखरयोरुदारं । निर्माय वार्त्तिकयुगं[6] निजदेशिकाय निःसीमनिस्तुलनधीरुपदीचकार ॥६९॥ *Sanandano* náma guror anujnayá bháshyasya ṭíkám vyadhiteritaḥ parám । yatpúrvabhágaḥ kila *Panchapádiká,* tachchheshagá *Vṛittir* iti prathíyasí ॥ 70 ॥ Vyásarshisútranichayasya vivechanáya *ṭíkábhidhaṃ vijayaḍiṇḍimam* átmakírteḥ । nirmáya *Padmacharaṇo*[7] niravadyayuktidṛibdham prabandham akarod gurudakshiṇáṃ saḥ ॥ 71 ॥ आलोचयन्नथ तदानु गतिं ग्रहाणामूचे सुरेश्वरसमाह्वमुपह्वरे सः । पंचैव वत्स चरणाः प्रथिता इह स्युस्तत्रापि सूत्रयुगलद्वयमेव भूम्ना ॥७२॥ प्रारब्धकर्मपरिपाकवशात्पुनस्त्वं वाचस्पतित्वमधिगम्य वसुंधरायां । भव्यां विधास्यसितमां मम भाष्यटीकामाभूतसंलयमधिक्षिति सा च जीयात् ॥७३॥ इत्येवमुक्त्वाथ यतीश्वरोऽसावानंदगिर्यादिमुनीन्स हूत्वा । कुरुध्वमद्वैतपरान्निबंधानित्यन्वशान्निर्ममसार्वभौमः ॥७४॥ ते सर्वेऽप्यनुमतिमाप्य देशिकेंद्रोरानंदाचलमुखरा महानुभावाः । आतेनुर्जगति यथास्वमात्मतत्त्वांभोजार्कान्विशदतरान्निबंधान् ॥७५॥ 14. Padmapáda ad peragrandos locos sacros (tírthayátrá), Ṣankara ad visendam matrem moribundam proficiscitur (1–54). Padmapáda in regione australi haec sacraria adit: Kálahastíṣvaram (57), ubi Suvarṇamukharí fluvius; in Kánchíkshetra Ekámrádhíṣvaram Viṣvanátham, et Kalláleṣam[8] Lakshmíkántam adorat. Inde Puṇḍaríkapuram proficiscitur: पुंडरीकपुरमाययौ मुनिर्यत्र नृत्यति सदाशिवोऽनिशं । वीक्षते प्रकृतिरादिमा हृदा पार्वतीपरिणतिः शुचिस्मिता ॥६२॥ Ibi Ṣivagangátírtham. Idem quum, ad Rámasetum profecturus, apud

---

[1] °मुञ्चीकृत° vel °मुञ्ज्जीकृत° MSS. Schol. uchchaiḥ kṛitam.

[2] नृत्यं च चक्रे E. I. H. 1960. नृत्यं तदानीं reliqui.

[3] अंके निधाय व्यसुमात्मजातं महाकुलौ हंत मुहुः प्ररुद्य । तदेकपुत्रौ द्विजदंपती स दृष्ट्वा दयाधीनतया शुशोच ॥२१॥ अपारमंचत्यथ शोकमस्मिन्नभूयतोच्चैरशरीरवाचा । 'जायेत संरक्षितुमक्षमस्य जनस्य दुःखाय परं दयेति' ॥२२॥ आकर्ण्य वाणीमशरीरिणीं तामसाविति व्याहरति स्म विज्ञः । 'जगत्त्रयीरक्षणदक्षिणस्य सत्यं तवैकस्य तु शोभते सा' ॥२३॥ इतीरयत्येव पतौ द्विजातेः । सुतः सुखं सुप्त इवोदतिष्ठत् । समीपगैः सर्वजनीनमस्य चारित्र्यमालोक्य विसिस्मिये च ॥२४॥ रम्योपशल्यं कृतमालसालरसालहिंतालतमालसालैः । सिद्धिस्थलं साधकसंसदां तन्मूकांबिकायां स मुनिर्जगाहे ॥२५॥

[4] Olim *Giri* appellatus?

[5] Commentarios ad Upanishadas significari puto.

[6] Schol. वेदांतयोस्तैत्तिरीयबृहदारण्यसंज्ञयोस्तयोर्भाष्ययोरुदारं वार्त्तिकद्वयं निर्माय.

[7] i. e. ex auctoris nostri sententia *Sanandana*.

[8] कल्लाकेशं A.

cognatos devertisset, ab avunculo, monotheismi adversario, libri ejus concremantur. *Panchapádí* postea a Ṣankara ex memoria restituitur[1]. Desinit caput in versibus: कविताकुशलोऽथ केरलक्ष्माकमनः कश्चन *Rájaṣekharákhyaḥ* । मुनिवर्यममुं मुदा वितेने निजकोटीरनिघृष्टपत्नखाग्रः ॥१७१॥ प्रयते किमु *náṭakatrayí* (cf. cap. 2.) सेत्यमुना संयमिना ततो नियुक्तः । स्वयमुत्तरमाददे प्रमादादनले साहुतितामुपागतेति ॥१७२॥ मुखतः पठितां मुनींदुना तां विलिखन्नेष विसिस्मियेऽथ भूपः । वद किं करवाणि किंकरोऽहं वरदेति प्रणमन्व्यजिज्ञपच्च ॥१७३॥ नृप *Kálaṭi*-námakágrahára-dvijakarmánadhikáriṇo 'dya ṣaptáḥ । भवतापि तथैव ते विधेया वत पापा इति देशिकोऽशिषत्तं ॥१७४॥ पत्न्यांघ्री प्रतिपद्य नष्टविवृतिं तुष्टे पुनः केरलक्ष्मापालो यतिसार्वभौमसविधं प्राप्य प्रणम्यांजसा । लब्ध्वा तस्य मुखात्स्वनाटकवराख्यानंदपाथोनिधौ मज्जंस्तत्पादपद्मयुग्ममनिशं ध्यायन्प्रतस्थे पुरीं ॥१७५॥

15. Ṣankara, Sudhanvane rege comite et adjutore Indiae regiones peragrat: अथ शिष्यवरैर्युतः सहस्रैरनुयातः स सुधन्वना च राज्ञा । ककुभो विजिगीषुरेष सर्वाः प्रथमं *Setum* उदारधीः प्रतस्थे ॥१॥ अभवत्किल तस्य तत्र *Ṣáktair* Girijárchákapaṭán madhuprasaktaiḥ । निकटस्थवितीर्णभूरिमोदस्फुटरिंखत्पटुयुक्तिमान्विवादः ॥२॥ स हि युक्तिभिरेर्विधाय शाक्तान्प्रतिवाग्व्याहरणेऽपि तानशक्तान् । द्विजजातिबहिष्कृताननार्यानकरोल्लोकहिताय कर्मसेतुं ॥३॥[2] abhipújya sa tatra *Rámanátham*, saha *Páṇḍyaiḥ* svavaṣe vidháya *Cholán* । Draviḍáns cha, tato jagáma Kánchím nagarím Hastagirer nitambakánchím ॥4॥ सुरधाम स तत्र कारयित्वा परविद्याचरणानुसारि चित्रं । अपवार्य च तांत्रिकानतानीद्भगवत्याः श्रुतिसंमतां सपर्यां ॥५॥ निजपादसरोजसेवनायै विनयेन स्वयमागतानथांध्रान् । अनुगृह्य स Venkaṭáchaleṣam प्रणिपत्याथ *Vidarbharájadhánim* ॥6॥ अभिगम्य स भक्तिपूर्वमस्यां कृतपूजः क्रथकैशिकेश्वरेण । निजशिष्यनिरस्तदुष्टबुद्धीन्व्यदधाद्भैरवतंत्रसावलंबान् ॥७॥ Deinde in Karṇáta regionem proficiscitur, et ibi sectam Kápálikám[3] ad veram religionem perducit. Exinde in maris occidentalis viciniam proficiscitur: यतिराडथ तेषु तेषु देशेष्विति पाषंडपरान्विमथ्नन् । अपरांतमहार्णवोपकंठं प्रतिपेदे प्रतिवादिदर्पहंता ॥२९॥ Gokarṇae *Nílakanṭham* Ṣivaitam confutat, cujus *Haradatta* discipulus fuisse traditur[4]. तदनंतरमागमांतविद्यां प्रणतेभ्यः प्रतिपादयंतमेनं । हरदत्तसमाह्वयोऽधिगम्य स्वगुरुं संगिरते स्म नीलकंठं ॥३३॥ भगवन्निह शंकराभिधानो यतिरागत्य जिगीषुरार्यपादान् । स्ववशीकृतभट्टमंडनादिः सह शिष्यैर्गिरिशालये समास्ते ॥३४॥ इति तद्वचनं निशम्य सम्यग्ग्रथितानेकनिबंधरत्नहारः । *Ṣivatatparasútra*bháshyakartá प्रहसन्वाचमुवाच शैववर्यः ॥३५॥ यतिनामृषभेण नीलकंठं जितमाकर्ण्य मनीषिधुर्यवर्यं । सहसोदयनादयः कवींद्राः (i. e. *Udayana* et alii viri sapientes) परमं द्वैतमुपश्चकंपिरे स्म ॥७२॥ विषयेषु वितत्य नैजभाष्याख्यय सौराष्ट्रमुखेषु तत्र तत्र । बहुधा विबुधैः प्रशस्यमानो भगवान् *Dváravatím* पुरीं विवेश ॥७३॥ भुजयोरतितप्तशंखचक्राकृतिलोहाहतसंभृतव्रणांकाः । शरदंडसहोदरोर्ध्वपुंड्रास्तुलसीपर्णसनाथकर्णदेशाः ॥७४॥ शतशः समवेत्य पांचरात्रास्त्वमृतं पंचभिदाविदां[5] वदंतः । मुनिशिष्यवरैरतिप्रगल्भैर्मृगराजैरिव कुंजराः प्रभग्नाः ॥७५॥ इति वैष्णवशैवशाक्तसौरप्रमुखानात्मवशंवदान्विधाय । अतिवेलवचोलहरीनिरस्तप्रतिवाद्य् *Ujjayiním* पुरीमयासीत् ॥७६॥ Ibi Bháskaram[6] refutat (140). Inde in Avanti terram proficiscitur: स कथाभिरवंतिषु प्रसिद्धान्विबुधान् *Báṇa-Mayúra-Daṇḍi*-mukhyán । शिथिलीकृतदुर्मताभिमानान्निजभाष्यश्रवणोत्सुकांश्चकार ॥१४१॥, inde ad Báhlikas, ubi Jainarum placita refutat (155). इति माध्यमिकेषु भग्नदर्पेष्वथ भाष्याणि स नैमिषे वितत्य । दरदान्भरतांश्च शूरसेनान्कुरुपांचालमुखान्बहूनजैषीत् ॥१५६॥ पटुयुक्तिनिकृत्तसर्वशास्त्रं गुरुभट्टोदयनादिकैरजय्यं[7] । स हि *Khaṇḍanakára*-múḍhadarpam बहुधा व्युह्य वशंवदं चकार ॥१५७॥ तदनंतरमेष Kámarúpán अधिगत्याभिनवोपशब्दगुप्तं[8] । अजयत्किल Ṣáktabháshyakáram स च भग्नो मनसेदमालुलोचे ॥१५८॥ निगमाब्जविकाशिबालभानोर्न समोऽमुष्य विलोक्यते त्रिलोक्यां । न कथंचन मद्वशंवदोऽसौ तदमुं दैवतकृत्यया हरेयं ॥१५९॥ इति गूढमसौ विचिंत्य पश्चात्सह शिष्यैः सहसा स्वशाक्तभाष्यं । परिहृत्य जनापवादभीत्या यतिनः शिष्य इवान्ववर्ततैषः ॥१६०॥ निजशिष्यपदं गतानुदीच्यानिति कृत्वाथ विदेहकौशलाद्यैः । विहितापचितिस्तथांगवंगेष्वयमास्तीर्य यशो जगाम गौडान् ॥१६१॥ abhibhúya *Murárimiṣra*varyam sahasá cha-*Udayanam* vijitya váde । abhibhúya cha *Dharmaguptamiṣram* स्वयशः प्रौढमगाययत्स गौडान् ॥१६२॥

16. Abhinavagupta (J. I.?) fascinante Ṣankara morbo quodam desperato (bhagandara) afficitur, cui Padmapáda adhibitis precibus mysticis medetur (1–32): अथ यदा जितवान्यतिशेखरोऽभिनवगुप्तमनुत्तममांत्रिकं । स तु तदापजितो यतिगोचरं हतमनाः कृतवानपगोरणं ॥१॥ स ततोऽभिचचार मूढबुद्धिर्यतिशार्दूलममुं प्ररूढरोषः । अचिकित्स्यतमो भिषग्भिरस्मादजनिष्टास्य भगंदराख्यरोगः ॥२॥ अचिकित्स्यभगंदराख्यरोगप्रसरच्छोणितपंकिलस्य शाट्याः । अजुगुप्स्यविशोधनादिरूपां परिचर्या-

[1] ऐतिह्यमाश्रित्य वदंति चैव तदेव मूलं मम भाषणेऽपि ॥११६॥ Nescio an ex hac fabula, librum a recentiore quodem auctore retractatum esse, colligendum sit.

[2] एवं सेतुं प्रति प्रस्थितेन तत्र प्रस्थाने *Tulábhaváni*-nikaṭasthánám parájayam saṃkshepeṇa pradarsya etc. Schol.

[3] Pontifex eorum *Krakacha* fuisse dicitur.

[4] Ibidem hymnum Bhujanga metro usus scripsisse dicitur.

[5] Schol. अमृतं मोक्षं पंचभिदाविदां जीवेश्वरभेदो, जीवानां परस्परभेदो, जीवानामचितां भेद, ईश्वरस्याचितां भेदोऽचितां च परस्परभेद etc.

[6] Verba ejus: प्रशमिंस्त्वदुदीरितं न युक्तं 'प्रकृतिर्जीवपरात्मभेदिकेति'। न भिनत्ति जीवगेशगा वोभयभावस्य तदुत्तरोद्भवत्वात् ॥९४॥

[7] Guru = Prabhákara.

[8] i. e. Abhinavagupta.

मकृतास्य तोटकार्यः ॥३॥ Ṣankarae cum Gauḍapáda colloquium (33–53). Adversariis et obstaculis omnibus summotis, Ṣankara summam eloquentiae sedem ascendit. Quae res narratione pulcherrima traditur: अत्रांतरेऽश्रूयत लोकवार्त्ता ॥५४॥ जंबूद्वीपं शस्यतेऽस्यां पृथिव्यां तत्राप्येतन्मंडलं भारताख्यं । काश्मीराख्यं मंडलं तत्र शस्तं यत्रास्तेऽसौ शारदा वागधीशा ॥५५॥ द्वारैर्युक्तं मांडपैस्तच्चतुर्भिर्देव्या गेहं यत्र सर्वज्ञपीठं । यत्रारोहे सर्ववित्सज्जनानां नान्ये सर्वे यत्प्रवेष्टुं क्षमंते[1] ॥५६॥ प्राच्याः प्राच्यां पश्चिमाः पश्चिमांतां ये चोदीच्यास्तामुदीच्यां प्रपन्नाः । सर्वज्ञास्तां द्वारमुद्घाटयंतो दाक्षा नद्धं नो तदुद्घाटयंति[2] ॥५७॥ वार्त्तामुपश्रुत्य स दाक्षिणात्यो मानं तदीयं परिमातुमिच्छन् । काश्मीरदेशाय जगाम हृष्टः श्रीशंकरो द्वारमपावरीतुं ॥५८॥ द्वारं पिनद्धं किल दाक्षिणात्या न संति विद्वांस इतीह दक्षाः । तां किंवदंतीं विफलां विधातुं जगाम देवीनिलयाय हृष्यन् ॥५९॥ 'वादिव्रातगजेंद्रदुर्मदघटादुर्गर्वसंकर्षणः श्रीमच्छंकरदेशिकेंद्रमृगराडायाति सर्वार्थवित् । दूरं गच्छत वादिदुःसहतरः[3] संन्यासदंष्ट्रायुधो वेदांतोरुवनाश्रयस्तदपरं द्वैतं वनं भक्षति ॥६०॥ करटतटांतवांतमदसौरभसारभरस्खलदलिसंभ्रमत्कलभकुंभविजृंभिबलः । हरिरिव जंबुकावलिमुपात्तमदान्कुजनानपि खलु नाक्षिगोचरयतीह यतिर्हतकान्' ॥६१॥ संश्रावयन्नध्वनि देशिकेंद्रः श्रीदक्षिणद्वारभुवं प्रपेदे । कपाटमुद्घाट्य निवेष्टुकामं ससंभ्रमं वादिगणो न्यरौत्सीत् ॥६२॥ अथाब्रवीद्वादिगणः स देशिकं किमर्थमेवं बहुसंभ्रमक्रिया । यदत्र कार्यं तदुदीर्यतां शनैर्न संभ्रमः कर्तुमलं तदीप्सितं ॥६३॥ यः कश्चिदेतीति परीक्षितुं चेद्वेदाखिलं नाविदितं ममाण्वपि । इत्थं भवान्वक्ति समुन्नतेच्छो दत्त्वा परीक्षां व्रज देवतालयं ॥६४॥ षड्भाववादी[4] कणभुङ्मताश्रयः पप्रच्छ तं स्वीयरहस्यमेकं । 'संयोगभाजः परमाणुयुग्माज्जातं च सूक्ष्मं द्व्यणुकं मतं नः ॥६५॥ यत्स्यादणुत्वं तदुपाश्रितं तज्जायेत कस्माद्वद सर्वविच्चेत् । नो चेत्प्रभुत्वं तव वक्तुमेतत्सर्वज्ञभाषा विहिता कथं ते' ॥६६॥ 'या द्वित्वसंख्या परमाणुनिष्ठा सा कारणं तस्य गतस्य,' मात्रा[5] । इतीरिते तद्वचनं प्रपूज्य स्वयं न्यवर्तिष्ट कणादलक्ष्मीः ॥६७॥ तत्रापि नैयायिक आत्तगर्वः, 'कणादपक्षाच्चरणाक्षपक्षे[6] । मुक्तेर्विशेषं वद सर्वविच्चेन्नो चेत्प्रतिज्ञां त्यज सर्वविच्त्वे' ॥६८॥ 'अत्यंतनाशे गुणसंगतेर्या स्थितिर्नभोवत्कणभक्षपक्षे । मुक्तिस्त्वदीये चरणाक्षपक्षे सानंदसंवित्सहिता विमुक्तिः ॥६९॥ पदार्थभेदः स्फुट एव[7] सिद्धस्तथेश्वरः सर्वजगद्विधाता' । स ईशवादीत्युदितेऽभिनंद्य नैयायिकोऽपि न्यवृतद्विरोधात् ॥७०॥ तं कापिलः प्राह च 'मूलयोनिः किं वा स्वतंत्रा, चिदधिष्ठिता वा । जगन्निदानं वद सर्वविच्चान्नो चेत्प्रवेशस्तव[8] दुर्लभः स्यात्' ॥७१॥ 'सा विश्वयोनिर्बहुरूपभागिनी स्वयं स्वतंत्रा त्रिगुणात्मिका सती । इत्येव सिद्धांतगतिस्तु कापिली, वेदांतपक्षे परतंत्रता मता' ॥७२॥ ततो नदंतो न्यरुणत्सगर्वा 'दत्त्वा परीक्षां व्रज धाम देव्याः' । बौद्धास्तथा संप्रथिताः पृथिव्यां वाह्यार्थविज्ञानकशून्यवादैः ॥७३॥ 'वाह्यार्थवादो द्विविधस्तदंतरं वाच्यं विविक्षुर्यदि देवतालयं । विज्ञानवादस्य च किं विभेदकं भवन्मताद्ब्रूहि ततः परं व्रज' ॥७४॥ 'सौत्रांतिको वक्ति हि वेद्यजातं लिंगाधिगम्यं, त्वितरोऽक्षिगम्यं[9] । तयोस्तयोर्भंगुरता विशिष्टा, भेदः कियान्वेदनवेद्यभागी ॥७५॥ विज्ञानवादी क्षणिकत्वमेषामंगीचकारापि बहुत्वमेषः । वेदांतवादी स्थिरसंविदेकत्वं गीचकारेति महान्विशेषः' ॥७६॥ अथाब्रवीद्दिग्वसनानुसारी 'रहस्यमेकं वद सर्वविच्चेत् । यदस्ति कायोत्तरशब्दवाच्यं तत्किं मतेऽस्मिन्वद देशिकाशु' ॥७७॥ तत्राह देशिकवरः 'शृणु रोचते चेज्जीवादिपंचकमभीष्टमुदाहरंति । तच्छब्दवाच्यमिति जैनमते प्रशस्ते यद्यस्ति बोद्धुमपरं कथयाशु तन्मे' ॥७८॥ दत्तोत्तरे वादिगणे तु वाह्ये बभाण कश्चित्किल जैमिनीयः । 'शब्दः किमात्मा वद जैमिनीये द्रव्यं गुणो वेति, ततो व्रज त्वं' ॥७९॥ 'नित्या वर्णाः सर्वगाः श्रोत्रवेद्या यत्तद्रूपं शब्दजालं च नित्यं । द्रव्यं व्यापीत्यब्रुवञ्जैमिनीया' इत्येवं तं प्रोचिवान्देशिकेंद्रः ॥८०॥ शास्त्रेषु सर्वेष्वपि दत्तवंतं प्रत्युत्तरं तं समपूजयंस्ते । द्वारं समुद्घाट्य ददुश्च मार्गं ततो विवेशांतरभूमिभागं ॥८१॥ पाण्या सनंदनमसाववलंब्य विद्याभद्रासनं तदधिरोढुमनाश्चचाल । अत्रांतरे विधिवधूर्विबुधाग्रगण्यमाचार्यशंकरमवोचदनंगवाचा ॥८२॥ सर्वज्ञता तेऽस्ति पुरैव, यस्मात्सर्वत्र पर्यैक्षि भवान्, न चेत्ते । विरिंचिरूपांतरविश्वरूपः शिष्यः कथं स्यात्प्रथिताग्रणीः सः ॥८३॥ सर्वज्ञतैकैव भवेन्न हेतुः पीठाधिरोहे, परिशुद्धता च । सा तेऽस्ति वा नेति विचार्यमेतत्तिष्ठ क्षणं त्वं कुरु साहसं मा ॥८४॥ त्वं चांगनाः समुपभुज्य कलारहस्यप्रावीण्यभाजनमभूर्यतिधर्मनिष्ठः । आरोढुमीदृशपदं कथमर्हता ते, सर्वज्ञतेव विमलत्वमपीह हेतुः ॥८५॥ 'नास्मिञ्छरीरे कृतकिल्बिषोऽहं जन्मप्रभृत्येव न संदिहेऽहं । व्यधायि देहांतरसंश्रयाद्यन्न तेन लिप्येत हि कर्मणान्यः' ॥८६॥ इत्थं निरुत्तरपदां स विधाय देवीं सर्वज्ञपीठमधिरुह्य ननंद सभ्यः । संभावितोऽभवदसौ विबुधैश्च वाण्या गार्ग्या कहोलमुखैरिव याज्ञवल्क्यः ॥८७॥

In Badarikáṣrama[10] et Kedára moratus, Ṣankara divinam Ṣivae formam recuperat[11].

---

[1] Sensus hic videtur esse: 'Quod solium qui ascenderit, in omnium ingenuorum numero πάνσοφος declarabitur; minus doctos alii omnes ne in vestibulum quidem templi introire patiuntur.'

[2] 'Viri ex australi regione oriundi hucusque portam suam non aperuerunt.'

[3] दुःशठगजाः B. C.

[4] द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् भावाः ।

[5] मात्रा ज्ञाता ।

[6] चरणाक्ष = अक्षपाद = गौतम ।

[7] Gautamam veritatis cognoscendae instrumenta sedecim posuisse constat.

[8] चेद्विशेषस्तव omnes praeter B.

[9] इतरो वैभाषिकः ।

[10] एवं प्रकारैः किल कल्मषघ्नैः शिवावतारस्य शुभैश्चरित्रैः । द्वात्रिंशत् (i. e. anni) अत्युज्ज्वलकीर्तिराशेः समाव्यतीयुः किल शंकरस्य ॥९६॥

[11] His diebus quum libellus: '(Ellis.) *Dissertation the second. On the Malayálma language:*' inscriptus, in manus meas incidisset, in p. 28. hanc sententiam inveni: 'where (i.e. in Keralotpatti libro) it is stated, that, in consequence of the refusal of the Brahmans to attend his mother's obsequies, he (Ṣankara) burned her in his own house, which has since become a general practice throughout Malayalam.' Cf. Mádhava. Lib. XIV. स्वयमेव चिकीर्षुरेष मातुश्चरमं

Desunt in hoc codice disticha 97–107. capitis ultimi.

Auctor Anantánandagiris librum in usum suum ita convertit, ut permulta omiserit sive transposuerit, alia brevissime tractaverit, alia poetica licentia exornaverit et amplificaverit. A veritate hoc opus longius recedit, quam Ananta, quamquam nonnulla ex alio quodam fonte hausta esse videntur. Capita tria quatuorve ad philosophiam Vedánticam accuratius cognoscendam satis utilia erunt. Quae miracula Ṣankarae tribuuntur, nescio an Evangelii imitatione conficta sint. Multa certe in Ṣankarae vita sunt, qualis et nostro et Anantae libro traditur, quae suspicionem moveant, a Christo nonnulla in monotheismi Indici propugnatorem, corrupte quidem et ad superstitiones ethnicas accomodate, translata esse. Quae res investigatione accuratiore digna est.

Haec voluminis pars seculo superiore medio satis accurate exarata est. Fol. १०. (2, 84–3, 10.) desideratur. (Wilson 348^{b}.)

627.

Lit. Devan. Charta Ind. Foll. 287. Long. 13½. Lat. 6½. Linn. 12–16.

Sankshepaṣankarajayas, cum *Dhanapatis*, Rámakumárae filii, Bálagopálatírthae discipuli, commentario, *Ṣankaráchárуavijayaḍinḍima* appellato. (B.) Commentarius ab his distichis incipit, quae emendata subjeci: श्रीमद्विष्णु etc. ॥१॥

Numaḥ *ṣrí-Bálagopálatírthán Vyásamukhán* munín ।
Vighnahartṛín *Gaṇeṣádín* paṇḍitánṣ cha vimatsarán ॥2॥
Vyákhyánarahitasyásya vyákhyánam Ḍiṇḍimábhidham ।
Kriyate svíyabodháya, pramádaḥ kshamyatám budhaiḥ ॥3॥

Dhanapatim hanc operam anno 1799 absolvisse, ex his epilogi verbis patet:

पांडवेष्वहितारेशप्रमिते शुभवत्सरे ।
श्रावणे सितपंचम्यां सिंहे सिद्धो गुरावयं ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यसारस्वतजात्यंतर्गतदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिविरचिते श्रीमच्छंकराचार्यविजयडिंडिमे षोडशः सर्गः ॥ Res faciliores satis accurate expedit, difficiliorum explicationem ab ejus aevi homine frustra quaeras. Passim locos integros ex Anandagiris opere, et simili quadam Ṣankarae vita, necnon e hymnis Ṣankarae tributis excerpsit. Idem auctor *Vidyáratnákaram* (E. I. H. 343. 344), encyclopaediam literarum Sanskriticarum, in *Colebrooki* usum, ex operibus vulgatis sine ulla crisi compilavit.

Codex post annum 1820 exaratus est. (Mill 19.)

628.

Lit. Bengal. Charta Ind. Foll. 96. Long. 16. Lat. 5. Linn. 8.

Sankshepaṣankarajayas. (C.)

Idem liber in codd. E. I. H. 441. 724 (fragm.). 734 (cum Dhanapatis commentario, anno 1802 exarato). 1960 exstat. Quorum in codicum numero noster A. et cod. E. I. H. 441. textum exhibere videntur corruptelis minimis foedatum.

In cod. E. I. H. 1960. tertium *Ṣankaravijaya* inscriptum opus reperitur. Idque capita 32. continens et metro vulgari compositum dialogi forma a *Chidvilása* yatíndra cum *Vijnánakanda* tapodhanendra communicatur. Incipit: अस्तु स्वस्तिकृते वस्तु निस्तुलानंदनिर्भरं । वस्तु वा शांकरं नः स्तादीप्सितार्थसमृद्धये ॥१॥ Uter liber recentior sit, hujus loci non est quaerere; id solum monuisse velim, ab utroque auctore Ṣankaram frequentissime *deṣikendram* nuncupari, quae appellatio neque ab Ánandagiri usurpari, et ritus Tántricos olere videtur [1]. Codex e libris Johannis Taylor provenit, ideoque in Deccan regione (Godátaṭe) exaratus est.

Manuscriptum nostrum post annum 1820 exaratum est. (Mill 6.)

629.

Lit. Bengal. Charta Europ. Foll. 126. Long. 13. Lat. 8. Linn. 12–15.

Vidvanmodataranginí (fluvius sapientium animis delicias afferens) liber a *Rámadeva*, *Chiranjíva* cognomen gerente, *Rághavendrae* filio, Káṣínáthae nepote, scriptus et in octo capita (taranga) divisus. Primum, collato Weberi Catal. p. 158 sqq. paulum emendatum, subjunxi: तमोगुणविनाशिनी सकलकालमुद्योतिनी धरातलविहारिणी जडसमाजविद्वेषिणी । कलानिधिसहायिनी लसदलोलसौदामिनी मदं-

---

कर्म समाजुहाव बंधून् । किमिहास्ति यतेस्तवाधिकारः कितवेत्येनममी निनिंदुरुच्चैः ॥४६॥ अनलं बहुधार्थितापि तस्मै वत नादत्त च बंधुता तदीया । अथ कोपपरीवृतांतरोऽसावखिलांस्तानशपच्च निर्ममेंद्रः ॥४७॥ संचित्य काष्ठानि च शुष्कवंति गृहोपकंठे धृततोयपात्रः । स दक्षिणे दोष्णि ममंथ वह्निं ददाह तां तेन च संयतात्मा ॥४८॥ न याचिता वह्निमदुर्यदस्मै शशाप तान्स्वीयजनान्सरोषः । इतः परं वेदवहिष्कृतास्ते द्विजा यतीनां न भवेच्च भिक्षा ॥४९॥ गृहोपकंठेषु च वः श्मशानमद्यप्रभृत्यस्त्विति तांश्छशाप । अद्यापि तद्देशभवा न वेदमधीयते नो यतिनां च भिक्षा ॥५०॥ तदाप्रभृत्येव गृहोपकंठेष्वासीच्छ्मशानं किल हंत तेषां । महत्सु धीपूर्वकृतापराधो भवेत्पुनः कस्य सुखाय लोके ॥५१॥

---

[1] Nam quod *desika* per se magistrum (guru) significare dicitur, id nescio an ab angusti judicii lexicographis proficiscatur.

तरवलंबिनी भवतु कापि कादंबिनी ॥१॥ *Daksho* दक्षोपमेयः समजनि जनितारंभसंभावनीयो रक्षोविक्षोभभीतः प्रथितजनपदो रक्षितो येन Gauḍaḥ । तस्याशीर्वादटूर्वादलकलितशिखो भूपतेर्यज्ञयूपः संजातोऽनेकशाखः स्फुटमिव निगमो व्यासतो व्यासमाप्तः ॥२॥ क्रियादक्षस्य दक्षस्य *Ráḍhápura*nivásinaḥ । सौजन्यजनिता कीर्तिर्गौडदेशमपूरयत् ॥३॥ तस्य काश्यपगोत्रस्य कश्यपस्येव संततिः । प्रचुरा गौडदेशीयकुलीनाग्रसराभवत् ॥४॥ ब्राह्मण्याचारधाराचरणरसवशो हंसरूपोऽस्य वंशे *Káṣínáthá*bhidhánaḥ[1] समजनि विनतो गोषु च ब्राह्मणेषु । येनानीय प्रयत्नाद्द्विजचरणरजो मूर्ध्नि विन्यस्तमात्रं पुत्रादेरत्र सिद्धौषधमिव सहसानेकरोगाञ्जहार ॥५॥ सामुद्रिके सोऽथ समुद्रकल्पः *Sámudrikáchárya* इति प्रसिद्धिं । लेभे नृणामाकृतिदर्शनेन फलं वदन्भूतभविष्यदादि ॥६॥ अथ तस्य त्रयः पुत्रा जाताः पितृपरायणाः । *Rájendro, Rághavendraṣ* cha, *Maheṣaṣ* चेति ते क्रमात् ॥७॥ तेषामेष गुणोत्तरः समजनि ṣrí-*Rághavendraḥ* कृती बाल्ये यं समुदीक्ष्य लक्षणयुतं तातोऽनुरक्तोऽभवत् । लेभे षोडशवार्षिकः कृतिमतामानंदवृंदांकुरो *Bhaṭṭácháryaṣatávadhána*-padavíṃ यस्तीर्णविद्यार्णवः ॥८॥ बाल्येऽधीत्य समस्तशास्त्रमभितः *Siddhánta-vágíṣa-to* वागीशप्रतिमो बभूव विजयी वादेषु विद्यावतां । यस्यास्वाद्य सरस्वतीरससुधाधारैकसारा गिरो मूर्धांदोलनशालिनो हि कवयो गायंति नित्यं यशः ॥९॥ एकैकमेकैककविप्रयुक्तं श्लोकस्थितं वर्णमपव्यवस्थं । आकर्ण्य तत्संख्यमथ प्रयुंक्ते स्वयंकृतश्लोकगतं च वर्णं ॥१०॥ रीत्यानया श्लोकशतं कवीनां शतस्य निर्वर्त्त्यवधारयित्वा । समस्यया पूर्तिमतीमथैतां स्वयंकृतश्लोकशतीं तथैव ॥११॥ अतोऽभिधानेन शतावधानो बभूव लोके विदितप्रभावः । अनन्यसाधारणशक्तिशाली संख्यावतां संसदि माननीयः ॥१२॥ श्रुत्यर्थसार्थानवबोधहेतोर्मोहांधकारे पततां चिराय । संचारहेतोर्विविधक्रियायै *Mantrárthadípaṃ* कृतवान्कृती यः ॥१३॥ नानाव्यवस्थाभ्रमवंतमंतर्विद्वद्विचारोच्छलदुत्तरंगं । yaḥ *Kálatattvárṇavam* uttarítuṃ *Rámaprakáṣaṃ* nibabandha *setum* ॥14॥ यस्य च कविद्वयकृतमेतच्छ्लोकद्वयं ।

1. Ahaṃ *Hariharaḥ* siddher avilambasarasvatiḥ ।[2]
   Sákshách *Chhatávadhánas* tvam avatírṇá Sarasvatí
2. Puṃrúpádaraṇí[3] sákshád avatírṇá Sarasvatí । [॥15॥
   Jitaḥ[4] *Ṣatávadhánо* ’to Vishṇunápi na jishṇuná

Kiṃ cha । [॥16॥

Adhíyánam uddiṣya chádhyápako yam
Bhavánandasiddhántavágíṣa úche ।
‘Ayaṃ ko ’pi devo ’navadyátividyá-
chamatkáradharám aparám bibharti’ ॥17॥[5]

[1] Káṣínátho ’*shṭamo* ’*smát* Cod. Berol.

[2] °sarasvatí MS.

[3] Sic MSS.

[4] जातः MS.

[5] Bhujangaprayáta.

Hoc codice pars *Şráddhachintámaṇis* continetur, quo libro *Şivarámas*, şukla-Vişrámae filius, ceremonias in concremandis mortuis et in parentalibus adhibendas exposuit. Incipit: अथ दाहोत्तरं प्रथमदिनकृत्यं ॥ तत्र प्रथमदिवसादारभ्य सपिंडीकरणं यावत्सर्वप्रेतकृत्यमृजुदर्भैः कार्यं । तत्र नद्यादौ गत्वा स्नात्वा अहते आर्द्रे वाससी परिधाय पिंडदानं कुर्यात् । दक्षिणामुखः कृतापसव्यस्तूष्णीं प्राणानायम्य मनसैव विष्णुमंत्रस्मरणेन जलमभिमंत्र्य तेनोदकेन पिंडद्रव्यं संप्रोक्ष्य पिंडद्रव्योपहाराणां च पवित्रता। देशकाले पाकपात्रद्रव्यश्रद्धासंपत् । अत्राद्यमासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्यर्थं क्षुत्तृष्णानिवृत्यर्थं शिरोवयवनिःपत्यर्थं पिंडदानमहं करिष्ये इति संकल्पं कृत्वा दक्षिणायतां कर्षूं कृत्वा तत्र समूलदक्षिणाग्रदर्भस्तरणं । पात्रे जलमादाय अमुकगोत्रामुकप्रेत अवनेनिक्ष्व । ततस्तिलघृतक्षीरमधुशर्करामिश्रं पिंडमादाय प्रथमदिवसे अमुकगोत्रस्यामुकप्रेतस्य शिरोवयवनिःपत्यर्थं अमुकगोत्र अमुकप्रेत एष ते पिंडः । इति ऋजुहस्तेन पिंडं दद्यात् । ततः पिंडपात्रक्षालनजलेन प्रत्यवनेजनं ॥ अमुकगोत्र अमुकप्रेत अवने[नि]क्ष्व । ततः पिंडोपरि सूत्रप्रक्षेपः । अमुकगोत्रामुकप्रेत अयं ते वास उपतिष्ठतां । अमुकगोत्रामुकप्रेत गंधो यं ते उपतिष्ठतां । अमुकगोत्रामुकप्रेत इदं पुष्पमुपतिष्ठतां । पुष्पं तु भृंगराजपत्रं तुलस्यादि । अमुकगोत्रामुकप्रेत धूपो यं ते उपतिष्ठतां । अमुकगोत्रामुकप्रेत दीपो यं ते उपतिष्ठतां । अमुकगोत्रामुकप्रेत इदं शीतमुदकं ते उपतिष्ठतां । अमुकगोत्रामुकप्रेत इदं नैवेद्यं ते उपति ० समाचारात् अर्घो यं ते उप ० अमुकगोत्रस्यामुकप्रेतस्य क्षुधानिवृत्यर्थं दास्यमानं आमानं ते उप ० । अनेनामांन्नदानेन अमुकगोत्रस्यामुकप्रेतस्य क्षुधानिवृत्तिः । ततों जलिदानं । तच्च पिंडसमीपे पाषाणोपरि कार्यं । पिंडसमीपे पाषाणं संस्थाप्य अमुकगोत्रस्यामुकप्रेतस्य तृष्णानिवृत्यर्थं सतिलतोयांजलिदानमहं करिष्ये । इति संकल्पं कृत्वा दक्षिणाभिमुखो भूत्वा ऋजून्कुशान् हस्ते कृत्वा सतिलतोयांजलि दद्यात् । अमुकगोत्रममुकप्रेतं तर्पयामि । अमुकगोत्रामुकप्रेत एष ते सतिलतोयांजलिरुपतिष्ठतां इति वा । अमुकगोत्रामुकप्रेतस्तृप्यतु इति वा यथास्वाचारं कर्त्तव्यं । एवं दशाहांतमहरहरेकैकमंजलिं वर्द्धयेत् । एवं पंचपंचाशदंजलयो भवंति । द्वयोत्तरवृध्या वा दद्यात् । प्रत्यहं त्रयं त्रयं दद्यात् । प्रत्यहं दश दश वा दद्यात् । प्रत्यहमेकमेकं वा । प्रत्यहं प्रथमदिनादारभ्य तर्पणांते अनादिनिधनो देव शंखचक्रगदाधर अक्षयः पुंडरीकाक्ष प्रेतमोक्षप्रदो भव इति पठनीयं । ततः पृछा । अद्य पूर्वोच्चरित एवं ग्रहगणविशेषणविशिष्टायां तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्यर्थं क्षुत्तृष्णानिवृत्यर्थं पिंडदानतर्पणकृतस्य विधेः सर्वं परिपूर्णं । अनेन पिंडदानतर्पणकृतेन अमुकगोत्रस्यामुकप्रेतस्य क्षुत्तृष्णानिवृत्तिपूर्वकशिरोवयवनिःपत्तिः । द्वितीयदिवसे करिष्यमाणकर्मयोग्यतावाप्तिः । ततस्तं पिंडमप्सु प्रक्षिप्य पाषाणं क्वचिदेकांते सन्यस्य स्नात्वा वाससी परिधाय गृहमागछेत् । पिंडदानानंतरं प्रत्यहं स्नानं कार्यं । ततस्तद्दिने स्वगृहान्नेन पाको न विधेयः । क्रीतं सुहृद्भ्यो लब्धं वाश्नीयुः । गोत्रजानां तद्दिने तद्गृह एव भोजनं । कर्त्ता भोजनकाले पात्रस्थं किंचित्सघृतमन्नमादाय अमुकगोत्रायामुकप्रेताय इदमन्नमुपतिष्ठतु इत्युक्त्वा गृहोपरि प्रक्षिपेत् । भोजनपात्रसमीपे वा दद्यात् । एवं दशाहं वा दद्यात् । दश दिनानि भोजनस्थानविपर्यासो न कार्यः । हविष्यान्नमेव भुंजीरन् । लेखनहास्यहर्षोच्चासनोत्कृष्टवस्त्रादिधारणतैलाभ्यंगस्त्रीसंगख-

ट्वाशयनान्यस्पर्शनादीनि वर्जयेयुः। रात्रौ पृथगेव तृणास्तृतभूमौ शयीरन्। महागुरुनिपाते त्र्यहमेकाहं वोपवासः। बालवृद्धातुराणां नैते नियमाः। ततः सायंकाले त्रिकाष्ठिकायां शिक्यादौ वा एकस्मिन्नपक्के मृन्मये पात्रे उदकं। द्वितीये क्षीरं कृत्वा आकाशे स्थाप्य। तत्र प्रयोगः। अपसव्यं कृत्वा दक्षिणाभिमुख उपविश्य देशं कालं च संकीर्त्य अमुकगोत्रस्यामुकप्रेतस्य सर्वतापोपशांत्यर्थं अध्वश्रमापनयनार्थं मृन्मये पात्रे क्षीरोदकदानमहं क[रि]ष्ये इति संकल्प्य अमुकगोत्रामुकप्रेतात्र शीतोदकेन स्नाहि। अमुकगोत्रामुकप्रेतात्र क्षीरं पिब। अनेनाकाशे मृन्मये पात्रे क्षीरोदकनिधानेन अमुकगोत्रस्यामुकप्रेतस्य सर्वतापोपशांतिः। एवमेवाहं त्र्यहं वा दशाहं कार्यं॥ इति प्रथमदिनकृत्यं॥

Sequitur: asthisaṃchayanam fol. 3^b; dvitíyadinakṛityam 4^b; tṛitíyadinakṛityam 5^a; chaturthadinakṛityam, panchamadinakṛityam 5^b; shashṭhadinakṛityam, saptamadinakṛityam, ashṭamadinakṛityam, navamadinakṛityam 6^a; daṣamadinakṛityam 6^b; ekádaṣáhakṛityam 7^a; ekádaṣavishṇugaṇaṣráddham 11^a; brahmádipanchadevatáṣráddháni 14^a; mahaikoddishṭam 20^a; udakumbhánáṃ dánam 22^a; shoḍaṣa ṣráddháni 23^a; dvádaṣáhakṛityam 26^a; trayodaṣadinakṛityam 33^b; *sahagamanavidhiḥ:* भर्तुर्मरणसमये आत्मनः प्राणान्संकल्पयेत्। देशकालौ संकीर्त्य 'आत्मनो भर्तुश्चानेकजन्मोपात्तसर्वपापक्षयपूर्वकरो(?)ममिताब्दसहस्रावधिभर्तृसाहित्येन स्वर्गवासमातृपितृभर्तृकुलोद्धारकामा श्रीलक्ष्मीनारायणप्रीतये भर्त्रनुगमनं करिष्ये' इति संकल्प्येदं वक्ति।

देवैः संपादितो मह्यं पतिस्त्वं सर्वदैवतं।
त्वया सह गमिष्यामि भर्ता त्वं चान्यजन्मनि॥

इति संकल्पः। ततः स्नानं। शक्त्या तिलधेन्वा दानं। कुंकुमांजनादिभिः स्वात्मानमलंकृत्य पायसभोजनमत्र केचिदाहुः। ततो बंधून्समस्तान्प्रणम्य विसृजेत्। हृष्टा भर्तृगमनमानसा स्वगृहमक्षतैराशीर्वादपरा वर्धापयेत्। अग्ने युक्ष्वेति वडवारोहणं। अथवा 'श्मशानं नीयमानं तु भर्तारमुपयाति या। पदे पदे यज्ञफलं लभते नात्र संशय' इति वाक्यात्पद्भ्यामेव गमनं। तीर्थे गत्वा स्नानं। देशकालौ संकीर्त्य भर्त्रा सहगमनार्थं स्नानमहं करिष्ये। इति संकल्प्य स्नात्वा वस्त्रपरिधानं। अलंकरणं। स्वयं प्रतिनिधिना वा सर्वपिंडदानमिति Devaḥ। हरिद्राकुंकुमान (?) कंचुक्यादियुतपं (च ?) शूर्पाणां लक्ष्मीनारायणप्रीतये दानमिति Bhaṭṭapaddhatau॥ अग्नेरर्घदानमंत्रः। विविधफलैरर्घः। 'रुद्रस्त्वं प्रजापतिः। त्वं सूर्यो वसवश्चाष्टौ परमात्मा त्वमेव हि। त्वमेव शरणं विष्णो शरणं तु पतिर्मम॥ स्वर्गे वा नरके त्वं हि यत्र यत्र गमिष्यसि। तत्र तत्र ह्यहं पृष्ठे लग्नाप्येष्यामि मा चिरं[1]॥ ब्रह्महत्यादिभिः पापैस्त्वां मोक्ष्यामि यमालयात्। अहं ब्रह्मा ह्यहं विष्णुरहं वै सूर्यदिक्पतिः॥ आदित्यचंद्रावनिलोऽनलश्च द्यौर्भूमिरापोऽथ (?) अहर्निशा च। एते च सर्वे मम साहसेन तुष्यंतु ते देववराश्च सर्वे'॥ ततः शिलां संपूज्य तामारुह्य फलपुष्पांजलिं गृहीत्वा त्रिरग्निं प्रदक्षिणीकृत्य प्रार्थयेत्।

त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत्।
त्वमेव देव जानीषे न विदुर्यानि मानवाः॥
अनुगच्छामि भर्तारं वैधव्यभयपीडिता।
स त्वं मार्गप्रदानेन नय मां भर्तुरंतिकं॥
इदं शरीरं सकलं मदीयं दग्ध्वा कृशानो कुरु दिव्यमाशु।
तथा च भर्तुः कुरु दिव्यदेहं भर्तुः समीपं भगवन्व्रजामि॥
किं मया न कृतं साधु भवेद्यदि च तेऽनघ।
इदं शरीरमालिंग्य प्रविशामि हुताशनमिति॥

ततस्तृणकुटीं प्रविश्य श्रौतं स्मार्तं लौकिकं वाग्निमादाय स्वयमेव कुटीं प्रज्वालयेत्। तस्याः प्राणोत्क्रमणोत्तरं पुत्रादिरधिकारी द्वयोरपि दाहं कुर्यात्। कुटीप्रवेशात्पूर्वमेव श्रौतपात्राणां स्मार्तपात्राणां च यजमानस्यैव शरीरे पूर्वोक्तप्रकारेण प्रतिपत्तिः कार्या। आज्याहुतिश्च॥ इति संक्षिप्तसहगमनविधिः॥ fol. 36^a.

Fol. 40^a. इति शुक्लश्रीविश्रामात्मजशिवरामविरचिते श्राद्धचिंतामणौ मरणावस्थामारभ्य सपिंडीकरणांतकृत्यप्रयोगप्रकाशः समाप्तः॥ अथ विधानानि। rajasvalámaraṇe dáhavidhiḥ 40^a; sútikámaraṇe dáhavidhiḥ 40^b; panchakamṛitasya dáhavidhiḥ 41^a; utsannágner dáhártham mṛitádhánaprayogaḥ 43^a; agnau samárúḍhe yajamáne mṛite kṛityam 43^b; proshitamṛitasya kṛityaprayogaḥ 44^a; parṇanaradáhágniprayogaḥ 44^b; atha *Smṛityarthasára-Náráyaṇabhaṭṭá*dyanusárí náráyaṇabaliprayogaḥ 45^b; jaladhenudánaprayogaḥ 47^b; jívachchhráddhaprayogaḥ 48^a; darṣaṣráddhaprayogaḥ 50^b; kshayáhaṣráddham 56^b; ekoddishṭaṣráddhaprayogaḥ 58^a; saṃkalpaṣráddhaprayogaḥ 58^b; tírthaṣráddhaprayogaḥ 59^a; ámaṣráddhaprayogaḥ. *Iti ṣráddhachintamaṇau dvitíyaprakáṣaprayogaḥ samáptaḥ* 59^b.

Dúrvápújáprayogaḥ 59^b; dípadánaprayogaḥ 61^a; makarasaṃkrántinimittakakṛityaprayogaḥ 61^a; akshayatṛitíyákṛityaprayogaḥ 62^a; nílotsargaprayogaḥ 62^a; tripiṇḍakaṣráddhaprayogaḥ 68^b; ekapiṇḍaṣráddham 72^b; saṃnyásagrahaṇaprayogaḥ 73^b.

Codex anno 1784 satis accurate exaratus est. (Wilson 527.)

711.

Ṣráddham, quo libello ritus et preces in parentalibus adhibendae adumbrantur. Incipit: अथ श्राद्ध लिख्यते। क्षयदिनादाद्यदिवसे वेदविद्ब्राह्मणान् अयुग्मान् मंत्रित्वात्। ओं अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा॥ ओं भवामि॥ इति ब्राह्मणस्य उक्तं॥ पूर्वाभिमुखो ब्रह्मण। उत्तराभिमुखो यजमान्॥ etc.

Haec pars seculo sexto decimo exarata est. (Wilson 486^b.)

---

[1] लग्नामेष्यामि माशु MS.

712.

Lit. Devan. Charta Ind. Foll. 43. Long. 7. Lat. $3\frac{1}{2}$. Linn. 7.

Ṣráddha. Hoc libello preces in parentalibus adhibendae continentur. Incipit: श्राद्ध ओँ केशवाय नमः ॥१॥ नारायणाय नमः ॥२॥ माधवाय नमः ॥३॥ गोविंदाय नमः ॥४॥ विष्णवे नमः ॥५॥ मधुसूदनाय नमः ॥६॥ त्रिविक्रमाय नमः ॥७॥ वामनाय नमः ॥८॥ श्रीधराय नमः ॥९॥ हृषीकेशाय नमः ॥१०॥ etc. Desinit in verbis: एष पितृयज्ञः तत्सद्ब्रह्मार्पणमस्तु वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं वर्द्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

Codex ineunte seculo duodevicesimo exaratus est. (MILL 104.)

C. VYAVAHARA.

713.

Lit. Devan. Charta Europ. Foll. 218. Long. 12. Lat. 9. Linn. 21.

Hoc volumine major pars *Mitrodayae* continetur, quem librum jus civile tractantem *Mitramiṣras*, Paraṣurámamiṣrae filius, Hansae nepos, jussu Vírasinhadevae regis, Madhukarasáhae filii, Prataparudrae nepotis, conscripsit. Incipit: पुरतः प्रविलोक्य गर्भचापं etc. ॥१॥ स्वस्ति श्रीयुत्वीरसिंहनृपतेराज्ञावशादुत्सुकः श्रीमित्राभिधपंडितः प्रतिदिशं कीर्त्यानिशं मंडितः । नानावर्णन व्यसनिनां संख्यावतां प्रीतिदं संप्राप्तव्यवहारसाधकमिमं कुर्वे प्रकाशं परं ॥२॥

Auctor Kalpataru, Chaṇḍcṣvara, Jímútaváhana, Dáyatattvakṛit (Jímútaváhananánugámin), Párijáta, bhaṭṭa-Bhavadeva, Madanaratna, Mádhava, Ratnákara, bhaṭṭa-Someṣvara, Smṛitichandriká, alios auctores et libros laudat.

Liber in medio capite *Vikríyásampradána,* ed. Calc. fol. 135[a]. l. 8. desinit.

Codex post annum 1810 exaratus est. (WILSON 220.)

714.

Lit. Bengal. Charta Ind. Foll. 100. Long. $15\frac{1}{2}$. Lat. $4\frac{1}{2}$. Linn. 6.

Dáyabhágas, de hereditatibus dispertiendis liber, a *Jímútaváhana* compositus. Incipit:

मन्वादिवाक्यान्यविमृष्य येषां यस्मिन् विवादे वहुधावुधानां ।
तेषां प्रवोधाय स दायभागो निरूपणीयः सुधियः शृणुध्वं ॥

Liber Calcuttae annis 1813 et 1829 cum Kṛishṇae commentario editus, et a Colebrooke anno 1810 Anglice versus est.

Codex anno 1813 a Jagannáthaṣarman exaratus est. (WILSON 154.)

715.

Foll. 33–142. *Jímútaváhanae Dáyabhágas.*

A. Foll. 33–104. Textus. Folia nonnulla in fine desiderantur. Desinit in verbis: तेन सह वा इत्यपेक्षा = ed. Calc. 1813. fol. 83[a]. l. 14.

B. Foll. 105–142. Fragmentum commentarii, a *Kṛishṇa* (tarkálankárabhaṭṭácharya) compositi. Incipit:

पदाम्वुजे द्वे जगदम्विकायाः ॥
श्रीकृष्णविप्रो हृदये निधाय ॥०॥
करोति टीकामिह दायभागे
ग्रंथाववोधाय सदेकरम्यां ॥

Utraque pars post annum 1810 exarata est. (WILSON 209[b].)

716.

Foll. 168–179. Linn. 6. *Putrakramadípiká* a *Rámabhadra* scripta, quo libello auctor, quamnam partem duodecim filiorum genera, a legum latoribus Indicis statuta (Manu 9, 166 sqq.), in hereditatibus dividendis haberent, accuratius exposuit. Incipit: अथौरसादिद्वादशविधपुत्राधिकारितानिर्णयः ॥ तत्रौरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नापविद्धानां षण्णां पित्रादिसपिण्डरिक्थभागित्वं सहोढपौनर्भवदत्तकस्वयमुपागतकृतक्रीतानां षण्णान्तु पितृमातृरिक्थभागित्वं ।

Haec folia anno 1822 a Rámaṣarman exarata sunt. (WILSON 24[c].)

717.

Foll. 29–62. Linn. 11. *Putríkaraṇamímánsá*, sive *Dattakamímánsá*, de filiorum adoptatione tractatus, a *Nanda* (paṇḍita), Rámapaṇḍitae filio, e Mahípatipaṇḍitae stirpe oriundo, compositus. Idem *Vináyakapaṇḍita* appellabatur. Incipit:

अभिनंद्य जगद्वंद्यपदद्वंद्वं विनायकं ।
पुत्रीकरणमीमांसां कुरुते नंदपंडितः ॥१॥
केन कीदृक् कदा कस्मै कस्मात् कः क्रियतां सुतः ।
विविच्य नोक्तं यत्पूर्वैस्तदशेषमिहोच्यते ॥२॥

Idem auctor Káṣíprakáṣa, Paráṣarasmṛitivyákhyá, Mádhavánandakávya, Ṣráddhakalpalatá composuit.

Haec voluminis pars anno 1826 parum accurate exarata est. (WILSON 204[b].)

718.

Lit. Bengal. Charta Ind. Foll. 251. Long. foll. 1–166. 14½. foll. 167–216. 13½. foll. 217–251. 12½. Lat. foll. 1–216. 5. foll. 217–251. 4.

Foll. 1–79. Linn. 7. *Vivádachandras*, juris civilis compendium, a *Misarúmiṣra*, Lakhimádevis auctoritate, compositum. Incipit:

वन्दे श्रीकण्ठवैकुंठावकुण्ठौ नतनन्दने ।
विघ्नविछेदकुशलौ गिरिजाजलजापती ॥
अभूदभूतप्रतिमल्लगन्धो
राजा *Bhaveṣaḥ* किल सार्व्वभौमः ।
अत्याजयद्यो वहुभर्तृकत्वं
दोषं भुवोऽपि प्रभुरुग्रधामा ॥
तस्मादनूनोऽजनि सूनुसारो
धीमानुमासूनुसमानसारः ।
राज्ञोपजीव्या *Harasinha*námá,
Tato nṛipo *Darpanáráyaṇo* 'bhút ॥
*Darpanáráyaṇa*nṛipateḥ ṣrímad-d*Hírá* mahádeví ।
अलभत सुनयं तनयं नरपतिगुणराजिपूरितं शूरं ॥
Ṣrímal-*Lakhimá* deví tasya *Chandrasinha*-nṛipater da[yitasya ।
Misarúmiṣradvárá रचयति विवादचन्द्रमभिरामं ॥
विवादे व्यवहारे च व्यवस्था यस्य यादृशी ।
निवन्द्धृभिः कृता सात्र लिख्यते सूरिणां मुदे ॥

Harasinhadeva, Ed. Hall auctore (Sánkhyapravachanabháshya, p. 36), quum anno 1314 floruerit, opus nostrum exeunte seculo quarto decimo videtur compositum esse.

In fine haec subscriptio legitur: इति महामहोपाध्यायश्रीमिसरुमिश्रविरचितो विवादचन्द्रः समाप्तः ॥

Haec voluminis pars hoc seculo ineunte exarata est. (Wilson 163[a].)

719–721.

Volumina tria. Lit. Devan. Charta Europ. Long. 12. Lat. 7½. Linn. 21. Vol. I. foll. 268; II. foll. 182; III. foll. 242.

Vivádabhangárṇavas, juris civilis corpus, a *Jagannátha*, Rudrae filio, exeunte seculo superiore Calcuttae compilatum. Incipit: देवेशभूतेशगणेशविघ्नराजान् नमस्कृत्य गिरांद्कन्यां गुरून् मुनीं ग्रंथकृतो तिमान्यान् भूपाज्ञया ग्रंथमहं करोमि ॥१॥ विवादभंगार्णवनामधेयं वैपद्ययुक्तं वहुविस्तृतं च । सद्वीपरत्नं नृपधीरहृद्यं रुद्रिर्जगन्नाथ इति प्रसिद्धः ॥

Opus in capita quinque (dvípa) divisum est, quorum primo aes alienum, secundo deposita, reliquis hereditates tractantur. Versionem Anglicam Colebrooke anno 1797 edidit.

Hi codices post annum 1826 exarati sunt. (Wilson 222–224.)

D. STOTRA, PRITHAKPUJA.

722.

Lit. Devan. Charta Ind. Foll. 148. Long. 10. Lat. 4½.

Foll. 1–26. Linn. 8. *Gáyatríbháshyam* (Gáyatrí hymni commentarius). Incipit: नारद उवाच ॥ भगवन् श्रोतुमिछामि गायत्रीभाष्यमुत्तमं । येन ज्ञानं भवेन्नृणां तत्सर्वं कथय प्रभो ॥१॥ कुत्रायाति कुतस्तिष्ठेत्कुत्र वासो विधीयते । कस्मिन्काले जपः कार्यः कस्मिन्काले न क्रियते ॥२॥ एतत्सर्वं प्रयत्नेन कथ्यतां मम हेतवे । यत्त्वया जप्यते देव तत्सर्वं कथ्यते मम ॥३॥

Gáyatrí appellata precum formula quo tempore et quibus ritibus praemissis repetenda sit, docetur.

Haec folia hoc seculo ineunte exarata sunt. (Mill 77[a].)

723.

Lit. Devan. Charta Ind. Foll. 27. Long. 8. Lat. 4½. Linn. 7.

Rudrajapas, supplicationes ad Rudrae iram avertendam recitandae. Hae preces maximam partem e versibus hymnisve ex Ṛigveda desumtis constant, passim formulas oratione soluta compositas continent. Totus libellus in paragraphos 39 divisus est, quarum vicesima, vicesima prima et secunda *purushasúktam* complectuntur. Incipit: ओं नमो भगवते रुद्राय । अथ पंचामृतस्नानं । आप्यायस्वेति । गौतम ऋषिः सोमो देवता । गायत्री छंदः ॥

Paragraphis IV–IX versus a prima syllaba *ṣaṃvatyaḥ* appellati continentur, qui quidem e frustis Vedicis consarcinati sunt.

Codex anno 1744 in usum Bhaṭa-Devarámarámachandrae exaratus est. (Mill 102.)

724.

In hoc codice partes duae compactae sunt. Lit. Devan. Charta Ind. Foll. 100. Long. foll. 1–37. et foll. 71–100. 10. foll. 37–70. 9½. Lat. 4½.

A. Foll. 1–70. Linn. 5. Etiam hic liber preces, *Rudrajápya* dictas, in laudem Rudrae dei recitandas, continet, quales a Bráhmanis, Vájasaneyasaṃhitae sectatoribus, adhibentur. Disticha singula e Vájasaneyasaṃhitá ad unum omnia excerpta sunt, neque quidquam prae-

terea proprii reperitur. Totus liber in octo lectiones (adhyáya) divisus est, lectiones in paragraphos (varga).

Lect. I. 10 varga. 1. गणानां त्वा VS. XXIII, 19. 2. गायत्री VS. XXIII, 33. 3. द्विपदा VS. XXIII, 34. 4. सहस्तोमाः VS. XXXIV, 49. 5–10. यज्जाग्रतो VS. XXXIV, 1–6. Finitur in fol. 5^a.

Lect. II. 22 varga habet et cum VS. libro XXXI. vel in variis Purushasúktae lectionibus consentit. Finitur in fol. 12^a.

Lect. III. 17 varga habet. Incipit: आशुः शिशानः. VS. XVII, 33–49. finitur in fol. 18^b.

Lect. IV. 14 varga habet. विभ्राड् बृहत्. VS. XXXIII, 30–43. finitur in fol. 24^b.

Lect. V. 66 varga. नमस्ते रुद्र. VS. XVI, 1–66. finitur in fol. 48^a.

Lect. VI. 16 varga. वयं सोम व्रते. 1–8 = VS. III, 56–63. 9–11 = VS. XXXIX, 7–9. 12 = VS. XXV, 19. 13 = VS. XVIII, 36. 14 = VS. V, 21. 15 = VS. XIV, 20. 16 = XXXVI, 17. Finitur in fol. 53^b.

Lect. VII. 29 varga habet. 1–29 = VS. XVIII, 1–29. finitur in fol. 65^b.

Lect. VIII. 24 varga continet. 1–24 = VS. XXXVI, 1–24. finitur in fol. 70^a.

Haec folia literis majusculis, non nimis negligenter exarata, seculi hujus ineuntis literaturam prae se ferunt.

B. Foll. 71–100. Linn. 9. Primum folium deest. Inest *U'aṭae*, Vajraṭae filii, commentarius ad septem primas Rudrajapae lectiones, e majore ejusdem Vájasaneyasaṃhitae commentario descriptus et excerptus. Quod, nisi alia adessent testimonia, subscriptione secundi libri: इति ऊश्चटकृतौ मंत्रभाष्य एकत्रिंशोऽध्यायः समाप्तः satis probaretur. Finitur lectio I. fol. 71^b; II. fol. 76^b; III. fol. 79^b; IV. fol. 83^a; V. fol. 97^b; VI. fol. 99^a; VII. fol. 100^a. In fine haec leguntur: वाजप्रसवीयं जुहोति । सप्तभिर्ऋग्भिर्वाजस्य नु व्याख्यातं ॥

Mahídharam quum U'aṭae commentario usum esse inter omnes constet, non ab re fore putavi, si partem aliquam typis hic excudendam curarem, praesertim quum vix futurum sit, ut tota U'aṭae Vájasaneyae interpretatio in lucem prodeat. Quem ad finem tertiam lectionem selegi[1].

आशुः शिशानः । अनुवाकः । अप्रतिरथ ऋषिः । ऐंद्रोऽप्रतिरथोऽपश्यत् । मर्माणि त इत्यत आदितो द्वादशैंद्र्यस्त्रिष्टुभो ब्रह्मा दक्षिणतो जपति । य आशुः शीघ्रः शिशानः । शो तनूकरणे । निश्यानो वज्रं वृषभो न भीमो वृषभ इव भीमः । भीमो बिभ्यत्यस्मादिति । घनाघनो हनहनेत्येवं वक्ता । यद्वा घना शरीरं । क्षोभणश्चर्षणीनां संचालकश्चर्षणीनां मनुष्याणां संक्रंदनः समाह्वाता ग्रामकारिणां । आहूय चानिमिषोऽप्रमादी । यद्वानिमिषो देवः । एकवीर एक एवासहायो विक्रांतः । य ईदृग्गुणविशिष्टः स शतं बह्वचः सेना अजयत् जयति साकं सहैवेंद्रः ॥१॥

संक्रंदनेन शब्दकारिणानिमिषेणैकचित्तेनाप्रमाद्यता वा जिष्णुना जयशीलेन युत्कारेण । युध संप्रहारे । अस्य क्किप् । युत् । संप्रहारकारिणा दुश्च्यवनेनाप्रच्याव्येनाप्रच्युतस्वभावेन वा धृष्णुना प्रसहनशीलेन तदिंद्रेण जयत । ईदृग्गुणविशिष्टेनेंद्रेण तज्जयत । दुर्जयमिति शेषः । तच्च सहध्वं । तच्चाभिभवत हे युधः । युध संप्रहार इत्यस्यैतत् क्किपि बहुवचनं । हे योद्धारः । पादादावामंत्रितस्य चेत्यादिरुदात्तः । हे नरो मनुष्या इषुहस्तेनेंद्रेण वृष्णा मनुष्येण वर्षणशीलेन वा ॥२॥

स इषुहस्तैः । स इंद्र इषुहस्तैर्योद्धृभिः संस्रष्टा संसृजति । इषुहस्तानेव योद्धृन् । स एवेंद्रो निषंगिभिः खड्गिभिः संसृजति । निषंगिण एव योद्धृन् स्वान् । किंच वशी कांतः सर्वजनप्रियः स्वतंत्रो वा निगृहीतारिषड्वर्गो वेश्वरो वा स एवेंद्रो युधो योद्धृन् स्वान् शत्रुगणेन संस्रष्टा । किंच संसृष्टजित् । संसृष्टान् जयति शत्रून् । सोमपाश्च बाहुशर्धी च बाहुबलः संयोगिबलनिरपेक्षः । शर्ध इति बलनाम । उग्रधन्वोद्यतधनुः प्रतिहिताभिरस्ता । शत्रुशरीरेषु प्रतिनिहिताभिरिषुभिरिंद्रोऽस्ता क्षेप्तेत्यनुमीयते । लघुसंधानो लक्षपाती चेत्यभिप्रायः ॥३॥

बृहस्पते । हे बृहस्पते परिदीया । दीयतिर्गतिकर्मा । परियाहि रथेन रक्षोहा रक्षसां हंतामित्रान् शत्रूनपबाधमानः । किंच प्रभंजन् प्रमर्दयन् सेनाः प्रमृणश्च युधा जयन् । मृणतिर्हिंसार्थः । तस्य क्किपि द्वितीयाबहुवचनं । प्रमृणो हिंसकान्युधा युद्धेन जयन्नस्माकमेधि भवाविता त्राता रथानां । बृहस्पतिरपींद्रस्य पुरोहित इतींद्रस्य संबंधेनैव स्तूयते ॥४॥

बलविज्ञायः । यस्त्वं बलमाविष्कुर्वन्विज्ञायसेऽयमिंद्र इति । स्थविरश्च सर्वानुशासकः सर्वमान्यो वा चिरंतनो वा प्रवीरश्च । वीरंवीरमभ्यभिवीरः । अभिसत्वा च । सत्वंसत्वमभ्यभिसत्वा । सहोजाश्च । सह इति बलनाम । बलाज्जात । न ह्यन्यस्माज्जात इत्यंबलः स्यात् । स त्वं जैत्रं जेतारं हे इंद्र रथमातिष्ठ गोवित्सन् स्तुतिवित्सन् । गोशब्दो वाग्वचनः ॥५॥

गोत्रभिदं । असुरगोत्रं भिनत्तीति गोत्रभित् । यद्वा गोत्र इति मेघनाम । स हि गा अपस्त्रायते । तस्य गोत्रस्य भेत्तारं वृष्ट्यर्थं । गोविदमुपलब्धारं । यद्वा गोविदं स्तुतिविदं पंडितं वा । वज्रबाहुं वज्रपाणिं जयंतमज्म । अज्मेति संग्रामनामाजतेर्गत्यर्थस्य । प्रमृणंतमोजसा । मृणतिर्हिंसाकर्म । प्रमर्दयंतं बलेन । इममिंद्रं हे सजाताः समानजन्मानो देवा अनु वीरयध्वं । वीरकर्म कुर्वाणमनुगम्य वीरकर्मणैव प्रोत्साहयत । हे सखायः समानख्याना देवा अनु सं रभध्वं । अनुसंगम्य संरंभणं कुरुत ॥६॥

अभि गोत्राणि । अभिगाहमानो गोत्राण्यसुरकुलानि मेघवृंदानि वा सहसा बलेनादयो निस्त्रिंशो वीरो विक्रांतः शतमन्युर्बहुक्रोध इंद्रो दुश्च्यवनोऽप्रच्याव्यः पृतनाषाट् । पृतनां संग्रामं सहते अभिभवति ।

[1] Textum cum optimo mantrabháshyae codice, qui nuper e Benaris in bibliothecam allatus est, contuli, ejusque auxilio passim emendavi.

अयुध्योऽविद्यमानप्रतियोधः । य इत्थंभूत इंद्रः सोऽस्माकं सेना अवतु पालयतु प्र युत्सु युद्धेषु ॥७॥

इंद्र आसां । देवसेनानां व्यूहरचनादिंद्र आसां नेता भवतु । बृहस्पतिश्च । मंत्रिप्रणीतानि हि कार्याणि करोति । दक्षिणा यज्ञो दक्षिणतो यज्ञ एतु । पुर एतु सोमः । पुरस्तादागच्छतु सोमः । यज्ञो दक्षिणा च पुरस्तादेतु यज्ञश्च सोमश्च । केषामित्यत आह । देवसेनानामभिभंजतीनां । भंजो आमर्दने । जयंतीनां मरुतो गणभूता यंत्वग्रं निरुध्य ॥८॥

इंद्रस्य वृष्ण इंद्रस्य वर्षितुर्वरुणस्य च राज्ञ आदित्यानां मरुतां च शर्धो बलं हस्त्यश्वरथपदातिलक्षणमुग्रमुद्गूर्णायुधं । उदस्थादित्यनुषंगः । यदा चैतदुदस्थादथानंतरमेव महामनसामक्लिष्टमनसां भुवनच्यवानां भुवनच्यवनसमर्थानां घोषः शब्दो देवानां जयतामुदस्थात् । उत्थितः । जितं जितमिति ॥९॥

उद्धर्षय उन्नतहर्षान् कुरु हे मघवन्नायुधानि । उत्सत्वनां । उद्धर्षय च सत्वनां सत्वानां मनुष्याणां मामकानां मदीयानां मनांसि । उद्धर्षय हे मघवन्वाजिनामश्वानां वाजिनानि वेजनवस्त्रानि । चंचलत्वमश्वस्य गुणः । उद्रथानां च जयतां यंतु घोषाः । उद्यंतु च त्वत्प्रसादाद्रथानां च जयतां ये घोषाः शब्दाः ॥१०॥

अस्माकमिंद्रः । अस्माकं तावत्समृतेषु संगतेषु ध्वजेषु शत्रुबलध्वजलोलीभूतेष्विंद्रो रक्षिता भवतु । इंद्रप्रसादादेवास्माकं या इषवस्ता जयंतु । अस्माकं च वीरा उत्तरे विजयिनो भवंतु । अस्माँ उ । विनिग्रहार्थीय उकारः । अस्मानेव हे देवा अवत रक्षत हवेष्वाह्वानेषु ॥११॥

अप्वा देवता । सा च पुनर्व्याधिर्वा भयं वा यस्मादेतया विद्धो व्याप्तोऽपवीयते तया लक्ष्यमाणस्तस्मादप्वा । अपशब्दांत्याकारलोपः । वेतेरुत्तरः । ऐंद्र्योऽभिरूपा द्वादश भवंतीति श्रुतेरियमपींद्रसेनासंबंधिनी । अमीषां शत्रुबलसंबंधिनां मनुष्याणां चित्तं चित्तानीति । विभक्तिव्यत्ययः । प्रतिलोभयंती । लुभ विमोहने । विमोहयमाना गृहाण शत्रूणामंगानि । हे अप्वे ततः परेहि । परागच्छ । परतराञ्छत्रून् ग्रहीतुमतो भूयोभूयःकरणेनैतानेव शत्रूनभिप्रेहि । निर्दह चैषां हृदयानि शोकैः । यथांधेनाध्यानलक्षणेनामित्रास्तमसा सचंतां तमसा संसेव्यंतां तमसा संश्लिष्यंतां ॥१२॥

द्वादशैंद्र्यः समाम्नाः । पृथग्विनियोगमंत्राः ॥

अवसृष्टा । इषुदेवत्यानुष्टुप् । अवसृष्टा निक्षिप्ता परापत परागच्छ हे शरव्ये । शरमयीषुः शरव्या । हे ब्रह्मसंशिते ब्रह्मणा मंत्रेणाभिमंत्र्यातितरां तीक्ष्णीकृते गच्छ । परापत गच्छेत्यतिशयार्थमेकार्थयोराख्यातयोर्द्विर्वचनं । अमित्रान् प्रपद्यस्व । मामीषाममित्राणां कं चनोच्छिषः । उच्छेषयः । उद्धृतमूलान् कुर्वित्यभिप्रायः ॥१३॥

प्रेत । योद्धृन् स्तौति । अनुष्टुप् । हे नरो मनुष्याः प्रेत । प्रगच्छत । जयत च । इंद्रश्च वः शर्म शरणं परित्राणं यच्छतु । ददातु । उग्रा उद्गूर्णायुधा वो युष्माकं संतु बाहवः । अनाधृष्या अप्रधृष्या यथा यूयमसथ भवथ तथोग्रा वः संतु बाहव इत्यनुषंगः ॥१४॥

असौ या । मारुती त्रिष्टुप् । असौ या सेना हे मरुतः परेषां शत्रूणामभ्येति अभ्यागच्छति नोऽस्मान् प्रति ओजसा बलेन स्पर्धमाना तां सेनां गूहत व्याप्नुत तमसापव्रतेन । व्रतमिति कर्मनाम । अपगतकर्मणा । येन तमसा व्याप्तानां नश्यंति कर्माणि तदपव्रतं तमस्तेनापव्रतेन तमसा वा गूहत । यथामी अन्यो अन्यं न जानन् यथामी सैनिका अन्योऽन्यं परस्परं न जानीयुः ॥१५॥

यत्र बाणाः । लिंगोक्तदेवताः । पंक्तिः । यत्र बाणा इषवः संपतंति निर्मर्यादं । कथमिव । कुमारा विशिखा इव । यथा कुमारा अदृष्टपरिकारिणो विगतशिखाः सर्वमुंडास्तंतमर्थं संनिपतेयुरेवं संपतंति । तत्र । तत्रेत्यर्थः (?)। नोऽस्माकमिंद्रः शर्म शरणं यच्छतु ददातु । बृहस्पतिः शर्म यच्छतु । अदितिः शर्म यच्छतु । विश्वाहा सदाकालं शर्म यच्छत्विंद्रो बृहस्पतिरदितिः ॥१६॥

मर्माणि ते । लिंगोक्तदेवता । त्रिष्टुप् । कवचं प्रयच्छति । मर्माणि ते तव वर्मणा कवचेन छादयामि । सोमश्च राजा त्वाममृतेनानुवस्तां । आच्छादयतु । किंच जयंतं च त्वामनुमदंतु उत्साहयंतु देवाः ॥१७॥

Haec voluminis pars anno 1587 exarata est. (Mill 75.)

725.

Foll. 29–35. Linn. 7. His foliis *Devísúktam, Rátrísúktam, Lakshmísúktam* continentur, qui hymni notissimi Ṛigvedae carminibus appenduntur. Incipit: ओँ नमःश्चण्डिकायै ओँ अहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्य वागाम्भृणि ऋषिः etc.

Haec folia hoc seculo ineunte exarata sunt. (Wilson 426[e].)

726.

Lit. Devan. Foll. 5. Lin. num. 9.

Hujus codicis folia 62–67. *Sauram*, i. e. preces, quibus Sol colitur, continent. Constat hymnis ex Ṛigveda excerptis. Initio hymnorum auctores, metrum, distichorum numerus (Anukramaṇiká) recensentur, sequuntur hymni ipsi accentibus notati. Sunt ii:

उदु त्यं Rv. I, 50, 1. 13 disticha. चित्रं देवानां Rv. I, 115, 1. 6 disticha. इंद्रं मित्रं Rv. I, 164, 46. 47. 2 disticha. हंसः शुचिषत् Rv. IV, 4, 5. 1 distichon. यस्त्वा सूर्य Rv. V, 40, 5. 1 distichon. यदद्य सूर्य Rv. VII, 60, 1. 1 distichon. उत्सूर्यो Rv. VII, 62, 1. 3 disticha. उद्वेति Rv. VII, 63, 1. 4 disticha. उदु त्यद्दर्शतं Rv. VII, 66, 14. 3 disticha. बण्महाँ असि Rv. VIII, 90, 11. 2 disticha. नमो मित्रस्य Rv. X, 37, 1. 12 disticha. सूर्यो नो दिवस्पातु Rv. X, 158, 1. 5 disticha. विभ्राट् Rv. X, 170, 1. 4 disticha. आयं गौः Rv. X, 189, 1. 3 disticha.

Finitur opusculum disticho:

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने ॥

Libellus anno 1788 accurate exaratus est. (Wilson 394[b].)

727.

Foll. 287–304. *A'dityahṛidayastotramantras*, Solis orientis colendi ritus et preces, a Krishṇa cum Arjuna communicatae. Incipit: ओं अस्य श्रीसवितासूर्यनारायणकवचस्तोत्रमंत्रस्य ब्रह्मा ऋषि: etc. Praemissa *lorica* libellus, disticha 154. continens, ab his versibus incipit: अर्जुन उवाच ॥ ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा। मया कृष्ण परिज्ञातं वाङ्मयं सचराचरं ॥१॥ सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव। भक्त्या पृछामि देवेश कथयस्व प्रसादत: ॥२॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत्। तदहं श्रोतुमिछामि त्वत्प्रसादेन यादव ॥३॥ श्रीभगवानुवाच ॥ रुद्रादिदैवतै: सर्वै: पृष्टेन कथितं मया। वक्ष्ये हं कर्मविन्यासं शृणु पांडव यत्नत: ॥४॥

Subscriptione quidem libellus e Bhavishyottarapuráṇa excerptus esse dicitur. De exemplaribus Berolinensibus cf. Weber Catal. p. 351. (WILSON 531g.)

728.

Foll. 326b–328. *Dattátreyáshṭottaraṣatanámastotram*, Dattátreyae centum et octo nomina, caput ex omnifaria farragine illa, vulgo Brahmáṇḍapuráṇa appellata, prolatum. Incipit: ओं अस्य श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रमंत्रस्य बह्मा विष्णुमहेश्वर ऋषि:। श्रीदत्तात्रेयो भगवान् देवता ममाभीष्टसिद्ध्यर्थे जपे विनियोग: ॥ etc. अनुसूयासुतो देवो अत्रीपुत्रो महामुनि:। योगींद्रपुण्यपुरुषो देवेशो जगदीश्वर: ॥२॥

Haec nomina distichis 20. absolvuntur. (WILSON 531l.)

729.

Foll. 211–214. Linn. 11. *Bhairavastotram*, Bhairavae colendi ritus et preces, e *Rudrayámala* desumtae. Incipit: ओं मेरुपृष्टे सुखासीनं। देवदेवं त्रिलोचनं। शंकरं परिपप्रछ। पार्वती परमेश्वरं ॥१॥ श्रीपार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ:। सर्वशास्त्रागमादिषु ॥ आपदुद्धारणं मंत्रं। सर्वसिद्धिप्रदं नृणां ॥२॥ सर्वेषां चैव भूतानां। हितार्थं वांछितं मया ॥ विशेषतस्तु राज्ञां वै। शांतिपुष्टिप्रसाधनं ॥३॥ अंगन्यासकरन्यास। देहन्याससमन्वितं। वक्तुमर्हसि देवेश। मम हर्षविवर्द्धनं ॥४॥

Praemissis Tántrikorum formulis, Bhairavae centum et octo nomina traduntur.

Haec folia medio seculo superiore exarata sunt. (WALKER 129g.)

730.

Foll. 226–237. *Gaṇapatistotráṇi*, Gaṇeṣae colendi preces, e variis fontibus derivatae.

a. Foll. 226–228b. *Ekáksharagaṇapatikavacham* e *Rudrayámala* sumtum. Incipit: नमस्तस्मै गणेशाय। सर्वविघ्नविनाशिने। कार्यारंभेषु सर्वेषु पूज्यते य: सुरैरपि ॥१॥ श्रीदेव्युवाच ॥ भगवान् देवदेवेश। लोकानुग्रहकारक:। त्वत्प्रसादाद्गणेशस्य। श्रुत: पूजाविधिर्मया ॥२॥ इदानीं श्रोतुमिछामि। कवच परमोत्तम:। एकाक्षरस्य मंत्रस्य त्वयामीतेन चेतसा ॥३॥

b. Fol. 228b. *Gaṇapatyárádhanam*, Kankolae vati tributum.

c. Foll. 229a–232a. *Gaṇapatistavarájas*. Incipit: ओँ ओँ ओँकारबीजं अहमिति च परं व्रह्मरूपं तुरीयं.

d. Fol. 232a–232b. *Sachchidánandastotram* e *Sanatkumárasaṃhitá* excerptum. Incipit: गजवदनमचिंत्यं तीक्ष्णदंतं त्रिनेत्रं। वृहदुदरमशेषं भूतराजं पुराणं।

e. Foll. 232b–233b. *Gaṇeṣabhujangaprayátastotram*, *Ṣankarácháryae* tributum, distichis octo constans. Incipit: ओँ मां गं गजं कर्मवक्त्रं गणेशं। भुजाकंकणै: शोभितं धूम्रकेतुं। गले हारमुक्ताफलाशोभवंतं। नमो ज्ञानरूपं गणेशं नमस्ते ॥१॥

f. Foll. 233b–237b. *Vakratuṇḍastotram*, Vyásae tributum. Haec pars a numero *c.* leviter tantum differt. Incipit: श्री ओँ अस्य वक्रतुंडमंत्रस्य वेदव्यास ऋषि, etc. (WALKER 129i.)

731.

Foll. 296–315. *Rámagítá* (Rámae carmen) continent. Incipit: गणेशं कमलानाथं प्रणिपत्य गुरो: पदं। करिष्य (shye) रामगीतायां व्याख्यानं वालवुद्धये ॥१॥ Neque tamen carminis commentarius, sed carmen ipsum, disticha 75. continens, sequitur. Distt. 2–63. ex Adhyátmarámáyaṇa desumta sunt (Uttarakáṇḍa, sarga 5). Ráma coram Lakshmaṇa summum bonum relictis operibus in meditando numine positum esse exponit: तस्मात्त्यजेत्कार्यमशेषत: सुधीर्विद्याविरोधान (n na) समुच्चयो भवेत्। आत्मानुसंधानपरायण: सदा निवृत्तसर्वेंद्रियवृत्तिगोचर: ॥१७॥ Quae Vedántica opinio ad Rámae cultum deflectitur: यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत्। श्रद्धालुरत्यूर्जितलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ॥५२॥ भ्रातर्यदीदं परि दृश्यते जगत् मायैव सर्वं परिहृत्य चेतसा। मद्भावनाभावितशुद्धमानस: सुखी भवानंदमयो निरामय: ॥६१॥ Quae post dist. 63. sequuntur, Brahmaṇi deo tribuuntur, et sollennem carminis panegyricum continent. (MILL 112g.)

732.

Foll. 317–346. *Rámamantrapaṭalam*, Rámae adorandi libellum, continent. Et preces et ceremoniae ad Rámae cultum pertinentes traduntur, quae mutatis mutandis cum solitis Indorum orthodoxorum formulis consentiunt. Praeter Rámánujam, Nímánujam, Mádha-

vácháryam in particula इति दशलक्षणवैष्णवाः inscripta septem alii sectae Vishṇuiticae praeceptores occurrunt, eorumque sedes nuncupantur. Quae nomina exscripsissem, nisi codicis conditio prohibuisset. Formula, qua votum concipitur, in fine haec datur: ओं अद्य श्रीब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे अष्टाविंशतितमे कलौ युगे जंबुद्वीपे भारतखंडे आर्यावर्ते वैवस्वतमन्वंतरे। अमुकमासे। अमुकपक्षे। अमुकवासरे। अमुकनक्षत्रे। अमुकतिथौ अमुकक्षेत्रे॥ श्रीरामप्रीत्यर्थं स्नानमहं करिष्येति संकल्पः॥ Pict. VIII. homo in pelle tigrina sedens et ritus sacros agens repraesentatur. Ante eum vasa ad perficiendas ceremonias necessaria disposita sunt, a tergo minister flabellum tenens adstat. (MILL 112[h].)

733.

In foll. 348–384. *Ṣrírámapaddhatis*, Rámae colendi rituale, inest, *Rámánujae* auctori tributum. Incipit: ओं गुरुर्ब्रह्मा गुरुर्विष्णुगुरुर्देवमहेश्वरः। गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः॥ Et ceremoniae et preces, quibus Ráma quotidie adorandus est, describuntur. Pleraque cum Rámamantrapaṭala consentiunt, attamen hic noster libellus haud dubie antiquior est. Subscriptio haec: इति श्रीमद्रामानुजाचार्यकृतं श्रीरामपद्धतिवेदोक्तं संपूर्णम्॥ (MILL 112[i].)

734.

Lit. Devan. Charta Ind. Foll. 80. Long. 10. Lat. 6. Linn. 9.

Mantrarahasyaprakáṣiká, quo libro *Nílakaṇṭhas*, Govindae filius, aliquot Ṛigvedae versuum interpretatione, Vedam ad Kṛishṇam solum referendum esse probavit[1]. Opus in capita quatuor divisum est. Initium, paulum emendatum, hoc:

सत्यज्ञानमनंतं यत्तद्विष्णोः परमं पदं।
प्राप्तुं मंत्रेषु गोपालविष्णोः कर्माणि पश्यत॥१॥

'ननु सत्यादिलक्षणमखंडैकरसं विष्णोः परमपदं। तत्राविद्यावद्विषयाणि कर्माणि न संभवंति। नितरां क्रियापराणां मंत्राणां तत्प्रकाशनपरत्वं। नितरां तत्कर्मावगत्या परमपदप्राप्तिः संभवतीत्ययोग्योऽयं नियोग' इति चेत्। सत्यं। संति परमात्मनः पंच रूपाणि भूबीजांकुरतरुफलोपमानि शुद्धशबलविराड्विष्णुदेवतासंज्ञानि॥ etc.

Specimini hi capitis secundi versus inservient: तदिदं हरिवंश उपवृंहितं। वृकभयाद्वृंदावनं प्रति गोकुलाद्गोपाला गता इति। तत्र गत्वा गवां लालनं करोतीत्यृषिराह। सूयवसादिति।

सूयवसाद्भगवती हि भूया
अथो वयं भगवंतः स्याम।
अद्धि तृणमघ्न्ये विश्वदानीं
पिब शुद्धमुदकमाचरंती॥२॥

एकवचनं जात्यभिप्रायं। सुष्ठु शोभनं तृणमत्तीति सूयवसात्। भगवत्यैश्वर्यवती हि प्रसिद्धमस्मभ्यं भूयाः। भव॥ अथो वयमपि भगवंतः स्याम। अद्धि भक्षय तृणं। पुनरुक्तिरादरार्था। अघ्न्ये अद्य विश्वदानीं सर्वदाचरंती पर्यटंती शुद्धमुदकं पिब॥

कालियदमनमाह। दासपत्नीरिति।

दासपत्नीरहिगोपा अतिष्ठ-
न्निरुद्धा आपः पणिनेव गावः।
अपां बिलमपिहितं यदासी-
द्वृत्रं जघन्वाँ अप तद्ववार॥३॥

दस्यंत्युपक्षीयंते लोका अनेनेति दासो हिंस्रः। तस्य पत्नीरिव पत्नीः सहधर्मचारिणीर्हिंस्रविषदूषिता अतिष्ठन्। आसन्॥ यतोऽहिः कालियाख्यः सर्पः। गोपयतीति गोपाः स्वामी यासां ता अहिगोपाः। अत एव निरुद्धा इतराभोगाः। पणिना चोरवृंदेन गाव इव निरुद्धाः। अपां मध्ये बिलमहिगृहस्य द्वारं यदपिहितमद्भिरेवाच्छादितमासीत् तद्वृत्रं जघन्वाञ्छत्रुं जिगमिषुः। हंतिरत्र गत्यर्थः। अपववार। अपावृणोत्। उद्घाटितवान्। तीरस्थं तरुमारुह्यात्युच्चस्थानाद्यमुनायां निपत्य कालियमभ्यभूदित्यर्थः॥

ततश्च किमभूदित्याह।

अपादहस्तो अपृतन्यदिंद्र-
मास्य वज्रमधि सानौ जघान।
वृष्णो वध्रिः प्रतिमानं बुभूष-
न्पुरुत्रा वृत्रो अशयद्व्यस्तः॥४॥

अपात्पादहीनोऽहस्तो हस्तहीनः सर्पत्वादेवेदृशोऽपींद्रं कृष्णं प्राप्यापृतन्यत्। अयुध्यत्। तेन सह युद्धं कृतवान्। अस्य कालियस्य सानौ मूर्धनि वज्रमाजघान। भगवत्पदचिह्नभूतं शिरस्याजगाम। तदंकितं शिरोऽभूदित्यर्थः। सोऽयं। वध्रिश्चर्मपट्टिका। तत्सदृशनिस्तेजाः कालियो वृष्णो हरेः प्रतिमानं प्रतिचिह्नं वज्ररेखारूपं बुभूषन्भूषामिवात्मनः कुर्वन्नशयत्। शयनं चकार। निरुद्यमोऽभूत्। कीदृशः। पुरुत्रा व्यस्तोऽनेकैः प्रकारैर्निरस्तः॥

नदं न भिन्नममुया शयानं
मनो रुहाणा अति यंत्यापः।
याश्चिद्वृत्रो महिना पर्यतिष्ठ-
त्तासामहिः पत्सुतःशीर्बभूव॥५॥

नदं न शोणादिकं नदमिव शयानं दीर्घाकारेण पतितं यतोऽमुयानेन कृष्णेन भिन्नं निर्जितमनु पश्चादापो यमुनाजलान्यतियंति अत्युत्कर्षेण

---

[1] यत्किंचिद्दैवतो मंत्रो विष्णुलीलोपवृंहितः। वैष्णवः स, यतो विष्णुः सर्वदैवतनामभृत्॥ fol. 3[a].

गच्छंति । कीदृश्यः । मनो रुहाणाः । हृदयंगमा इत्यर्थः । या अपश्चित्पूर्वं वृत्रः कालियो महिना माहात्म्येन पर्यतिष्ठत् परिभूयासीत् तासामेव संनिधौ त्राणार्थं वा अहिः कालियः पत्सुतः । पद्भ्यां पीडितः सञ्छेत इति पत्सुतःशीः । समासेऽपि विभक्त्यलोप आर्षः । एवंविधो बभूव ॥

अथ खराकारं धेनुकं व्रजनाशायोद्यतमभिलक्ष्य लोको राममाह ।

समिंद्र गर्दभं मृण नुवंतं पापयामुया ।
आ तू नं इंद्र शंसय गोष्वश्वेषु शुभ्रिषु
सहस्रेषु तुवीमघ ॥६॥

हे इंद्र ईश्वर त्वं गर्दभं संमृण । सम्यङ् नाशय । कीदृशं । अमुयानया त्वत्प्रत्यक्षया पापया कृपणया (kripayá MS.) खरतन्वा नुवंतं पीडयंतं । धातूनामनेकार्थत्वात्कर्णाटकभाषाप्रसिद्धेश्च नुवतिरत्र पीडार्थः । पापयामुयेत्युभयत्र सुपो याः ॥ हे इंद्र तु पुनर्नोऽस्मान्गवादिष्वाशंसय । यथा लोकेऽस्मानभिलक्ष्य तादृशो गोपालोऽहं भूयासमिति जन आशास्ते तथास्मान्कुर्वित्यर्थः । शुभ्रिषु शुभ्ररूपवत्सु सहस्रेष्वनंतेषु ॥ तुवीनि पूर्णानि मघानि धनानि यस्मिन्निति तुवीमघः । दैर्घ्यं सांहितिकं । एवमुक्तमात्रे रामस्तं जघानेति ज्ञेयं ॥

अथ गोपरूपिणा प्रलंबासुरेण ह्रियमाणो राम आह ।

न वि जानामि यदिवेदमस्मि
निण्यः संनद्धो मनसा चरामि ।
यदा मागन्प्रथमजा ऋतस्या-
दिद्वाचो अश्नुवे भागमस्याः ॥७॥

इवशब्दो भिन्नक्रमः । यदिदमपरिमितशक्तिकं ब्रह्मास्मि तदहं न जानामि । कुदेहावेशात्प्रमाद्यतीति न्यायेन जानन्नपि न जानामीत्यर्थः । त्वदनुग्रहं विना स्वीयमैश्वर्यमाविर्भावयितुं न शक्नोमीति भावः । कुत एवं । मनसा बंधनेन संनद्धो बद्धः पारवश्यं प्रापितः । अत एव निण्यः परप्रणेयः सञ्चरामि । यदा काले मा ऋतस्य वेदस्य प्रथमजाः कारणभूतपरमात्मागन् आगच्छेत् तदादस्मादस्यानुग्रहं प्राप्य इत् निश्चितमस्या वाचः सकाशाद्भागं । भगं नि (?) विद्यतेऽस्मिन्निति भागः परमात्मा । तमश्नुवे । व्याप्नुयां । तं गुरुं प्राप्य तत्त्वमसिवाक्यस्यार्थमैकात्म्यं लभेयमित्यर्थः ॥

Tales igitur nugas recentioris aevi homines pro Vedarum interpretatione venditabant.

I. Gokulakáṇḍa fol. 27[a]; II. vṛindávanakáṇḍa fol. 53[a]; III. akrúrakáṇḍa fol. 73[b]; IV. mathurákáṇḍa fol. 80[b].

In fine capitum haec subscriptio legitur: इति पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ स्वोद्धृतमंत्रभागवतव्याख्यायां मंत्ररहस्यप्रकाशिकायां etc.

Codex exeunte seculo septimo decimo exaratus est. (Walker 211.)

735.

Lit. Bengal. Charta Ind. Foll. 31. Long. 11. Lat. 3. Linn. 5.

Continetur hoc codice *U'rdhvámnáyasaṃhitá*, quo libello, in duodecim capita diviso, sectae Vaishṇavae cujusdam principia traduntur. Caput primum, paulum emendatum, hoc: कदाचित्सुखमासीनं नारदं मुनिसत्तमं । पप्रच्छ नियतो भूत्वा व्यासो लोकनमस्कृतः ॥१॥ महामुने कथय मे विष्णुभक्तिमनुत्तमां । गुरुभक्तिं च कार्त्स्न्येन अवतारगुणांस्तथा ॥२॥ सृष्टिप्रलयकालांश्च महामंत्रांस्तथैव च । तुलसीमाहात्म्यमखिलं गंगामाहात्म्यमेव च ॥३॥ देवध्यानं गुरुध्यानं गुरुदेवार्चनं तथा । गयामाहात्म्यमखिलं माहात्म्यं वैष्णवं तथा ॥४॥ श्रीनारद उवाच ॥ हंत ते कथयिष्यामि यत्पृष्टोऽहं त्वयानघ । *úrdhvámnáya* iti khyáto *grantho* yatra hi vartate ॥५॥ न तत्र दुर्भिक्षभयं न च मारीभयं तथा । स्थिरा लक्ष्मीर्भवेत्तत्र स्थिरो नारायणस्तथा ॥६॥ पुत्रपौत्रविवृद्धिश्च कीर्तिवर्धनमेव च । भक्त्युद्रेककरो ग्रंथो महापातकनाशकृत् ॥७॥ सर्वाधर्मान्दहत्याशु तुलाराशिमिवानलः । वैष्णवायैव ग्रंथोऽयं दातव्यो नान्यभाजिने ॥८॥ पशुहिंसारतायैव ग्रंथो न प्रीतिकारकः । यथा पंके गतो ब्रह्मन्मणिर्दीप्तिं न चाश्रयेत् ॥९॥ छागं यो हंति तं हंति छागो भूत्वा च खड्गभृत् । सुरथं परलोके हि पशवो जघ्नुरित्युत ॥१०॥ यो मांसं खादति नरो दुरात्मा व्याधरूपकः । नरकं याति दुष्टात्मा यावदाभूतसंप्लवं ॥११॥ गुरुर्विष्णुर्गुरुर्देवो गुरुरेव गतिः परा । गुरोरुच्छिष्टममृतं पवित्रं परमं मतं ॥१२॥ गुरोश्चरणतोयं च गंगातोयसमं स्मृतं । गुरोरग्रे नृत्यगीतं प्रलापं च विवर्जयेत् ॥१३॥ देवे क्रुद्धे गुरुस्त्राता गुरौ क्रुद्धे न कश्चन । पशुहिंसा न कर्तव्या यदीच्छेच्छ्रेय आत्मनः[1] ॥१४॥ aṣvamedhe *pishṭamayo* 'ṣvaḥ káryo na tu jívakaḥ । जीवहिंसा नरकदा तस्माद्यत्नाद्विवर्जयेत् ॥१५॥ उत्सर्गकर्ता यो हंता यो धर्ता यश्च विक्रयी । अनुमंता च पुरुषः सर्वे नरकगामिनः ॥१६॥ राजोपरिचरो नाम वैष्णवः सर्वपूजितः । साक्षित्वेन तमातस्थुर्वैष्णवाश्च सुरास्तथा ॥१७॥ वैष्णवा ऊचुः ॥ किं जीवपशवो हिंस्या उत पिष्टमयास्तथा । सत्यं ब्रूहि महाराज मा मिथ्या ब्रूहि भारतीं ॥१८॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतं । अत्यरिच्यत सत्यं च इति वेदविदो विदुः ॥१९॥ मांसाभिलाषिणो देवा इन्द्राद्याः पशुघातनं । साधु मन्यंत इति ते, वैष्णवा नैव साध्विति ॥२०॥ राजोपरिचरो नाम वैष्णवः शीलसन्मतः । कूटसाक्षित्वमापन्नो जीवो हिंस्य इति ब्रुवन् ॥२१॥ पशुहिंसा प्रकर्तव्या इति राजावदद्यदा । तदा च वैष्णवैरुक्तं धिग्धिगित्यसकृत्तथा ॥२२॥ त्वं यथा वैष्णवो भूत्वा मिथ्यावाक्यमुदीरयन् । पशुहिंसानुमंता हि तस्मान्नरकमाप्नुहि ॥२३॥ वैष्णवानामभिशापाद्राजोपरिचरः पुरा । रौरवं नरकं प्राप्तः पशुघाती कथं सुखी ॥२४॥

इत्यूर्ध्वाम्नायसंहितायां गुरुभक्तिकथनं नाम प्रथमोऽध्यायः ॥

श्रीनारद उवाच ॥ *úrdhvenaisha mukhenaiva* kathito grantha uttamaḥ । devadevena rudreṇa *úrdhvámnáya* iti smṛitaḥ ॥ १ ॥

---

[1] यदीश्रोत्रयमात्मनः MS.

Cap. 2. avatáradvádaṣakírtanam; 3. gauramantroddháraḥ; 4. tulasímáhátmyavarṇanam; 5 (fol. 13[a]). gangámáhátmyam; 6. gurudevamanupújanam; 7. náráyaṇastavaḥ; 8. gayámáhátmyam; 9. kárttikamásamáhátmyam; 10 (fol. 26[b]). vaishṇavavargagaṇanam; 11. vaishṇavavárasaṃkhyápújá; 12. aparádhakathanam.

Codex post annum 1810 exaratus est. (WILSON 317.)

736.

Foll. 14–20. *Náráyaṇagítá*, quo libello, disticha 159. continente, *Nílakaṇṭhas* sectae a Rámánanda conditae principia exposuit. Initium, erroribus gravissimis sublatis, hoc: येनोक्ताद्वचनात्प्रसन्नमनसा सद्यः समाधौ नृणां योगाभ्यासमृतेऽपि भक्तिममलां स्वस्मिन्दृढं कुर्वतां। यद्रूपं च निजस्वरूपममलं साक्षात्स्फुरत्यर्कवत्तं ध्यायामि नरं पुरातनमुनिं नारायणं चात्मनि ॥१॥ भक्त्या नमाम्यहं श्रीमद्रामानंदमुनिं गुरुं। नारायणोदितं यस्मादवापं धर्मसंग्रहं ॥२॥ एकदा सुखमासीनं साक्षान्नारायणं प्रभुं। शिष्या रामानंदमुनिमुख्याः पप्रच्छुरादरात् ॥३॥ शिष्या ऊचुः ॥ भगवन्सर्वभूतानां त्वमेव परमा गतिः। स्वाश्रितानां विशेषेण त्वं गुरुश्चेश्वरो ह्यसि ॥४॥ अतस्त्वामाश्रितानां nas *tyáginám gṛihiṇáṃ* tathá। *stríṇáṃ chápi* प्रभो ब्रूहि धर्मान्छ्रेयःप्रसाधकान् ॥५॥ कृष्णादिरूपेण पुरा त्वया धर्मा ह्यनेकशः। प्रोक्ताः संति च तद्ग्रंथा अप्यनेके त्वया कृताः ॥६॥ तथापि कालवेगेन मंदबुद्ध्यल्पकायुषां। नराणां ते तु दुर्ज्ञेया दुष्कराश्च भवंति वै ॥७॥ तस्मादावश्यकांस्तेषां सारभूतान्हितावहान्। धर्मास्त्वं ज्ञानवैराग्यभक्तिभिः सहितान्वद ॥८॥ कृतेन कर्मणा येन प्रसन्नस्त्वं भवेः प्रभो। कर्मणा येन नैष्कर्म्यं सिध्येत्तच्चापि नो वद ॥९॥ इति पृष्टः स भगवान्निजशिष्यैः कृपानिधिः। वेदादीनां सारभूतान्धर्मानाह सनातनान् ॥१०॥ श्रीनारायण उवाच ॥ शृण्वंतु मामकाः सर्वे *purushá yoshitas* tathá। रामानंदमुने त्वं च धर्मान्वच्मि हितावहान् ॥११॥ श्रुतिस्मृतिपुराणेषु सेतिहासेषु विस्तरात्। धर्मा निरूपिताः संति गृहिणां त्यागिनां तथा ॥१२॥ तेषां सारं समुद्धृत्य सर्वेषां वो हितावहं। वच्मि संक्षेपतो युक्तं ज्ञानवैराग्यभक्तिभिः ॥१३॥ ब्राह्मे मुहूर्ते उत्थाय निशायाः प्रहरेऽंतिमे। मद्भक्तैः कीर्तनीयानि मम नामानि नित्यदा ॥१४॥ मद्भक्तानां च नामानि कीर्तनीयानि, तैरहं। अव्यग्रमानसैर्ध्येयो मुहूर्तं वैकनाडिकां ॥१५॥ नमस्कारं ततः कृत्वा साष्टांगं हृदयेऽथ मां। स्मरद्भिः शुद्धहृदयैः कर्तव्या देहिका क्रिया ॥१६॥ स्नानं संध्या जपो होमः स्वाध्यायः पितृतर्पणं। देवतापूजनादीनि नित्यं कार्याणि च द्विजैः ॥१७॥ स्नानं च मानसीं पूजामकृत्वा प्रत्यहं मम। सर्वैरन्नं न भोक्तव्यं विना रोगादिपीडितात् ॥१८॥ रसासक्तिर्न कर्तव्या सर्वैः सर्वत्र सर्वदा। यथाकालं यथालब्धं भोज्यमन्नं फलादि वा ॥१९॥ यो यत्र मुख्यो हि भवेद्भोजयित्वा स चापरान्। स्वयं भुंजीत मद्भक्तः पंक्तिभेदं च नाचरेत् ॥२०॥ एकादशीषु सर्वासु मज्जन्मदिवसेषु च। शिवरात्र्यां च नैवान्नं भोक्तव्यं मदुपाश्रितैः ॥२१॥ मद्भक्तैर्मद्यमांसस्य पलांडोर्लशुनस्य च। भंगागंजतमालादेः कार्यः स्पर्शोऽपि न क्वचित् ॥२२॥ यत्र स्युश्चावतारा मे शास्त्रेषु स्थापितास्तथा। मद्भक्त्या सहितं ज्ञानमध्येतव्यानि तानि वै ॥२३॥ सांख्यशास्त्रं योगशास्त्रं श्रव्यं च सुधियो मुखात्। न त्वंतः शत्रुदग्धस्य मदभक्तस्य कर्हिचित् ॥२४॥ ज्ञानेऽपि निर्गुणे यत्र न स्यान्नारायणस्य मे। स्थापनं दिव्यरूपस्य तन्न श्रव्यं कदाचन ॥२५॥ युक्ताया नियमैः सर्वैः प्राप्ताया ब्रह्मणि स्थितिं। अपि स्त्रियो मुखान्नैव ज्ञानं श्रव्यं हि पूरुषैः ॥२६॥ गेयं यशो मम सदा मदीयानां च भक्तितः। संगः सतां सदा कार्यो मदभक्तस्य न क्वचित् ॥२७॥

In fine hi versus leguntur: यो वै श्रुतो भगवतो रामानंदगुरोमुखात् गीतार्थस्तु स एवायं पद्यैः सग्रथितो मय १५७ शकाब्देऽज्ञाक्षिवाहज्वै प्रमीते शुक्लवत्सरे श्रावणस्याऽसिताष्टम्यां कृतेयं गुरुवासरे १५८॥ इति श्रीनीलकंठेन रचित ब्रह्मचारिणा श्रीनारायणगीतैषा समाप्तिमगमच्छुभा १५९॥ Disticho 158. annus 1799 exprimitur, ad quam aetatem homo, ex Rámánandae ipsius ore se doctrinam accepisse tradens, vix pervenerit. Equidem corruptelam in voce वाह latere puto, cujus loco an वाण legendum sit, ii videant, quibus alii codices praesto sunt.

Haec folia hoc seculo ineunte exarata sunt. (WILSON 337[b].)

737.

Foll. 24–28. Charta Europ. Linn. 8, 9.

A. Foll. 24, 25. Disticha pauca nescio unde desumta, quorum initium hocce: क्षुधा तृषा भयं द्वेषो रागो मोहश्च चिंतनं जरा रुजा च मृत्युश्च श्वेदः खेद मदो रतिः विस्मयो जननं निद्रा विषादो ष्टादश ध्रुवाः त्रिजगत्सर्वभूतानां दोषाः साधारणा इमे यत्तैर्दोषैर्विनिर्मुक्तः सो यमाप्तो निरंजनः परमेष्ठी परं जोतीर्विरागो विमलः कृती ॥

B. Foll. 26–28. Incipit:

यः पुण्यः पुरुषोत्तमो हरिहरः शंभुः स्वयंभूर्विभुः-
विष्णुर्जिष्णुमहेश्वरांकमहितः स्थाणुः पुराणो च्युतः
सर्वज्ञः सुगतो जितः पशुपतिः तीर्थंकरः शंकरः
सिद्धो बुद्ध उमापतिर्जिनपतिः पायादपायात्स वः ॥

Cui disticho, ita ut dicam, pandaemoniaco commentarius additus est. Incipit: अस्यार्थः पद्यमिदमर्योपयामः यो भगवान् पुण्य शुभस्वरूपो वा धर्मस्वरूपो वा etc.

Haec folia post annum 1820 exarata sunt. (WILSON 426[cd].)

O. MEDICINA (VAIDYASASTRA).

738, 739.

Volumina duo. Lit. Devan. Charta Ind. Long. 11. Lat. 4½. Linn. 8–11.

Suṣrutasaṃhitá, medicinae Indicae systema, *Suṣrutae* auctori tributum. Textus Calcuttae annis 1835, 1836 editus est.

Vol. I. Foll. 183. Sútrasthánam, Nidánasthánam.

Vol. II. Foll. 186. Ṣárírasthánam, Chikitsásthánam, Kalpasthánam.

Hi codices anno 1826 exarati sunt. (Wilson 289, 290.)

740.

Lit. Devan. Charta Europ. Foll. 59. Long. 11½. Lat. 9.

Foll. 1–9. Tertii *Suṣrutae* libri (ṣárírasthánae) lectionis primae pars, cum commentario.

Textus inde a अथातः सर्वभूतचिंताशारीरं व्याख्यास्यामः । usque ad स एष कर्मपुरुषश्चिकित्साधिकृतः । (ed. Calc. I, p. 312) continuatur.

Commentarius incipit: हेतुलक्षणप्रतिपादकान्निदानस्थानादधिगतव्याधिहेतुलक्षणस्य वैद्यस्य चिकित्सावसरः। चिकित्सा चाधिष्ठानविशेषज्ञानमंतरेण न संभवतीत्यधिष्ठानज्ञापनाय शारीरस्थानमारभ्यते। शारीरस्थाने पि प्रतिपाद्ये आदौ सर्वशरीरकारणानां भूतानामेव चिंता कर्त्तुं युज्यत इत्याह ॥

Haec voluminis pars post annum 1813 exarata est. (Wilson 292[a].)

741, 742.

Volumina duo. Lit. Devan. Charta Ind. Long. 13. Lat. 5. Linn. 9.

Ashṭángahṛidayasaṃhitá, octo medicinae partium collectio, quo opere *Vágbhaṭas*, Saṃghaguptae[1] filius, totius medicinae systema libris sex, lectionibus 120, exposuit. Incipit: रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान् । औत्सुक्यमोहारतिदान् जघान यो पूर्ववैद्याय नमो स्तु तस्मै ॥१॥ अथात आयुःकामीयमध्यायं व्याख्यास्यामः इति ह स्माहुरात्रेयादयो महर्षयः । आयुः कामयमानेन धर्मार्थसुखसाधनम् । आयुर्वेदोपदेशेषु विधेयः परमादरः ॥२॥ ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत् । सो श्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन् ॥३॥ तेग्निवेशादिकांस्ते तु पृथक् तंत्राणि तेनिरे। तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः ॥४॥ क्रियते ष्टांगहृदयं नातिसंक्षिप्तविस्तृतम् । कायबालग्रहोर्द्ध्वांगशल्यदंष्ट्राजरावृषान् ॥५॥ अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रिता । वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ॥६॥

Vol. I. Foll. 169. Libb. I–III.

Liber I. *Sútrasthána*, foll. 1–86, capita 30. continet. Capite primo auctor terminos technicos generales et argumentum libri proponit. 2. Incipit: Atháto *dinacharyádhyáyaṃ* vyákhyásyámaḥ. ब्राह्मे मुहूर्त्ते उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः । शरीरचिंतां निर्वर्त्य कृतशौचविधिस्ततः ॥१॥ प्राङ्मुखः सुखमासीनो दंतप्रक्षालनाय वै । अर्कन्यग्रोधखदिरकरंजककुभादिजम् । (कनीन्यग्रसमस्थौल्यं प्रगुणं द्वादशांगुलम् ॥२॥ विज्ञातवृक्षं क्षुणाग्रमृजुग्रंथि सुभूमिजम्)[2] प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् ॥३॥ भक्षयेदंतपवनं दंतमांसान्यबाधयन् । लिखेदनुमुखं जिह्वां जिह्वानिर्ल्लेखनेन च ॥४॥ De diaeta quotidiana praecepta, quibus moralia quaedam adjunguntur: सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः । सुखं च न विना धर्मात्तस्माद्धर्मपरो भवेत् ॥३३॥ भक्त्या कल्याणमित्राणि सेवेतेतरदूरगः । हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृतं ॥३४॥ संभिन्नालापं व्यापादमभिध्यां दृग्विपर्ययं। पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेत् ॥३५॥ अवृत्तिव्याधिशोकार्तानुनुवर्तेत शक्तितः । आत्मवत्सततं पश्येदपि कीटपिपीलिकं ॥३६॥ अर्चयेद्देवगोविप्रवृद्धवैद्यनृपातिथीन् । विमुखान्नार्थिनः कुर्यान्नावमन्येत नाक्षिपेत् ॥३७॥ उपकारप्रधानः स्यादपकारपरेऽप्यरौ । संपद्विपत्स्वेकमना हेतावीर्ष्येत्फले न तु ॥३८॥ काले हितं मितं ब्रूयादविसंवादि पेशलं । पूर्वाभिभाषी सुमुखः सुशीलः करुणामृदुः ॥३९॥ नैकः सुखी न सर्वत्र विश्रब्धो न च शंकितः । न कंचिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुं ॥४०॥ प्रकाशयेन्नावमानं न च निःस्नेहतां प्रभोः । जनस्याशयमालक्ष्य यो यथा परितुष्यति ॥४१॥ तं तथैवानुवर्तेत पराराधनपंडितः । न पीडयेदिंद्रियाणि न चैतान्यतिलालयेत् ॥४२॥ त्रिवर्गशून्यं नारंभं भजेत्तं चाविरोधयन् । अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमं ॥४३॥ 3. Athàta *ṛitucharyádhyáyaṃ* vyákhyásyámaḥ. मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षडृतवः स्मृताः। (शिशिरोऽथ वसंतश्च ग्रीष्मवर्षाशरद्धिमाः।) शिशिराद्यैस्त्रिभिस्तैस्तु विद्यादयनमुत्तरं ॥१॥ आदानं च तदादत्ते नृणां प्रतिदिनं बलं । तस्मिन्नत्यर्थतीक्ष्णोष्णरूक्षा मार्गस्वभावतः ॥२॥ आदित्यपवनाः सौम्यान्क्षपयंति गुणान्भुवः । तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात् ॥३॥ 4. Atháto *rogánutpádaníyam* adhyáyaṃ vyákhyásyámaḥ. वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधां । निद्राकासश्रमश्वासजृंभाश्रुच्छर्दिरेतसां ॥१॥ अधोवातस्य रोधेन गुल्मोदावर्तरुक्क्लमाः । वातमूत्रशकृत्संगदृष्ट्यग्निवधहृद्गदाः ॥२॥ शकृतः पिंडिकोद्वेष्टप्रतिश्यायशिरोरुजः। मुखेन विट्प्र-

---

[1] Patris nomen, subscriptionibus tantum librorum traditum, nonnunquam *Sinhagupta* scribitur.

[2] Quae uncis inclusi, ab Aruṇadatta, Mṛigánkadattae filio, cujus ad librum primum commentario (E. I. H. 985.) usus sum, non explicantur, isque scholiasta etiam in reliquis partibus breviorem et antiquiorem operis recensionem in manibus videtur habuisse.

वृत्तिश्च पूर्वोक्तास्त्वामयाः स्मृताः ॥३॥ 5. Atháto *dravadravyavijnáníyam* a. v. जीवनं तर्पणं हृद्यं ह्लादि बुद्धिप्रबोधनं । तन्वव्यक्तरसं मृष्टं शीतं लघ्वमृतोपमं ॥१॥ गंगांबु नभसो भ्रष्टं स्पृष्टं त्वर्केंदुमारुतैः । हिताहितत्वे तद्भूयो देशकालावपेक्षते ॥२॥ येनाभिवृष्टममलं शाल्यन्नं राजते स्थितं । अक्लिन्नमविवर्णं वा तत्तोयं गांगमन्यथा ॥३॥ सामुद्रं तत्र पातव्यं मासादाश्वयुजाद्विना । ऐंद्रमंबु सुपात्रस्थमविपन्नं सदा पिबेत् ॥४॥ 6 (fol. 17^{a}). Atháto *'nnasvarúpavijnáníyam* a. v. रक्तो महान्सकलमस्तूर्णकः शकुनाहृतः[1] । सारामुखो दीर्घशूको रोध्रशूकः सुगंधिकः ॥१॥ पतंगास्तपनीयाश्च ये चान्ये शालयः शुभाः । स्वादुपाकरसाः स्निग्धा वृष्या बद्धाल्पवर्चसः ॥२॥ 7. Atháto *'nnarakshávijnáníyam* a. v. राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत् । सर्वदा संभवत्येवं सर्वत्र प्रतिजागृविः ॥१॥ अन्नपानं विषाद्रक्षेद्विशेषेण महीपतेः । योगक्षेमौ तदायत्तौ धर्माद्यास्तन्निबंधनाः ॥२॥ ओदनो विषवान्सांद्रो यात्यविस्राव्यतामिव । चिरेण पच्यते पक्वो भवेत्पर्युषितोपमः ॥३॥ 8. Atháto *mátráṣitíyam* a. v. मात्राशी सर्वकालं स्यान्मात्रा ह्यग्नेः प्रवर्तिका । मात्रां द्रव्याण्यपेक्षंते गुरूण्यपि लघून्यपि ॥१॥ गुरूणामर्धसौहित्यं लघूनां नातितृप्तता । मात्रा प्रमाणं निर्दिष्टं सुखं यावद्विजीर्यति ॥२॥ भोजनं हीनमात्रं तु न बलोपचयौजसे । सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ॥३॥ अतिमात्रं पुनः सर्वानाशु दोषान्प्रकोपयेत् । पीड्यमाना हि वाताद्या युगपत्तेन कोपिताः ॥४॥ आमेनान्नेन दुष्टेन तदेवाविश्य कुर्वते । विष्टंभयंतोऽलसकं च्यावयंतो विसूचिकां ॥५॥ 9. Atháto *dravyádivijnáníyam* a. v. द्रव्यमेव रसादीनां श्रेष्ठं ते हि तदाश्रयाः । पंचभूतात्मकं तत्तु क्ष्मामधिष्ठाय जायते ॥१॥ अंबुयोन्यग्निपवननभसां समवायतः । तन्निर्वृत्तिविशेषश्च व्यपदेशश्च भूयसा ॥२॥ तस्मान्नैकरसं द्रव्यं भूतसंघातसंभवात् । नैकदोषास्ततो रोगास्तत्र व्यक्तो रसः स्मृतः ॥३॥ अव्यक्तोऽनुरसः ॥ 10. Atháto *rasabhedíyam* a. v. क्ष्मांभोग्निक्ष्मांबुतेजःखवाय्वग्न्यनिलगोनिलैः । द्वयोल्बणैः क्रमाद्भूतैर्मधुरादिरसोद्भवः ॥१॥ तेषां विद्याद्रसं स्वादुं यो वक्त्रमुपलिंपति (anulimpati Aruṇad.) । आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः ॥२॥ प्रियः पिपीलिकादीनाम्, अम्लः क्षालयते मुखं । हर्षणो रोमदंतानामक्षिभ्रुवनिकोचनः ॥३॥ लवणः स्पंदयत्यास्यं कपोलगलदाहकृत् । तिक्तो विशदयत्यास्यं रसनां (Schol. rasanam) प्रतिहंति च । उद्वेजयति जिह्वाग्रं कुर्वंश्चिमिचिमां कटुः ॥४॥ स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च । कषायो जडयेज्जिह्वां कंठस्रोतोविबंधकृत् ॥५॥ 11 (fol. 36^{a}). Atháto *doshádivijnáníyam* a. v. दोषधातुमला मूलं सदा देहस्य, तं *chalaḥ* । उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्तनैः ॥१॥ सम्यग्गत्या च धातूनामक्षाणां पाटवेन च । अनुगृह्णात्यविकृतः *pittam* पक्त्यूष्मदर्शनैः ॥२॥ क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः । *ṣleshmá* स्थिरत्वस्निग्धत्वसंधिबंधक्षमादिभिः ॥३॥ प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे । गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात्स्मृतं ॥४॥ 12. Atháto *doshabhedíyam* a. v. पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेंद्रियं । स्थानं *vátasya* तत्रापि पक्वाधानं विशेषतः ॥१॥ नाभिरामाशयः स्वेदो लसीका रुधिरं रसः । दृक् स्पर्शनं च *pittasya* नाभिरत्र विशेषतः ॥२॥ उरःकंठशिरःक्लोमपर्वाण्यामाशयो रसः । मेदो घ्राणं च जिह्वा च *kaphasya* सुतरामुरः ॥३॥ 13. Atháto *doshopakramaṇíyam* a. v. वातस्योपक्रमः स्नेहः स्वेदः संशोधनं मृदु । स्वाद्वम्ललवणोष्णानि भोज्यान्यभ्यंगमर्दनं ॥१॥ वेष्टनं त्रासनं सेको मद्यं पैष्टिकगौडिकं । स्निग्धोष्णा वस्तयो वस्तिनियमः सुखशीलता ॥२॥ दीपनैः पाचनैः सिद्धाः स्नेहाश्चानेकयोनयः । विशेषान्मेध्यपिशितरसस्तैलानुवासनं ॥३॥ 14. Atháto *dvividhopakramaṇíyam* a. v. उपक्रम्यस्य हि द्वित्वाद्द्विधैवोपक्रमो मतः । एकः संतर्पणस्तत्र द्वितीयश्चापतर्पणः ॥१॥ वृंहणो लंघनश्चेति तत्पर्यायावुदाहृतौ । वृंहणं यद्बृहत्त्वाय लंघनं लाघवाय यत् ॥२॥ 15. Athátaḥ *ṣodhanádigaṇíyam* a. v. मदनमधुकलंबानिंबविंबीविशालात्रपुसकुटजमूर्वादेवदालीकृमिघ्नं । विदुलदहनचित्राः कोशवत्यौ करंजः कणालवणवचैलाः सर्षपाश्छर्दनानि ॥१॥ 16 (fol. 49^{b}). Athátaḥ *snehavidhim* a. v. गुरुशीतसरस्निग्धमंदसूक्ष्ममृदुद्रवं । औषधं स्नेहनं प्रायो विपरीतं विरूक्षणं ॥१॥ सर्पिर्मज्जा वसा तैलं स्नेहेषु प्रवरं मतं । तत्रापि चोत्तमं सर्पिः संस्कारस्यानुवर्तनात् ॥२॥ माधुर्यादविदाहित्वाज्जन्माद्येव च शीलनात् । पित्तघ्नास्ते यथापूर्वमितरघ्ना यथोत्तरं ॥३॥ 17. Athátaḥ *svedavidhim* a. v. स्वेदस्तापोपनाहोष्मद्रवभेदाच्चतुर्विधः । तापोऽग्नितप्तवसनफालहस्ततलादिभिः ॥१॥ उपनाहो वचाकिण्वशताह्वादेवदारुभिः । धान्यैः समस्तैर्गंधैश्च रास्नैरंडजटामिषैः ॥२॥ 18. Atháto *vamanavirechanavidhim* a. v. कफे विदध्याद्वमनं संयोगे वा कफोल्बणे । तद्वद्विरेचनं पित्ते, विशेषेण तु वामयेत् ॥१॥ नवज्वरातिसाराधःपित्तासृग्राजयक्ष्मिणः । कुष्ठमेहापचीग्रंथिश्लीपदोन्मादकासिनः ॥२॥ श्वासहृल्लासवीसर्पस्तन्यदोषोर्ध्वरोगिणः ॥ 19. Atháto *vastividhim* a. v. वातोल्बणेषु दोषेषु वाते वा वस्तिरिष्यते । उपक्रमाणां सर्वेषां सोऽग्रणीस्त्रिविधश्च सः ॥१॥ nirúho, 'nvásanaṃ, vastir uttaras. तेन साधयेत् । गुल्मानाहखुडप्लीहशुद्धातीसारशूलिनः ॥२॥ जीर्णज्वरप्रतिश्यायशुक्रानिलमलग्रहान् । वर्ध्माश्मरिरजोनाशान्दारुणांश्चानिलामयान् ॥३॥ 20. Atháto *nasyavidhim* a. v. ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते । नासा हि शिरसो द्वारं तेन तद्व्याप्य हंति तान् ॥१॥ 21 (fol. 63^{a}). Atháto *dhúmapánavidhim* a. v. जत्रूर्ध्वकफवातोत्थविकाराणामजन्मने । उच्छेदाय च जातानां पिबेद्धूमं सदात्मवान् ॥१॥ स्निग्धो मध्यः स तीक्ष्णश्च वाते वातकफे कफे । योज्यो न पित्तरक्तार्तिविरिक्तोदरमेहिषु ॥२॥ तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तवस्तिषु । मत्स्यमद्यदधिक्षीरक्षौद्रस्नेहविषाशिषु ॥३॥ 22. Atháto *gaṇḍúshádividhim* a. v. चतुःप्रकारो गंडूषः स्निग्धः शमनशोधनौ । रोपणश्च त्रयस्तत्र क्रमाद्योज्याश्चलादिषु ॥१॥ 23. Atháta *áṣchyotanánjanavidhim* a. v. सर्वेषामक्षिरोगाणामादावाश्च्योतनं हितं । रुक्तोदकंडूघर्षाश्रुदाहरागनिबर्हणं ॥१॥ उष्णं वाते कफे कोष्णं तच्छीतं

---

[1] Schol. शकुनाहृतो यो मगधेषु बुद्धोत्पादकाले उत्तरकुरुभ्यो हंसैरानीतो मृगारमात्रा वैशाखाख्यया वापितो विस्तरं गतः । सारामुखः कृष्णशूकः ॥

रक्तपित्तयोः । निवातस्थस्य वामेन पाणिनोन्मील्य लोचनं ॥२॥ शुक्तौ प्रलंबयान्येन पिचुवर्त्या कनीनके । दश द्वादश वा विंदून्द्व्यंगुलादवसेचयेत् ॥३॥ ततः प्रमृज्य मृदुना चैलेन कफवातयोः । अन्येन कोष्णपानीयप्लुतेन स्वेदयेन्मृदु ॥४॥ 24. Athátas *tarpaṇapuṭapákavidhim* a. v. नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते । वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥१॥ कृच्छ्रोन्मीलसिराहर्षसिरोत्पाततमोऽर्जुनैः । स्यंदमंथान्यतोवातवातपर्यायशुक्रकैः ॥२॥ आतुरे शांतरागाश्रुशूलसंरंभदूषिके । निवाते तर्पणं योज्यं शुद्धयोर्मूर्धकाययोः ॥३॥ 25. Atháto *yantravidhim* a. v. नानाविधानां शल्यानां नानादेशप्रबाधिनां । आहर्तुमभ्युपायो यस्तद्यंत्रं यच्च दर्शने ॥१॥ अर्शोभगंदरादीनां शस्त्रक्षाराग्नियोजने । शेषांगपरिरक्षायां तथा वस्त्यादिकर्मणि ॥२॥ घटिकालाबु शृंगं च जांबवौष्ठादिकानि च । अनेकरूपकार्याणि यंत्राणि विविधान्यतः ॥३॥ विकल्प्य कल्पयेद्बुद्ध्या ॥ 26 (fol. 71a). Athátaḥ *ṣastravidhim* a. v. षड्विंशतिः सुकर्मारैर्घटितानि यथाविधि । शस्त्राणि रोमवाहीनि बाहुल्येनांगुलानि षट् ॥१॥ सुरूपाणि सुधाराणि सुग्रहाणि च कारयेत् । अकरालानि सुध्मातसुतीक्ष्णावर्तितेऽयसि ॥२॥ समाहितमुखाग्राणि नीलांभोजच्छवीनि च । नामानुगतरूपाणि सदा संनिहितानि च ॥३॥ 27. Athátaḥ *sirávyadhavidhim* a. v. मधुरं लवणं किंचिदशीतोष्णमसंहतं । पद्मेंद्रगोपहेमाविशशलोहितलोहितं ॥१॥ लोहितं प्रभवं शुद्धं तनोस्तेनैव च स्थितिः ॥ 28. Athátaḥ *ṣalyáharaṇavidhim* a. v. वक्रर्जुतिर्यगूर्ध्वाधः शल्यानां पंचधा गतिः । ध्यामं शोफरुजावंतं स्रवंतं शोणितं मुहुः ॥१॥ अभ्युन्नतं बुद्बुदवत्पिटकोपचितं व्रणं । मृदुमांसं च जानीयादंतःशल्यं समासतः ॥२॥ 29. Athátaḥ *ṣastrakarmavidhim* a. v. व्रणः संजायते प्रायः पाकाच्छ्वयथुपूर्वकात् । तमेवोपचरेत्तस्माद्रक्षन्पाकं प्रयत्नतः ॥१॥ सुशीतलेपसेकास्रमोक्षसंशोधनादिभिः ॥ 30. Athátaḥ *kshárágnikarmavidhim* a. v. सर्वशस्त्रानुशस्त्राणां क्षारः श्रेष्ठो बहूनि यत् । छेद्यभेद्यादिकर्माणि कुरुते विषमेष्वपि ॥१॥ दुःखावचार्यशस्त्रेषु तेन सिद्धिमयात्सु च । अतिकृच्छ्रेषु रोगेषु यच्च पानेऽपि युज्यते ॥२॥[1]

Liber II. *Ṣarírasthána*, foll. 87–117, sex capitibus constat. 1. Atháto *garbhávakrántiṣáríram* v. Iti ha smáhur A'treyádayo maharshayaḥ । शुद्धे शुक्रार्तवे सत्त्वः स्वकर्मक्लेशनोदितः । गर्भः संपद्यते युक्तिवशादग्निरिवारणौ ॥१॥ बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः । मातुश्चाहाररसजैः क्रमात्कुक्षौ विवर्धते ॥२॥ तेजो यथार्करश्मीनां स्फटिकेन तिरस्कृतं । नेंधनं दृश्यते गच्छत्सत्त्वो गर्भाशयं तथा ॥३॥ 2. Atháto *garbhavyápadam* ṣ. v. गर्भिण्याः परिहार्याणां सेवया रोगतोऽपि वा । पुष्पे दृष्टेऽथवा शूले बाह्यांतःस्निग्धशीतलं ॥१॥ सेव्यांभोजहिमक्षीरिवल्ककल्काज्यलेपितान् । धारयेद्बस्तियोनिभ्यामार्द्रार्द्रान्पिचुवर्तकान् ॥२॥ 3. Atháto *'ngavibhágam* ṣ. v. शिरोऽंतराधिर्द्वौ बाहू सक्थिनी च समासतः । षडंगमंगं प्रत्यंगं तस्याक्षिहृदयादिकं ॥१॥ 4. Atháto *marmavibhágam* ṣ. v. सप्तोत्तरं मर्मशतं तेषामेकादशोद्दिशेत् । पृथक् सक्थ्नोस्तथा बाह्वोस्त्रीणि कोष्ठे नवोरसि ॥१॥ पृष्ठे चतुर्दशोर्ध्वं तु जत्रोस्त्रिंशच्च सप्त च ॥ 5. Atháto *vikritivijnáníyam* a. v. पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः । यथा, भविष्यतो लिंगं रिष्टं मृत्योस्तथा ध्रुवं ॥१॥ आयुष्मति क्रियाः सर्वाः सफलाः संप्रयोजिताः । भवंति भिषजां भूत्यै कृतज्ञ इव भूभुजि ॥२॥ क्षीणायुषि कृतं कर्म व्यर्थं कृतमिवाधमे । अयशोदेहसंदेहं स्वार्थहानिं च यच्छति ॥३॥ 6. Atháto *dútavijnáníyam* ṣáríram v. पाषंडाश्रमवर्णानां सवर्णाः कर्मसिद्धये । त एव विपरीताः स्युर्दूताः कर्मविपत्तये ॥१॥ दीनं भीतं द्रुतं त्रस्तं रूक्षामंगलवादिनं । शस्त्रिणं दंडिनं षंढं मुंडं श्मश्रुजटाधरं ॥२॥ अमंगलाह्वयं क्रूरकर्माणं मलिनं स्त्रियं । अनेकं व्याधितं व्यंगं रक्तमाल्यानुलेपनं ॥३॥ तैलपंकांकितं जीर्णविवर्णार्द्रैकवाससं । खरोष्ट्रमहिषारूढं काष्ठलोष्टादिमर्दिनं ॥४॥ नानुगच्छेद्भिषग्दूतमाह्वयंतं च दूरतः ॥

Liber III. *Nidánasthána*, foll. 118–169, capita 16. continet. 1. Athátaḥ *sarvaroganidánam* v. Iti ha smáhur A'treyádayo maharshayaḥ. रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः । यक्ष्मातंकगदाबाधाः शब्दाः पर्यायवाचकाः ॥१॥ निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥२॥ निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः । निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते ॥३॥ 2. Atháto *jvaranidánam* v. ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽंतकः । क्रोधो दक्षाध्वरध्वंसी रुद्रोऽर्धनयनोद्भवः ॥१॥ जन्मांतयोर्मोहमयः संतापात्मापचारजः । विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते ॥२॥ स जायतेऽष्टधा दोषैः पृथङ्मिश्रैः समागतैः ॥ 3. Atháto *raktapittakásanidánam* v. भृशोष्णतीक्ष्णकट्वम्लवणादिविदाहिभिः । कोद्रवोद्दालकैश्चान्नैस्तद्युक्तैरतिसेवितैः ॥१॥ कुपितं पित्तलैः पित्तं द्रवं रक्तं च मूर्छिते । ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुतस्तनुं ॥२॥ पित्तं रक्तस्य विकृतेः संसर्गाद्दूषणादपि । गंधवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते ॥३॥ 4. Athátaḥ *ṣvásahikkánidánam* v. कासवृद्ध्या भवेच्छ्वासः पूर्वैर्वा दोषकोपनैः । आमातिसारवमथुविषपांडुज्वरैरपि ॥१॥ रजोधूमानिलैर्मर्मघातादतिहिमांबुना । क्षुद्रकस्तमकश्छिन्नो महानूर्ध्वश्च पंचमः ॥२॥ कफोपरुद्धगमनः पवनो विष्वगास्थितः । प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन् ॥३॥ उरःस्थः कुरुते श्वासमामाशयसमुद्भवं । प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता ॥४॥ 5. Atháto *rájayakshmádinidánam* v. अनेकरोगानुगतो बहुरोगपुरोगमः । राजयक्ष्मा क्षयः शोषो रोगराडिति संस्मृतः ॥१॥ नक्षत्राणां द्विजानां च राज्ञोऽभूद्यदयं पुरा । यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥२॥ देहौषधक्षयकृतेः क्षयस्तत्संभवाच्च सः । रसादिशोषणाच्छोषो रोगराट् तेषु राजनात् ॥३॥ साहसं वेगसंरोधः शुक्रौजःस्नेहसंक्षयः । अन्नपानविधित्यागश्चत्वारस्तस्य हेतवः ॥४॥ 6 (fol. 134). Atháto *madátyayádinidánam* v. तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवाय्याशुकरं लघु । विकाशि विशदं मद्यमोजसोऽस्माद्विपर्ययः ॥१॥ तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः । जीवितांताय जायंते विषे तूत्कर्षवृत्तितः ॥२॥ तीक्ष्णादिभिर्गुणैर्मद्यं मंदादीनोजसो गुणान् । दशभिर्दश संक्षोभ्य चेतो नयति विक्रियां ॥३॥ आद्ये मदे द्वितीये च प्रमादायतने स्थितः । दुर्विकल्पहतो मूढः सुखमि-

[1] Initia capitum 3—30. commentarii ope emendata sunt.

त्यभिमन्यते ॥४॥ मध्यमोत्तमयोः संधिं प्राप्य राजसतामसः । निरंकुश इव व्यालो न किंचिन्नाचरेज्जडः ॥५॥ इयं भूमिरवद्यानां दौःशीलस्येदमास्पदं । एकोऽयं बहुमार्गीया दुर्गतेर्दर्शकः, परं ॥६॥ निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः । मरणादपि पापात्मा गतः पापतरां दशां ॥७॥ धर्माधर्मं सुखं दुःखमर्थानर्थं हिताहितं । यदासक्तो न जानाति कथं तच्छीलयेद्बुधः ॥८॥ मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संसृताः । सोन्मादमदमूर्छायासापस्मारापतानकाः ॥९॥ यत्रैकः स्मृतिविभ्रंशस्तत्र सर्वमसाधुकृत् । अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ॥१०॥ मद्यं त्रिवर्गधीधैर्यलज्जादेरपि नाशनं । नातिमाद्यंति बलिनः कृताहारा महाशनाः ॥११॥ 7. Atháto *'rṣasám nidánam* v. अरिवत्प्राणिनो मांसकीलका विशसंति यत् । अर्शांसि तस्मादुच्यंते गुदमार्गनिरोधतः ॥१॥ दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् । मांसांकुरानपानादौ कुर्वंत्यर्शांसि तान्जगुः ॥२॥ सहजन्मोत्तरोत्थानभेदाद्द्वेधा समासतः । शुष्कस्राविविभेदाच्च ॥ 8. Atháto *'tísáragrahaṇínidánam* v. दोषैर्व्यस्तैः समस्तैश्च भयाच्छोकाच्च षड्विधः । अतीसारः स सुतरां जायतेऽत्यंबुपानतः ॥१॥ कृशशुष्कामिषासात्यतिलपिष्टविरूढकैः । मद्यरूक्षातिमात्रान्नैरर्शोभिः स्नेहविभ्रमात् ॥२॥ कृमिभ्यो वेगरोधाच्च तद्विधैः कुपितोऽनिलः । विस्रंसयत्यधोधातून्हत्वा तेनैव चानलं ॥३॥ व्यापाद्यानुशकृत्कोष्ठं पुरीषं द्रवतां नयन् । प्रकल्पतेऽतिसाराय ॥ 9. Atháto *mútrághátanidánam* v. बस्तिबस्तिशिरोमेढ्रकटीवृषणपायवः । एकसंबंधनाः प्रोक्ता गुदास्थिविवराश्रयाः ॥१॥ अधोमुखोऽपि बस्तिर्हि मूत्रवाहिसिरामुखैः । पार्श्वेभ्यः पूर्यते सूक्ष्मैः स्यंदमानैरनारतं ॥२॥ यैस्तैरेव प्रविश्यैनं दोषाः कुर्वंति विंशतिं । मूत्राघातान्प्रमेहांश्च कृच्छ्रान्मर्मसमाश्रयान् ॥३॥ 10. Athátaḥ *pramehanidánam* v. प्रमेहा विंशतिस्तत्र श्लेष्मतो दश पित्ततः । षट् चत्वारोऽनिलात्तेषां मेदोमूत्रकफावहं ॥१॥ अन्नपानक्रियाजातं यत्प्रायस्तत्प्रवर्तकं । स्वाद्वम्ललवणस्निग्धगुरुपिच्छिलशीतलं ॥२॥ नवधान्यसुरानूपमांसेक्षुगुडगोरसं ॥ 11 (fol. 147^{a}). Atháto *vidradhivṛiddhigulmanidánam* v. भुक्तैः पर्युषितात्युष्णरूक्षशुष्कविदाहिभिः । जिह्मशय्याविचेष्टाभिस्तैस्तैश्चासृक्प्रदूषणैः ॥१॥ दुष्टत्वङ्मांसमेदोस्थिस्नायुसृक्कंडराश्रयः । यः शोफो बहिरंतर्वा महामूलो महारुजः ॥२॥ वृत्तः स्यादायतो यो वा स्मृतः षोढा स विद्रधिः ॥ 12. Atháta *udaranidánam* v. रोगाः सर्वेऽपि मंदेऽग्नौ सुतरामुदराणि च । अजीर्णान्मलिनैश्चान्नैर्जायंते मलसंचयात् ॥१॥ ऊर्ध्वाधोधातवो रुद्धा वाहिनीरंबुवाहिनीः । प्राणाग्न्यपानान्संदूष्य कुर्युस्त्वङ्मांससंधिगाः ॥२॥ आध्माप्य कुक्षिमुदरमष्टधा तच्च भिद्यते । पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ॥३॥ 13. Athátaḥ *páṇḍurogaṣophavisarpanidánam* v. पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः । तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितं ॥१॥ धमनीर्दश संप्राप्य व्याप्नुवत्सकलां तनुं । श्लेष्मत्वग्रक्तमांसानि प्रदूष्यांतरमाश्रितं ॥२॥ त्वङ्मांसयोस्तत्कुरुते त्वचि वर्णान्पृथग्विधान् । पांडुहारिद्रहरितान्पांडुत्वं तेषु चाधिकं ॥३॥ यतोऽतः पांडुरित्युक्तः स रोगस्तेन गौरवं । धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥४॥ 14. Athátaḥ *kushṭhaṣvitrakṛiminidánam* v. मिथ्याहारविहारेण विशेषेण विरोधिना । साधुनिंदावधान्यस्वहरणाद्यैश्च सेवितैः ॥१॥ पाप्मभिः कर्मभिः सद्यः प्राक्तनैः प्रेरिता मलाः । सिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषं ॥२॥ दूषयंति श्लथीकृत्य निःसरंतस्ततो बहिः । त्वचः कुर्वंति वैवर्ण्यं दुष्टाः कुष्ठमुशंति तत् ॥३॥ 15. Atháto *vátavyádhinidánam* v. सर्वार्थानर्थकरणे विश्वस्यास्यैककारणं । अदुष्टदुष्टः पवनः शरीरस्य विशेषतः ॥१॥ स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः । स्रष्टा धाता विभुर्विष्णुः संहर्ता मृत्युरंतकः ॥२॥ तददुष्टौ प्रयत्नेन यतितव्यमतः सदा । तस्योक्तं दोषविज्ञाने कर्म प्राकृतवैकृतं ॥३॥ 16. Atháto *vátaṣoṇitanidánam* v. विदाह्यन्नं विरुद्धं च तत्तच्चासृक्प्रदूषणं । भजतां विधिहीनं च स्वप्नजागरमैथुनं ॥१॥ प्रायेण सुकुमाराणामचंक्रमणशीलिनां । अभिघातादशुद्धेश्च नृणामसृजि दूषिते ॥२॥ वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः । तादृशेनासृजा रुद्धः प्राक्तदेव प्रदूषयेत् ॥३॥ आढ्यरोगं खुडं वातबलासं वातशोणितं । तदाहुर्नामभिस्तच्च पूर्वं पादौ प्रधावति ॥४॥

Vol. II. Foll. 241. Libb. IV–VI.

Liber IV. *Chikitsásthána*, foll. 1–107, capita 22. continet. 1. Atháto *jvarachikitsitam* v. Iti ha smáhur Átreyádayo maharshayaḥ. आमाशयस्थो हत्वाग्निं सामो मार्गान्पिधापयन् । विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लंघनं ॥१॥ 2. Atháto *raktapittachikitsitam* v. ऊर्ध्वगं बलिनो वेगमेकदोषानुगं नवं । रक्तपित्तं सुखे काले साधयेन्निरुपद्रवं ॥१॥ 3. Athátaḥ *kásachikitsitam* v. केवलानिलजं कासं स्नेहैरादावुपाचरेत् । वातघ्नसिद्धैः स्निग्धैश्च पेययूषरसादिभिः ॥१॥ 4. Athátaḥ *ṣvásahikkáchikitsitam* v. श्वासहिक्का यतस्तुल्यहेत्वाद्याः साधनं ततः । तुल्यमेव तदार्तं च पूर्वं स्वेदैरुपाचरेत् ॥१॥ 5. Atháto *rájayakshmachikitsitam* v. बलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनं । ऊर्ध्वाधो यक्ष्मिणः कुर्यात्सस्नेहं यन्न कर्शनं ॥१॥ 6 (fol. 27^{b}). Athátaṣ *chhardihṛidrogatṛishṇáchikitsitam* v. आमाशयोत्क्लेशभवाः प्रायश्छर्द्यो, हितं ततः । लंघनं प्रागृते वायोर्वमनं तत्र योजयेत् ॥१॥ 7. Atháto *madátyayachikitsitam* v. यं दोषमधिकं पश्येत्तस्यादौ प्रतिकारयेत् । कफस्थानानुपूर्व्या वा तुल्यदोषे मदात्यये ॥१॥ 8. Atháto *'rṣasám chikitsitam* v. काले साधारणे व्यभ्रे नातिदुर्बलमर्शसं । विशुद्धकोष्ठं etc. ॥१॥ 9. Atháto *'tísárachikitsitam* v. अतीसारो हि भूयिष्ठं भवत्यामाशयान्वयः ॥ 10. Atháto *grahaṇídoshachikitsitam* v. ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत् । अतीसारोक्तविधिना तस्यामं च विपाचयेत् ॥१॥ 11 (fol. 55^{b}). Atháto *mútrachikitsitam* v. कृच्छ्रे वातघ्नतैलाक्तमधोनाभेः समीरजे । सुस्विन्नैः स्वेदयेदंगं पिंडसेकावगाहनैः ॥१॥ 12. Athátaḥ *pramehachikitsitam* v. मेहिनो बलिनः कुर्यादादौ वमनरेचने । स्निग्धस्य सर्षपारिष्टनिकुंभाख्यकरंजजैः ॥१॥ 13. Atháto *vidradhivṛiddhichikitsitam* v. विद्रधिं सर्वमेवामं शोफवत्समुपाचरेत् । प्रततं चाहरेद्रक्तं पक्के तु व्रणवत्क्रिया ॥१॥ 14. Atháto *gulmachikitsitam* v. गुल्मं बद्धशकृद्वातं वातिकं तीव्रवेदनं । रूक्षशीतोद्भवं तैलैः साधयेद्वातरोगिकैः ॥१॥ 15. Atháta *udarachikitsitam* v. दोषातिमात्रोपचयात्स्रोतोमार्गनिरोधनात् । संभवत्युदरं तस्मान्नित्यमेव

विरेचयेत् ॥१॥ 16 (fol. 80[a]). Athátaḥ *páṇḍurogachikitsitaṃ* v. पांडुरोगी पिबेत्सर्पिरादौ कल्याणकाह्वयं । पंचगव्यं महातिक्तं शृतं चारग्वधादिना ॥१॥ 17. Athátaḥ *ṣvayathuchikitsitaṃ* v. सर्वत्र सर्वांगसरे दोषजे श्वयथौ पुरा । सामे etc. ॥ 18. Atháto *vísarpachikitsitaṃ* v. आदावेव विसर्पेषु हितं लंघनरूक्षणं । रक्तावसेको वमनं विरेकः स्नेहनं तु न ॥१॥ 19. Athátaḥ *kushṭhachikitsitaṃ* v. कुष्ठिनं स्नेहपानेन पूर्वं तु समुपाचरेत् । तत्र वातोत्तरे तैलं घृतं वा साधितं हितं ॥१॥ 20. Athátaḥ *ṣvitrakṛimichikitsitaṃ* v. कुष्ठादपि बीभत्सं यच्छीघ्रतरं च यात्यसाध्यत्वं । श्वित्रमतस्तच्छांत्यै यतेत दीप्ते यथा भवने ॥१॥ 21. Atháto *vátavyádhichikitsitaṃ* v. केवलं निरुपस्तंभमादौ स्नेहैरुपाचरेत् । वायुं सर्पिर्वसामज्जतैलपानैर्नरं ततः ॥१॥ स्नेहक्लांतं समाश्वास्य पयोभिः स्नेहयेत्पुनः ॥ 22. Atháto *vátaṣoṇitachikitsitaṃ* v. वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् । अल्पाल्पं पालयन्वायुं यथादोषं यथाबलं ॥१॥

Liber V. *Kalpasthána*, foll. 108–124, capita 6. continet. 1. Atháto *vamanakalpaṃ* v. Iti ha smáhur A'treyádayo maharshayaḥ. वमने मदनं श्रेष्ठं तृवृन्मूलं विरेचने । नित्यमन्यस्य तु व्याधिविशेषेण विशिष्टता ॥१॥ फलानि तानि पांडूनि न चातिहरितान्यपि । आदायाह्नि प्रशस्तर्क्षे मध्ये ग्रीष्मवसंतयोः ॥२॥ प्रमृज्य कुशमुत्तोल्यां क्षिप्त्वा बद्ध्वा प्रलेपयेत् । गोमयेनामूमुत्तोलीं धान्यमध्ये निधापयेत् ॥३॥ 2. Atháto *virekakalpaṃ* v. कषाया मधुरा रूक्षा विपाके कटुका तृवृत् । कफपित्तप्रशमनी रौक्ष्याच्चानिलकोपिनी ॥१॥ सेदानीमौषधैर्युक्ता वातपित्तकफापहैः । कल्पवैशेष्यमासाद्य जायते सर्वरोगजित् ॥२॥ द्विधाख्यातं च तन्मूलं श्यामं श्यामारुणं तृवृत् । तृवृदाख्यं वरतरं निरपायं सुखं तयोः ॥३॥ 3. Atháto *vamanavirechanavyápatsiddhiṃ* v. वमनं मृदुकोष्ठेन क्षुद्वताल्पकफेन वा । अतितीक्ष्णहिमस्तोकमजीर्णे दुर्बलेन वा ॥१॥ पीतं प्रयात्यधस्तस्मिन्निष्टहानिर्मलोदयः । वामयेत्तं पुनः स्निग्धं स्मरन्पूर्वमतिक्रमं ॥२॥ 4. Atháto *vastikalpaṃ* v. बलां गुडूचीं त्रिफलां सरास्नां द्विपंचमूलं च पलोन्मितानि । अष्टौ फलान्यर्धतुलां च मांसाच्छागात्पचेदप्सु चतुर्थशेषं ॥१॥ पूतो यवानीफलबिल्वकुष्ठवचाशताह्वाघनपिप्पलीनां । कल्कैर्गुडक्षौद्रयुतैः सतैलैर्युक्तः सुखोष्णोल्वणान्वितश्च ॥२॥ वस्तिः परं सर्वगदप्रमाथी स्वस्थे हितो जीवनबृंहणश्च । वस्तौ च यस्मिन्पठितो न कल्कः सर्वत्र दद्यादमुमेव तत्र ॥३॥ 5. Atháto *vastivyápatsiddhiṃ* v. अस्निग्धस्विन्नदेहस्य गुरुकोष्ठस्य योजितः । शीतोऽल्पस्नेहलवणद्रव्यमात्रो घनोऽपि वा ॥१॥ वस्तिः संक्षोभ्य तं दोषं दुर्बलत्वादनिर्हरन् । करोत्ययोगं तेन स्याद्वातमूत्रशकृद्ग्रहः ॥२॥ नाभिवस्तिरुजा दाहो हृल्लेपः श्वयथुर्गुदे । कंडूर्गंडानि वैवर्ण्यमरतिर्वह्निमार्दवं ॥३॥ 6. Atháto *bheshajakalpaṃ* v. धन्वसाधारणे देशे समे सन्मृत्तिके शुचौ । श्मशानचैत्यायतनश्वभ्रवल्मीकवर्जिते ॥१॥ मृदौ प्रदक्षिणजले कुशरोहिषसंस्तृते । अफालकृष्टेऽनाक्रांते पादपैर्बलवत्तरैः ॥२॥ शस्यते भेषजं जातं युक्तं वर्णरसादिभिः । जंत्वजग्धं दवादग्धमविदग्धं च वैकृतैः ॥३॥ भूतैश्छायातपांब्वाद्यैर्यथाकालं च सेवितं । अवगाढमहामूलमुदीचीं दिशमाश्रितं ॥४॥ In fine de ponderibus haec: शाणं पाणितलं मुष्टिं कुडवं प्रस्थमाढकं । द्रोणं वहं च क्रमशो विजानीयाच्चतुर्गुणं ॥ - - द्वौ शाणौ वटकः कोलं वदरं द्रंक्षणश्च, तौ (scil. drankshaṇau) । अक्षं पिचुः पाणितलं सुवर्णं कवलग्रहः ॥२५॥ कर्षो विडालपदकं तिंदुकं पाणिमानिका । शब्दान्यत्वमभिन्नेऽर्थे, शुक्तिरष्टमिका पिचू (i. e. 2 pichu = 1 ṣukti = 1 ashṭamiká) ॥२६॥ पलं प्रकुंचो बिल्वं च मुष्टिराम्रं चतुर्थिका (haec synonyma sunt) । द्वे पले प्रसृतस्तौ द्वावंजलिस्तौ तु मानिका (= 8 pala) ॥२७॥ आढकं भाजनं कंसो द्रोणः कुंभो घटोऽर्मणं (etiam haec synonyma) । तुला पलशतं ताभिर्विंशत्या भार उच्यते ॥२८॥

Liber VI. *Uttaratantra*, foll. 125–241, quadraginta capita habet. 1. Atháto *bálopacharaṇíyam* a. v. Iti ha smáhur A'treyádayo maharshayaḥ. जातमात्रं विशोध्योल्बाद्बालं सैंधवसर्पिषा । प्रसूतिक्लेशितं चानु बलातैलेन सेचयेत् ॥१॥ अश्मनोर्वादनं चास्य कर्णमूले समाचरेत् । अथास्य दक्षिणे कर्णे मंत्रमुच्चारयेदिमं ॥२॥ अंगादंगात्संभवसि हृदयादधि जायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतं ॥३॥ शतायुः शतवर्षोऽसि दीर्घमायुरवाप्नुहि । नक्षत्राणि दिशो रात्रिरहश्च त्वाभिरक्षतु ॥४॥ 2. Atháto *bálámayapratishedhaṃ* v. त्रिविधः कथितो बालः क्षीरान्नोभयवर्तनः । स्वास्थ्यं ताभ्यामदुष्टाभ्यां दुष्टाभ्यां रोगसंभवः ॥१॥ यदद्भिरेकतां याति न च दोषैरधिष्ठितं । तद्धि शुद्धं पयो वातादुष्टं तु प्लवतेऽम्भसि ॥२॥ 3. Atháto *bálagrahapratishedhaṃ* v. पुरा गुहस्य रक्षार्थं निर्मिताः शूलपाणिना । manushyavigraháḥ *pancha*, sapta strívigrahá graháḥ ॥ 1 ॥ *Skando, Viṣákho, Meshásyaḥ, Ṣvagrahaḥ* (svagrahaḥ MS.), *Pitṛi*-saṃjnitaḥ । *Ṣakuniḥ, Pútaná, Ṣítapútaná, Dṛishṭipútaná* ॥ 2 ॥ *Mukhamaṇḍiniká* tadvad, *Revatí, Ṣúshkarevatí* । तेषां ग्रहीष्यतां रूपं प्रततं रोदनं ज्वरः ॥३॥ सामान्यरूपमुत्त्रासजृंभाभ्रूक्षेपदीनताः । फेनस्रावोर्ध्वदृष्ट्योष्ठदंतदंशप्रजागराः ॥४॥ रोदनं कूजनं स्तन्यविद्वेषः स्वरवैकृतं । नखैरकस्मात्परितः स्वधात्र्यंगविलेखनं ॥५॥ In fine capitis titulus: *Samáptaṃ kaumáratantraṃ dvitíyam*, reperitur. 4. Atháto *bhútavijnánaṃ* v. लक्षयेज्ज्ञानविज्ञानवाक्चेष्टाबलपौरुषं । पुरुषेऽपौरुषं यत्र तत्र भूतग्रहं वदेत् ॥१॥ भूतस्य रूपप्रकृतिभाष्यगत्यादिचेष्टितैः । यस्यानुकारं कुरुते तेनाविष्टं तमादिशेत् ॥२॥ सोऽष्टादशविधो देवदानवादिभेदतः । हेतुस्तदनुषक्तौ तु सद्यः पूर्वकृतोऽथवा ॥३॥ 5. Atháto *bhútapratishedhaṃ* v. भूतं जयेदहिंसोत्थं जपहोमबलिव्रतैः । तपःशीलसमाधानदानज्ञानदयादिभिः ॥१॥ 6 (fol. 142[a]). Atháta *unmádapratishedhaṃ* v. उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः । उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः ॥१॥ शारीरमानसैर्दुष्टैरहितादन्नपानतः । विकृतासात्म्यसमलाद्विषमादुपयोगतः ॥२॥ विषण्णस्याल्पसत्त्वस्य व्याधिवेगसमुद्भ्रमात् । क्षीणस्य चेष्टावैषम्यात्पूज्यपूजाव्यतिक्रमात् ॥३॥ आधिभिश्चित्तविभ्रंशाद्विषेणोपविषेण च । एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥४॥

धियो विधाय कालुष्यं हत्वा मार्गान्मनोवहान् । उन्मादं कुर्वते तेन धीविज्ञानस्मृतिभ्रमात् ॥५॥ देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः । भ्रमत्यचिंतितारंभः ॥ 7. Atháto *'pasmárapratishedham* v. स्मृत्यपायो ह्यपस्मारः स धीसत्त्वाभिसंप्लवात् । जायतेऽभिहते चित्ते चिंताशोकभयादिभिः ॥१॥ उन्मादवत्प्रकुपितैश्चित्तदेहगतैर्मलैः । हते सत्त्वे हृदि व्याप्ते संज्ञावाहिषु खेषु च ॥२॥ तमो विशन्मूढमतिर्बीभत्साः कुरुते क्रियाः । दंतान्खादन्वमन्फेनं हस्तौ पादौ च विक्षिपन् ॥३॥ पश्यन्नसंति रूपाणि प्रस्खलन्पतति क्षितौ । विजिह्माक्षिभ्रुवो दोषवेगेऽतीते विबुध्यते ॥४॥ Hoc capite sectio tertia *bhútatantra* finitur. Quarta, *ṣálákyatantra*, qua affectiones partium in capite positarum tractantur, usque ad caput 24. porrigitur. 8. Atháto *vartmarogavijnáníyam* a. v. सर्वरोगनिदानोक्तैरहितैः कुपिता मलाः । अचक्षुष्यैर्विशेषेण प्रायः पित्तानुसारिणः ॥१॥ सिराभिरूर्ध्वं प्रसृता नेत्रावयवमाश्रिताः । वर्त्मसंधिं सितं कृष्णं दृष्टिं वा सर्वमक्षि वा ॥२॥ रोगान्कुर्युश्चलस्तत्र प्राप्य वर्त्माश्रयाः सिराः । सुप्तोत्थितस्य कुरुते वर्त्मस्तंभं सवेदनं ॥३॥ 9. Atháto *vartmarogapratishedham* v. कृच्छ्रोन्मीले पुराणाज्यं द्राक्षाकल्कांबुसाधितं । ससितं योजयेत्स्निग्धं नस्यधूमांजनादि च ॥१॥ 10. Athátaḥ *saṃdhisitásitarogavijnánam* v. वायुः क्रुद्धः सिराः प्राप्य जलाभं जलवाहिनीः । अश्रु स्रावयते वर्त्म शुक्लसंधेः कनीनकात् ॥१॥ तेन नेत्रं सरुग्रागशोफं स्यात्स जलास्रवः ॥ 11 (fol. 154[a]). Athátaḥ *saṃdhisitásitarogapratishedham* v. उपनाहं भिषक् स्विन्नं भिन्नं व्रीहिमुखेन च । लेखयेन्मंडलाग्रेण ततश्च प्रतिसारयेत् ॥१॥ पिप्पलीक्षौद्रसिंधूत्थैर्बध्नीयात्पूर्ववत्ततः । पटोलपत्रामलककक्वाथेनाश्च्योतयेच्च तं ॥२॥ 12. Atháto *drishṭirogavijnánam* v. सिरानुसारिणि मले प्रथमं पटलं श्रिते । अव्यक्तमीक्षते रूपं व्यक्तमप्यनिमित्ततः ॥१॥ प्राप्ते द्वितीयं पटलमभूतमपि पश्यति । भूतं तु यत्नादासन्नं दूरं सूक्ष्मं च नेक्षते ॥२॥ दूरांतिकस्थं रूपं च विपर्यासेन मन्यते । दोषे मंडलसंस्थाने मंडलानीव पश्यति ॥३॥ 13. Athátas *timirapratishedham* v. तिमिरं काचतां याति काचोऽप्यांध्यमुपेक्षया । नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्द्रुतं ॥१॥ तुलां पचेत जीवंत्या द्रोणेऽपां पादशेषिते । तत्क्वाथे द्विगुणक्षीरं घृतप्रस्थं विपाचयेत् ॥२॥ 14. Atháto *linganáṣapratishedham* v. विध्येत्सुजातं निःप्रेक्ष्यं लिंगनाशं कफोद्भवं । आवर्तक्यादिभिः षड्भिर्विवर्जितमुपद्रवैः ॥१॥ सोऽसंजातो हि विषमो दधिमस्तुनिभस्तनुः । शलाकयावकृष्टोऽपि पुनरूर्ध्वं प्रपद्यते ॥२॥ करोति वेदनां तीव्रां दृष्टिं च स्थगयेत्पुनः । श्लेष्मलैः पूर्यते चाशु सोऽन्यैः सोपद्रवैश्चिरात् ॥३॥ 15. Athátaḥ *sarvákshirogavijnánam* v. वातेन नेत्रेऽभिष्यन्ने नासानाहोऽल्पशोफता । शंखाक्षिभ्रूललाटस्य तोदस्फुरणभेदनं ॥१॥ शुष्काल्पा दूषिका शीतमच्छं चाश्रु चला रुजः । निमेषोन्मेषणं कृच्छ्राज्जंतूनामिव सर्पणं ॥२॥ अक्षाध्मातमिवाभाति सूक्ष्मैः शल्यैरिवाचितं । स्निग्धोष्णैश्चोपशमनं सोऽभिष्यंद उपेक्षितः ॥३॥ 16 (fol. 167[a]). Athátaḥ *sarvákshirogapratishedham* v. प्राग्रूप एव स्यंदेषु तीक्ष्णं गंडूषनावनं । कारयेदुपवासं च क्रोधादन्यत्र वातजात् ॥१॥ 17. Athátaḥ *karṇarogavijnánam* v. प्रतिश्यायजलक्रीडाकर्णकंडूयनैर्मरुत् । मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः ॥१॥ प्राप्य श्रोत्रसिराः कुर्याच्छूलं स्रोतसि वेगवत् । अर्धावभेदकं स्तंभं शिशिरानभिनंदनं ॥२॥ 18. Athátaḥ *karṇarogapratishedham* v. कर्णशूले पवनजे पिबेद्रात्रौ रसाशितः । वातघ्नसाधितं सर्पिः कर्णं स्विन्नं च पूरयेत् ॥१॥ पत्राणां पृथगश्वत्थबिल्वार्कैरंडजन्मनां । तैलसिंधूत्थदिग्धानां स्विन्नानां पुटपाकतः ॥२॥ रसैः कवोष्णैः ॥ Post folium 174. folia tria (४८—५०) desiderantur, in quibus capita 19 (*násárogavijnána*), 20 (*násárogapratishedha*) et disticha 6. prima capitis 21 (*mukharogavijnána*) inerant. 22 (fol. 178[a]). Atháto *mukharogapratishedham* v. खंडौष्ठस्य विलिख्यांतौ स्यूत्वा व्रणवदाचरेत् । यष्टीज्योतिष्मतीरोध्रसावर्णीसारिवोत्पलैः ॥१॥ 23. Athátaḥ *ṣirorogavijnánam* v. धूमातपतुषारांबुक्रीडातिस्वप्नजागरैः । उत्स्वेदाधिपुरोवाताव्प्यनिग्रहरोदनैः ॥१॥ अत्यंबुमद्यपानेन कृमिभिर्वेगधारणैः । उपधानमृजाभ्यंगद्वेषाधःप्रततेक्षणैः ॥२॥ असात्म्यगंधदुष्टामभाष्याद्यैश्च शिरोगताः । जनयंत्यामयान्दोषाः ॥ 24. Athátaḥ *ṣirorogapratishedham* v. शिरोभितापेऽनिलजे वातव्याधिविधिं चरेत् । घृतमक्तशिरा रात्रौ पिबेदुष्णपयोनुपः ॥१॥ माषान्मुद्गान्कुलत्थान्वा तद्वत्खादेद्घृतान्वितान् । तैलं तिलानां कल्कं वा क्षीरेण सह पाययेत् ॥२॥ Capp. 25—34. *Ṣalyatantram*, quinta libri sectio, qua vulnerum externorum curatio (chirurgia) tractatur. 25. Atháto *vraṇavijnánapratishedham* v. व्रणो द्विधा निजागंतुदुष्टशुद्धविभेदतः । निजो दोषैः शरीरोत्थैरागंतुर्बाह्यहेतुजः ॥१॥ दोषैरधिष्ठितो दुष्टः शुद्धस्तैरनधिष्ठितः ॥ 26 (fol. 191[a]). Athátaḥ *sadyovraṇapratishedham* v. सद्योव्रणा ये सहसा संभवंत्यभिघाततः । अनंतैरपि तैरंगमुच्यतेऽजुष्टमष्टधा ॥१॥ घृष्टावकृत्तविच्छिन्नप्रविलंबितपातितं । विद्धं भिन्नं विदलितं ॥ 27. Atháto *bhangapratishedham* v. पाताघातादिभिर्द्वेधा भंगोऽस्थ्नः संध्यसंधितः । प्रसारणाकुंचनयोरशक्तिः संधिमुक्तता ॥१॥ इतरस्मिन्भृशं शोफः सर्वावस्थास्वतिव्यथा । अशक्तिश्चेष्टितेऽल्पेऽपि पीड्यमाने सशब्दता ॥२॥ 28. Atháto *bhagandarapratishedham* v. हस्त्यश्वपृष्ठगमनकठिनोत्कटकासनैः । अर्शोनिदानाभिहितैरपरैश्च निषेवितैः ॥१॥ अनिष्टादृष्टपाकेन सद्यो वा साधुगर्हणैः । प्रायेण पिटिकापूर्वो योऽंगुले द्व्यंगुलेऽपि वा ॥२॥ पायौ व्रणोऽंतर्बाह्यो वा दुष्टासृड्मांसगो भवेत् । बस्तिमूत्राशयाभ्यासगतत्वात्स्यंदनात्मकः ॥३॥ भगंदरः ॥ 29. Atháto *granthyarbudaṣlípadápachínáḍívijnánam* v. कफप्रधानाः कुर्वंति मेदोमांसास्रगा मलाः । वृत्तोन्नतं यं श्वयथुं स ग्रंथिर्ग्रथनात्स्मृतः ॥१॥ 30. Atháto *granthyádipratishedham* v. ग्रंथिष्वामेषु कर्तव्या यथास्वं शोफवत्क्रिया । बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ॥१॥ स्नेहयेच्छुद्धिकामं च, तीक्ष्णैः शुद्धस्य लेपनं । संस्वेद्य बहुशो ग्रंथीन्विमृद्नीयात्पुनः पुनः ॥२॥ 31 (fol. 202[a]). Athátaḥ *kshudrarogavijnánam* v. स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसंमिता । पिटका कफवाताभ्यां बालानामजगल्लिका ॥१॥ 32. Athátaḥ *kshudrarogapratishedham* v. विस्रावयेज्जलौ-

कोभिरपक्वामजगल्लिकां । स्वेदयित्वा यवप्रख्यां विलयाय प्रलेपयेत् ॥१॥ दारुकुष्ठमनोह्वालैः ॥ 33. Atháto *guhyarogavijnánam* v. स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा etc. ॥ 34. Atháto *guhyarogapratishedham* v. मेढ्रमध्ये सिरां विध्येदुपदंशे नवोत्थिते । शीतां कुर्यात्क्रियां शुद्धिं विरेकेण विशेषतः ॥१॥ Capp. 35–38. *Vishatantram*, de antidotis. 35. Atháto *vishapratishedham* v. मथ्यमाने जलनिधावमृतार्थं सुरासुरैः । जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शनः ॥१॥ दीप्ततेजाश्चतुर्दंष्ट्रो हरिकेशोऽनलेक्षणः । जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः ॥२॥ हुंकृतो ब्रह्मणा मूर्तस्ततः स्थावरजंगमाः । सोऽध्यतिष्ठन्निजं रूपमुज्झित्वा वंचनात्मकं ॥३॥ 36 (fol. 215ª). Athátaḥ *sarpavishapratishedham* v. दर्वीकरा मंडलिनो राजीमंतश्च पन्नगाः । त्रिधा समासतो भौमा भिद्यंते ते त्वनेकधा ॥१॥ 37. Athátaḥ *kítalútádivishapratishedham* v. सर्पाणामेव विण्मूत्रशुक्रांडशवकोथजाः । दोषैर्व्यस्तैः समस्तैश्च युक्ताः कीटाश्चतुर्विधाः ॥१॥ दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्बणः । आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान् ॥२॥ पक्वः पीलुफलप्रख्यः खर्जूरसदृशोऽथवा । कफाधिकैर्मंदरुजः पक्वोदुंबरसंनिभः ॥३॥ 38. Atháto *múshikálarkavishapratishedham* v. लालनश्चपलः पुत्रो हंसिरश्चिक्किरोऽजिरः । कषायदंतः कुलकः कोकिलः कपिलोऽसितः ॥१॥ अरुणः शबलः श्वेतकपोतः पलितोंदुरः । छुच्छुंदरो रसालाख्यो दशाष्टौ चेति मूषिकाः ॥२॥ शुक्रं पतति यत्रैषां शुक्रदिग्धैः स्पृशंति वा । यदंगमंगैस्तत्रास्रे दूषिते पांडुतां गते ॥३॥ ग्रंथयः श्वयथुः कोथो मंडलानि भ्रमोऽरुचिः etc. ॥[1] 39. Atháto *rasáyanádhyáyam* v. दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः । प्रभावर्णस्वरौदार्यं देहेंद्रियबलोदयं ॥१॥ वाक्सिद्धिं वृषतां कांतिमवाप्नोति रसायनात् । लाभोपायो हि धातूनां रसादीनां रसायनं ॥२॥ पूर्वे वयसि मध्ये वा तत्प्रयोज्यं जितात्मनः । स्निग्धस्य स्रुतरक्तस्य विशुद्धस्य च सर्वथा ॥३॥ अविशुद्धे शरीरे हि युक्तो रासायनो विधिः । वाजीकरो वा मलिने वस्त्रे रंग इवाफलः ॥४॥ रसायनानां द्विविधं प्रयोगमृषयो विदुः । कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥५॥ 40. Atháto *vájíkaraṇádhyáyam* v. वाजीकरणमन्विच्छेत्सततं विषयी पुमान् । पुष्टिस्तुष्टिरपत्यं च गुणवत्तत्र संश्रितं ॥१॥

Totum opus, cum Aruṇadattae ad Kalpasthánam commentario in codice E. I. H. 2455 (Samvat 1865), Kalpasthánam et Uttarasthánam in cod. E. I. H. 72. satis antiquo exstant. In annotationibus, quae hujus codicis marginibus adscriptae sunt, *Aruṇadattae*, *Hemádris*, *Chandrae* commentarii laudantur. De codice Havniensi cf. Westergaard Catal. p. 103, de Berolinensi Weber Catal. p. 278.

Apographon nostrum e codice praestantissimo anno 1794 non satis accurate transscriptum est. (Wilson 298, 299.)

743.

Lit. Devan. Charta Europ. Foll. 448. Long. 11. Lat. 9. Linn. 22.

Hoc codice *Bhávaprakáṣas* continetur, quo libro *Bhávas* (Miṣrabháva), Miṣralaṭakanae filius, artem medicam universam dilucide exposuit. (A.) Prooemium, quo medicinae Indicae propagatae historia mythica traditur, sublatis gravissimis erroribus, exscripsi:

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारं । गुरुमवगमनयनप्रदमिष्टकरीमिष्टदेवतां वंदे ॥१॥ आयुर्वेदागमनं क्रमेण येनाभवद्भूमौ । प्रथमं लिखामि तमहं नानातंत्राणि संदृश्य ॥२॥ áyurvedasya lakshaṇam áha । आयुर्हिताहितं व्याधिर्निदानं शमनं तथा । विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते ॥३॥ áyurvedasya niruktim áha । अनेन पुरुषो यस्मादायुर्विंदति वेत्ति च । तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥४॥ ṣarírajívayor yogo jívanam, tenávachhinnaḥ kála áyuḥ. Áyurvedadváráyushyáṇy anáyushyáṇi cha dravyaguṇakarmáṇi jnátvá, teshám sevanatyágábhyám árogyeṇáyur vindati. Tenaiva hetuná parasyápy áyur vetti cha.

Kramam áha. *Tatrádau Brahmaprádurbhávaḥ* । विधाथर्वसर्वस्वमायुर्वेदं प्रकाशयन् । स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुं ॥५॥

Atha Dakshaprádurbhávaḥ । ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु । विधिर्धीनीरधिः सांगमायुर्वेदमुपादिशत् ॥६॥

Atháṣvinísutaprádurbhávaḥ । दक्षादधीत्य दस्रौ वितेनतुः संहितां स्वीयां । सकलचिकित्सकलोकप्रतिपन्नविवृद्धये धन्यां ॥७॥ स्वयंभुवः शिरश्छिन्नं भैरवेण रुषाय तत् । अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ॥८॥ देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः । अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् ॥९॥ वज्रिणोऽभूद्भुजस्तंभः स दस्राभ्यां चिकित्सितः । सोमाद्विपतितश्चंद्रस्ताभ्यामेव सुखीकृतः ॥१०॥ विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च । शशिनो राजयक्ष्माभूदश्विभ्यां ते चिकित्सिताः ॥११॥ भार्गवश्च्यवनः कामी वृद्धः स विकृतिं गतः । वीर्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा ॥१२॥ एतैश्चान्यैश्च बहुभिः कर्मभिर्भिषजां वरौ । बभूवतुर्भृशं पूज्याविंद्रादीनां दिवौकसां ॥१३॥

Athendraprádurbhávaḥ । संदृश्य दस्रयोरिंद्रः कर्माख्येतानि यत्नवान् । आयुर्वेदं निरुद्वेगं तौ ययाचे शचीपतिः ॥१४॥ नासत्यौ सत्यसंधेन शक्रेण किल याचितौ । आयुर्वेदं यथाधीतं ददतुः शतमन्यवे ॥१५॥ नासत्याभ्यामधीत्यैष आयुर्वेदं शतक्रतुः । अध्यापयामास बहूनात्रेयप्रमुखान्मुनीन् ॥१६॥

Athátreyaprádurbhávaḥ । एकदा जगदालोक्य गदाकुलमितस्ततः । चिंतयामास भगवानात्रेयो मुनिपुंगवः ॥१७॥ किं करोमि क्व गच्छामि कथं लोका निरामयाः । भवंति, सामयानेतान्न शक्नोमि निरीक्षितुं ॥१८॥ दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः । एतेषां दुःखतो दुःखं ममापि हृदयेऽधिकं ॥१९॥ आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणां ।

[1] Cod. E. I. H. 72. in canis rabidi morsum hanc precem *Vriddhavágbhaṭae* tributam continet: अलर्काधिपते यक्ष सारमेय गणाधिप । अलर्कजुष्टमेतं मे निर्विषं कुरु मा चिरात् ॥

इति निश्चित्य गतवानात्रेयस्त्रिदशालयं ॥२०॥ तत्र मंदिरमिंद्रस्य गत्वा शक्रं ददर्श सः । सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः ॥२१॥ भासयंतं दिशो भासा भास्करप्रतिमत्त्विषा । आयुर्वेदमहाचार्यं शिरोधार्यं दिवौकसां ॥२२॥ शक्रस्तु तं निरीक्ष्यैव त्यक्तसिंहासनो ययौ । तदग्रे पूजयामास भृशं भूरितपःकृशं ॥२३॥ कुशलं परिपप्रच्छ तथागमनकारणं । स मुनिर्वक्तुमारेभे निजागमनकारणं ॥२४॥ देवराज न राजासि दिव एव यतो भवान् । विधात्रा विहितो यत्नात्त्रिलोकीलोकपालकः ॥२५॥ व्याधिभिर्व्यथिता लोकाः शोकाकुलितचेतसः । भूतले संति, संतापं तेषां हर्तुं कृपां कुरु ॥२६॥ आयुर्वेदोपदेशं मे कुरु कारुण्यतो नृणां । तथेत्युक्त्वा सहस्राक्षोऽध्यापयामास तं मुनिं ॥२७॥ मुनींद्र इंद्रतः सांगमायुर्वेदमधीत्य सः । अभिनंद्य तमाशीर्भिराजगाम पुनर्महीं ॥२८॥ अथात्रेयो मुनिः श्रेष्ठो भगवान्करुणाकरः । स्वनाम्ना संहितां चक्रे नरचक्रानुकंपया ॥२९॥ Tato *'gniveṣam, Bheḍam* cha, *Játúkarṇam, Paráṣaram* । *Kshírapáṇim* cha, *Háritam* áyurvedam apáṭhayat ॥ 30 ॥ Tantrasya kartá prathamam *Agniveṣo*[1] 'bhavat purá । tato *Bheḍádayaṣ* chakruḥ svaṃ svaṃ tantram, kṛitáni tu ॥ 31 ॥ श्रावयामासुरात्रेयं मुनिवृंदेन वंदितं । श्रुत्वा च तानि तंत्राणि हृष्टोऽभूदत्रिनंदनः ॥३२॥ यथावत्सूचितं तस्मात्प्रहृष्टा मुनयोऽभवन् । दिवि देवर्षयो देवाः श्रुत्वा साध्विति तेऽब्रुवन् ॥३३॥

Atha Bharadvájaprádurbhávaḥ । एकदा हिमवत्पार्श्वे दैवादागत्य संगताः । मुनयो बहवस्तांश्च नामभिः कथयाम्यहं ॥३४॥ भरद्वाजो मुनिवरः प्रथमं समुपागतः । ततोऽंगिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ॥३५॥ पुलस्त्योऽगस्तिरसितो वसिष्ठः सपराशरः । हारीतो गौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च ॥३६॥ जमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च । नारदो वामदेवश्च मार्कंडेयः कपिष्ठलः ॥३७॥ शांडिल्यः सहकौंडिन्यः शाकुनेयश्च शौनकः । आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षितः ॥३८॥ देवलो गावलो धौम्यः काप्यकात्यायनावुभौ । कांकायनो वैजवापः कुशिको बादरायणिः ॥३९॥ हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः । वैखानसा बालखिल्यास्तथैवान्ये महर्षयः ॥४०॥ ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च । तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ॥४१॥ सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमां । धर्मार्थकाममोक्षाणां मूलमुक्तं कलेवरं । तच्च सर्वार्थसंसिद्ध्यै भवेद्यदि निरामयं ॥४२॥ तपःस्वाध्यायधर्माणां ब्रह्मचर्यव्रतायुषां । हर्तारः प्रसृता रोगा यत्र तत्र च सर्वतः ॥४३॥ रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा दृष्ट्यादींद्रियशक्तिसंक्षयकराः सर्वांगपीडाकराः । धर्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्प्राणानाशु हरंति, संति यदि ते क्षेमं कुतः प्राणिनां ॥४४॥ तत्तेषां प्रशमाय कश्चन विधिश्चिंत्यो भवद्भिर्बुधैर्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् । त्वं योग्यो भगवन्सहस्रनयनं याचस्व लब्धं क्रमादायुर्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयं ॥४५॥ इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः । भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयं ॥४६॥ तत्रेंद्रभवनं गत्वा सुरर्षिगणमध्यगं । दृष्टवान्वृत्रहंतारं दीप्यमानमिवानलं ॥४७॥ दृष्ट्वैव स मुनिं प्राह भगवान्मघवा मुदा । धर्मज्ञ स्वागतं तेऽस्तु मुनिं तं समपूजयत् ॥४८॥ सोऽभिगम्य जयाशीर्भिरभिनंद्य सुरेश्वरं । ऋषीणां वचनं सम्यगश्रावयत सत्तमं ॥४९॥ व्याधयो हि समुत्पन्नाः सर्वप्राणिभयंकराः । तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ॥५०॥ तमुवाच मुनिं सांगमायुर्वेदं शतक्रतुः । जीवेद्वर्षसहस्राणि देही नीरुङ्निशम्य यं ॥५१॥ सोऽनंतपारं त्रिस्कंधमायुर्वेदं महामतिः । यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः ॥५२॥ तेनायुः सुचिरं लेभे भरद्वाजो निरामयं । अन्यानपि मुनिश्चक्रे नीरुजः सुचिरायुषः ॥५३॥ तत्रत्या (tattatra A. tatratya B.) जनितज्ञानचक्षुष ऋषयोऽखिलाः । गुणान्कर्माणि द्रव्याणि दृष्ट्वा तद्विधिमाश्रिताः ॥५४॥ आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतं । आयुर्वेदोक्तविधिनान्येऽपि स्युर्मुनयो यथा ॥५५॥

Atha Charakaprádurbhávaḥ । यदा मात्स्यावतारेण हरिणा वेद उद्धृतः । तदाशेषं च (तदाशेषश्च MS.) तत्रैव वेदं सांगमवाप्नवान् ॥५६॥ अथर्वांतर्गतं सम्यगायुर्वेदं च लब्धवान् । एकदा स महीवृत्तं द्रष्टुं चर इवागतः ॥५७॥ तत्र लोकान्गदैर्ग्रस्तान्व्यथया परिपीडितान् । स्थलेषु बहुषु व्यग्रान्म्रियमाणांश्च दृष्टवान् ॥५८॥ तान्दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः । अनंतश्चिंतयामास रोगोपशमकारणं ॥५९॥ संचिंत्य स स्वयं तत्र मुनेः पुत्रो बभूव ह । यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥६०॥ तस्माच्चरकनामासौ विख्यातः क्षितिमंडले । स भाति चरकाचार्यो देवाचार्यो यथा दिवि । सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ॥६१॥ आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् । मुनयो बहवस्तैश्च कृतं तंत्रं स्वकं स्वकं ॥६२॥ तेषां तंत्राणि संस्कृत्य समाहृत्य विपश्चिता । चरकेणात्मनो नाम्ना ग्रंथोऽयं चरकः कृतः ॥६३॥

Atha Dhanvantariprádurbhávaḥ । एकदा देवराजस्य दृष्टिर्निपतिता भुवि । तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ॥६४॥ तान्दृष्ट्वा हृदयं तस्य दयया परिपीडितं । दयार्द्रहृदयः शक्रो धन्वंतरिमुवाच ह ॥६५॥ धन्वंतरे सुरश्रेष्ठ भगवन्किंचिदुच्यते । योग्यो भवसि भूतानामुपकारपरो भव ॥६६॥ उपकाराय लोकानां केन किं न कृतं पुरा । त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ॥६७॥ तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव । प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय ॥६८॥ इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया । समस्तमायुषो वेदं धन्वंतरिमुपादिशत् ॥६९॥ अधीत्य चायुषो वेदमिंद्राद्धन्वंतरिः पुरा । आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥७०॥ नाम्ना सुतोऽभवत्ख्यातो दिवोदास इति क्षितौ । बाल एव विरक्तोऽभूच्चचार च महत्तपः ॥७१॥ यत्नेन

[1] Libellus huic auctori tributus, *Anjana*, i.e. collyrium, appellatus, quo morborum principalium diagnosis distichis 234. tractatur, in codice E. I. H. 1643. exstat. Incipit: अबोधतिमिरच्छिन्नचक्षुषां भिषजां कृते । सूक्ष्मं करोत्यग्निवेशो ग्रंथमंजनमाख्यया ॥१॥ दोषरोषो रुजां हेतुस्तत्प्रकोपे तु कारणं । प्रत्येकं हीनमिथ्यातियोगः कालार्थकर्मणां ॥२॥ Desinit in distichis: अतिविस्तरपुस्तकपाठहठप्रतिहस्ततया धृतभूरिभियां नयनानलदृङ्मितपद्यकृतं भिषजामिदमंजनमस्तु मुदे ॥२३३॥ चकार चतुरोचितं तदिदमग्निवेशोऽंजनं परोपकृतये कृतं परिमितं रुजां ज्ञापकं । ततः समुदितैः सदा सुकृतराशिभिस्तुष्यतां तुषारगिरिकन्यकापरिदृढः स योषित्सुतः ॥२३४॥ Codex anno 1793 non satis accurate exaratus est.

महता ब्रह्मा तं काश्यामकरोन्नृपं । ततो धन्वंततरिर्लोकैः काशिराजोऽभिधीयते ॥७२॥ हिताय देहिनां स्वीया संहिता विहितामुना । अयं विद्यार्थिनो लोकान्संहितां तामपाठयत् ॥७३॥

Atha Suṣrutaprádurbhávaḥ । अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽवदन् । अयं धन्वंतरिः काश्यां काशिराजो य उच्यते ॥७४॥ विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् । वत्स वाराणसीं गच्छ विश्वेशवरवल्लभां ॥७५॥ तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः । स हि धन्वंतरिः साक्षादायुर्वेदविदां वरः ॥७६॥ सर्वप्राणिदयातीर्थमुपकारी महामखः । आयुर्वेदं ततोऽधीष्व लोकोपकृतिहेतवे ॥७७॥ पितुर्वचनमाकर्ण्य सुश्रुतः काशिकां गतः । तेन सार्धं समध्येतुं मुनिसूनुशतं ययौ ॥७८॥ अथ धन्वंतरिं सर्वे वानप्रस्थाश्रमे स्थितं । भगवंतं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतं ॥७९॥ काशिराजं दिवोदासं तेऽपश्यन्विनयान्वितं । स्वागतं च इति स्माह दिवोदासो यशोधनः ॥८०॥ कुशलं परिपप्रच्छ तथागमनकारणं । ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरं ॥८१॥ भगवान्मानवान्दृष्ट्वा व्याधिभिः परिपीडितान् । क्रंदतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ॥८२॥ आमयानां शमोपायं विज्ञातुं वयमागताः । आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ॥८३॥ अंगीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् । व्याख्यातं तेन ते यत्नाज्जगृहुर्मुनयो मुदा ॥८४॥ काशिराजं जयाशीर्भिरभिनंद्य मुदान्विताः । सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकं ॥८५॥ प्रथमं सुश्रुतस्तेषु स्वं तंत्रं कृतवान्स्फुटं । सुश्रुतस्य सखायोऽपि पृथक्तंत्राणि तेनिरे ॥८६॥ सुश्रुतेन कृतं तंत्रं सु श्रुतं बहुभिर्यतः । तस्मात्तत्सुश्रुतं नाम्ना विख्यातं क्षितिमंडले ॥८७॥ Ity áyurvedapraṇetṛíṇám prádurbhávaḥ ॥

आयुर्वेदाब्धिमध्यादतिमतिमुनयो योगरत्नानि यत्ना-
    ल्लब्ध्वा स्वे स्वे निबंधे दधुरखिलजनव्याधिविध्वंसनाय ।
तत्तद्ग्रंथगृहीतैः सुवचनमणिभिर्भावमिश्रश्चिकित्सा-
    शास्त्रे जाड्यांधकारं प्रशमयितुमिमं संविधत्ते प्रकाशं ॥८८॥
श्रीपतिपदप्रसादादाशीर्भ्यो भूमिदेवानां ।
भावप्रकाशनामा ग्रंथोऽयं पठ्यतां सर्वैः ॥८९॥

Auctor librum in capita (prakaraṇa) sex divisit. *Primo* (desinit in fol. 6^{b}) de rerum natura brevissime exponit. *Secundum* incipit: चिकित्सायां शरीरी ह्यधिकृतः । स शरीरी यथोत्पद्यते तद्बोधयितुं गर्भोत्पत्तिक्रममाह ॥ Majore hujus capitis parte anatomiam explicat. Paragraphi singulae hae: rajasvalásvabhávaḥ; rajasvaláyá niyamáḥ; rajasvalákṛityam; bhartṛikṛityam; yugmáyugmarátríṇám phalam; ayogyaḥ purushaḥ; ayogyá strí; garbhávataraṇakramaḥ; garbháṣayasya svarúpam; gṛihítagarbháyá lakshaṇam; putragarbhavatyá lakshaṇam; napunsakaviṣesháḥ; garbhalakshaṇam fol. 11^{a}. *Trayo dosháḥ* (váyu, pitta, kapha) fol. 11^{a}; dhátavaḥ fol. 14^{a}; upadhátavaḥ fol. 21^{b}; áṣayáḥ, marmáṇi fol. 22^{a}; saṃdhayaḥ fol. 24^{a}; siráḥ fol. 25^{a}; snáyavaḥ fol. 26^{a}; dhamanyaḥ fol. 26^{b}; kaṇḍaráḥ fol. 27^{a}; randhráṇi, srotánsi, jáláni, kúrcháḥ, rajjavaḥ, sevanyaḥ, saṃgháṭáḥ, símantáḥ fol. 28^{a}; tvachaḥ, lománi, lomakúpáḥ fol. 28^{b}. Denique de partu exponit, usque ad finem capitis fol. 31^{a}. *Caput tertium.* De infantibus curandis. De septem hominum temperamentis fol. 34^{b}. *Capite quarto* de diaeta agitur, usque ad fol. 49^{a}. *Quinto* materia medica accuratissime traditur. Partes singulae hae: vyádher lakshaṇam; chikitsá; dravyaparíkshá fol. 55^{b}; pratinidhiḥ (medicamentis substituenda); dravyagatam padárthapanchakam (rasa, guṇa, vírya, vipáka, ṣakti) fol. 57^{b}; harítakyádidravyaguṇáḥ fol. 61^{b}; mánsavargaḥ fol. 111^{b}; mánsasya prakáráḥ fol. 119^{b}; kṛitánnavargaḥ fol. 120^{a}; várivargaḥ fol. 123^{a}; dugdhavargaḥ fol. 126^{a}; dadhivargaḥ fol. 128^{a}; takravargaḥ fol. 129^{a}; navanítam, ghṛitam fol. 129^{b}; mútravargaḥ; tilatailaguṇáḥ fol. 130^{b}; saṃdhánavargaḥ fol. 131^{b}; madhuvargaḥ fol. 133^{a}; ikshuvargaḥ fol. 134^{a}; anekárthanámavargaḥ fol. 135^{a}; mánaparibháshá fol. 137^{b}; bheshajánáṃ vidhánáni fol. 138^{b}; dhátúnáṃ ṣodhanamáraṇavidhiḥ fol. 141^{b}; puṭaprakáráḥ, yantraprakáráḥ fol. 143^{a}; dravyáṇáṃ guṇavattávidhiḥ; snehapánavidhiḥ fol. 153^{a}; pancha karmáṇi (vamana, vireka, anuvásana, nirúha, návana) fol. 153^{b}; dhúmapánavidhiḥ fol. 162^{b}; pratisáraṇam; svedavidhiḥ fol. 164^{a}; álepavidhiḥ fol. 166^{a}; piṇḍívidhiḥ fol. 168^{a}; tarpaṇavidhiḥ fol. 168^{b}; puṭapákavidhiḥ fol. 169^{a}; ropaṇí vartiḥ, ropaṇí rasakriyá fol. 170^{a}; ropaṇaṃ chúrṇam; snehanaṃ chúrṇam; pratyanjanavidhiḥ fol. 170^{b}; bheshajabhakshaṇasamayáḥ fol. 171^{b}. *Capite sexto*[1] nosologia, et therapia, sectione ultima *vájíkaraṇam* tractatur.

Auctores et libros Bháva hos laudat: *Kárttika* fol. 189^{b}; *Kusumávalí* 176^{b}; *Gadádhara* 189^{b}. 207^{a}; *Chakradatta* 187^{a}; *Charaka; Jejjaṭa* (quod nomen e Jaijjata, Jaiyyaṭa, corruptum videtur); *Dhanvantarinighaṇṭu*[2]; *Bhoja* 15^{b} (पंच पेशीशतान्येव etc.). 18^{a} (धातो रसादौ मज्जांते etc.). 40^{a} (गुरूणामर्धसौहित्यं etc.). 47^{a} (पिबति पर्युषितं जलमन्वहं तिमिरिणीचरमप्रहरे यदि); *Madanapála* 170^{b}. 245^{b}; *Rasapradípa* 13^{b}. 142^{b}. 253^{b}; *Rasaratnapradípa* 192^{a}. 253^{b}; *Rasámṛita* 100^{b}; *Rasendrachintámaṇi* 253^{b}; *Vangasena* 186^{a}. 248^{b}; *Vágbhaṭa; Vṛiddhavágbhaṭa* 11^{a}. 35^{a}; *Viṣvámitra* 442^{a}; *Vṛindaṭíká* 197^{b}; *Ṣárngadhara* 22^{a}. 28^{a}. 187^{a}. 189^{a}. 192^{a}; *Suṣruta; Vṛiddhasuṣruta* 125^{b}. 222^{b}; *Hárita.* Quorum in numero Suṣrutae, Vágbhaṭae, Charakae plurima debet, res vero ab iis traditas melius disposuit, et terminos technicos permultos explicavit. Quae in opere '*Wise,* Commentary on the Hindu System of Medicine' traduntur, maximam partem ex Bhávaprakáṣa nec tamen satis accurate excerpta sunt.

De codice Havniensi cf. Westergaard Catal. p. 104.
Codex anno 1824 exaratus est. (WILSON 294.)

[1] Hoc caput in sectiones (khaṇḍa) tres divisum est.
[2] Cf. *Bhímasenena* nirmitam prapánakam 122^{a}.

744.

Foll. 10–59. Linn. 20. *Bhávaprakáṣae* capita quatuor prima, et quinti initium. (B.)

I. fol. 16b; II. fol. 41a; III. fol. 45a; IV. fol. 59a.

Haec folia post annum 1816 exarata sunt. (Wilson 292b.)

745.

Lit. Bengal. Charta Ind. Foll. 92. Long. 16½. Lat. 5½. Linn. 6.

Rugviniṣchayas, quo libro *Mádhavas*, Indukarae filius, octoginta morborum causas et symptomata (diagnosin) adumbravit. (A.) Incipit:

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणं ।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवं ॥१॥
नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात् ।
सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयं ॥२॥
नानातन्त्रविहीनानां भिषजामल्पमेधसां ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति ॥३॥

निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥४॥[1] निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः । *nidánam* áhuḥ paryáyaiḥ. *Prágrúpaṃ* येन लक्ष्यते ॥५॥ उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः । लिंगमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथं ॥६॥ tad eva (i. e. púrvarúpam) *vyaktatáṃ* yátaṃ *rúpam* इत्यभिधीयते । संस्थानं व्यंजनं लिंगं लक्षणं चिह्नमाकृतिः ॥७॥[2] हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणां । औषधान्नविहाराणामुपयोगं सुखावहं ॥८॥ vidyád *upaṣayaṃ* व्याधेः स हि सात्म्य इति स्मृतः । विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ॥९॥ यथादुष्टेन दोषेण यथा चानुविसर्पता । निर्वृत्तिरामस्यासौ *sampráptir* जातिरागतिः ॥१०॥

